नं० ८६४-घ

सूर्यसिद्धान्तः विवरण सहितः (ज्योतिषम्)

पत्राणि १६५ (सम्पूर्णम्)

कर्त्ता भूधरः

~~६६५~~ ८६५

संवत (१८६८)

२२० पत्राणि

८६४

१६६ पत्राणि

सूर्य्यसिद्धांतटीका काव्यधरी १।६५

॥६०॥ ओंस्वस्तिश्रीगणाधिपतयेनमः॥ ॥श्रीसूर्यायनमः॥ ॥यस्योदयेनिखिलविश्वसहस्रपत्रमुज्जृं
भतेभवतिसंकुचितंतदस्ते॥तंविश्ववंद्यसुरवंदितपादपद्मंसव्येतराच्युतदृशंप्रणमामिसूर्यम्॥१॥कांपिल्ये
सुरसिंधुसिंधुरतटेज्योतिर्विदामग्रणीर्भारद्वाजकुलेमलेसमभवत्तच्छ्रीवेमन्नामाकयः॥तत्सुत्रोनृपवंदवं
दितपदःश्रीदेवदत्ताभिधःकीर्त्यानिर्मलयोज्वलाःसमन्तयो[illegible]ःपंक्तिसंख्यादिशः॥२॥भूधरस्तत्सुतः
सूर्य्यसिद्धांतविवृणोम्यहं॥गुरूणांपादयुगलकमलभ्रमरायितः॥३॥अथनिर्विघ्नेनप्रारीप्सितसमा
प्तिकामोनिखिलजगदादिकारणभूतदेवदेवनमस्काररूपंशिष्टाचारपरिप्राप्तकर्त्तव्यताकंमंगलमाच
रतिग्रंथकारः॥ ॥अचिंत्याव्यक्तरूपायनिर्गुणायगुणात्मने॥समस्तजगदाधारमूर्त्तयेब्रह्मणेनमः॥१
॥ब्रह्मणेनमइत्यन्वयः।बृहत्वाद्बृंहणत्वाच्चब्रह्मेत्युक्तेरपरिच्छिन्नायव्यापकायेत्यर्थः।तस्यविशेषणा
न्यचिंत्येत्यादीनि।अचिंत्यंचिंतितुमशक्यं मनोऽविषयमित्यर्थः तथाअव्यक्तंव्यंज्यतइतिव्यक्तंनव्यक्त
मव्यक्तंवाचाप्यप्रतिपाद्यमित्यर्थः यतोवाचोनिवर्त्ततेअप्राप्यमनसासहेतिश्रुतेः एवंभूतंरूपंयस्यत

स्मै निर्गुणाय निर्गता गुणा यस्मात्तस्मै सत्त्वरजस्तमोऽतीतायेत्यर्थः गुणात्मने· गुणा आत्मा स्वरूपं यस्य
तस्मै प्रकृतिरूपायेत्यर्थः॥१॥ ।गुणानां साम्यावस्था प्रकृतिरित्युक्तेः यद्वा· गुणा आत्मनो देहा यस्य त-
स्मै तथा च गुणकारणायेत्यर्थः आत्मा देह इति विश्वकोषात्· समस्तस्य जगत आधारं या शक्तिः सा मूर्त्तिर्यस्य त
स्मै अनेन सकलविश्वोद्वहनक्षमस्य विग्रहाकारेण क्रियान्वयास इति· महीरूपायेति· यद्वा· सकलं जगदाधारं
यस्याः एवंभूता मूर्त्तिरात्मस्वरूपं यस्य· तथा च सकलान्तर्यामिन इत्यर्थः अत एवाचिन्त्यत्वं अथवा अव्यक्तः शंक
रे विष्णाविति विश्वोक्तेः सत्त्वोगुणप्रधानः विष्णुः रजोगुणप्रधानो ब्रह्मा तमोगुणप्रधानः शिवस्तद्रूपायेत्यर्थः
।शेषं समानं। सूर्येण तच्छास्त्रं विधाय स्वांशपुरुषद्वारा मयाय· प्रथममाहे[ति] प्रतिपादनाय कथामवतारयति
॥ ॥अल्पावशिष्टे तु कृते मयो नाम महासुरः॥ रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमं॥२॥ वेदांगमग्र्यमखि-
लं ज्योतिषां गतिकारणं॥ आराधयन्विवस्वंतं तपस्तेपे सुदुःकरं॥३॥ तोषितस्तपसा तेन प्रीतस्तस्मै वरार्थिने।
ग्रहाणां चरितं प्रादान्मयाय सविता स्वयं॥४॥ कृते सत्ययुगेऽल्पावशिष्टे किंचिच्छिष्टे सति मयनामा दैत्यः सूर्य-
माराधयन् सूर्यस्याराधनाय दुश्चरं तपश्चकारेत्यन्वयः आराधनप्रयोजनं विशेषणेनाह· ज्ञायतेऽने-

नेति ज्ञानं ज्ञानं ज्योतिः शास्त्रं तज्जिज्ञासुः श्रोतुमिच्छुः किंभूतं शास्त्रं परमं रहस्यं परममुत्कृष्टं रहस्यं आनंदजनकं-
ग्रहगति ग्रहलग्नगोलादिवासनाज्ञानजनकत्वात् परममिति भिन्नं वा विशेषणं परमं शास्त्रांतरापेक्षयोत्कृष्टं प्रतिपा-
द्यस्यात्र प्रत्यक्षेण दर्शयितुमप्रमाणत्वात् शास्त्रांतरे तु प्रत्यक्षाभावात् पुनः किंभूतं शास्त्रं पुण्यं पुण्यजनकं ज्योतिः-
शास्त्रस्य वेदांगत्वात् पुनः किंभूतं उत्तमं उत्कृष्टं तमो ज्ञानं यस्मात्तत् अज्ञाननाशकमित्यर्थः पुनः किंभूतं अग्र्यं वे-
दांगं अग्र्यं श्रेष्ठं वेदस्यांगं नेत्ररूपं नेत्रत्वाच्छ्रेष्ठं उक्तं च वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चांगमध्येऽस्य तेनो-
च्यते संयुतोपीतरैः कर्णनासादिभिश्चक्षुषांगेन हीनो न किंचित्करः इति पुनः किंभूतं अखिलेति समस्तज्योतिषांग-
तेर्गतिज्ञानस्य कारणं एतद्द्विविशेषणं वास्तव्योयतत्वादितरगतीनां एवं तपसातोषित आराधितोऽतएव प्रीतोऽर्क-
स्तस्मै मयाय ग्रहाणां चरितं चरितज्ञानरूपं वरं प्रादात् ग्रहचरितज्ञानवान् भवेति वरमदादित्यर्थः अथ वरदान-
प्रकारमाह श्रीसूर्य उवाच ॥ ॥विदितस्ते मया भावस्तपसाराधितस्त्वहं दद्यां कालाश्रयं ज्ञानं ज्योतिषां चरितं-
महत्[illegible]॥ न मे तेजःसहः कश्चिदाख्यातुं नास्ति मे क्षणः ॥मदंशः पुरुषोऽयं ते निःशेषं कथयिष्यति ॥९॥ इत्युक्त्वांतर्दधे
देवः समादिश्यांशमात्मनः ॥स पुमान्मयमाहेदं प्रणतं प्रांजलिं स्थितं ॥७॥ ॥भावोऽभिप्रायः यदिच्छसि तज्ज्ञा- २
नमित्यर्थः ॥तव कालाश्रयं काल आश्रयो यस्य कालविषयकमित्यर्थः ॥एवंभूतं ज्ञानं ददामि ज्योतिषां चरितं येन ज्ञा-

यतेतत्स्थानमित्यर्थः।तथाच·ज्योतिश्चरितज्ञाने चक्षुरत्राधिकारीतिसूचितं·ज्ञणोऽवसरः अहोरात्रंध्यानमग्नस<
त्त्वात्· सूर्योमयमित्युक्त्वात्मनोंऽशंपुरुषंचादिश्यान्तर्ध्यानंतर्हितवान्·सचपुमानिदंवक्ष्यमाणंप्रांजलिस्थितं·प्रां
जलिस्थितंमयंप्रत्यब्रवीत्·तदेवाह·सूर्यांशपुरुषउवाच·॥शृणुष्वैकमनाः पूर्वंयदुक्तंज्ञानमुत्तमं·।युगेयुगेमह
र्षीणांस्वयमेवविवस्वतः।९॥ ॥एकमनाएकाग्रचित्तोभूत्वातच्छृणुयत्ज्ञानंशास्त्रंसूर्यःस्वयंमहर्षीणांपुराप्रतियुग
मुक्तवान्·मयोच्यमानमिदंशास्त्रंतदेवयत्पूर्वमर्कःप्राह· तथाचमदुक्तेऽप्यत्ययोनकार्यइत्यर्थः।सूर्योक्तमदुक्तयोः
कालमात्रस्यैवभिन्नत्वात्· अथकालनिरूपणं·॥ ॥भूतानामन्तकृत्कालःकालोन्यःकलनात्मकः॥सद्विधास्थू
लसूक्ष्मत्वान्मूर्त्तश्चामूर्त्तउच्यते·१०॥ ॥चिरक्षिप्रादिव्यवहारासाधारणोहेतुःकालः।ननुकालसत्वेकिंप्रमाणं·गग
नकुसुमायमानत्वात्तस्येतिचेत्·न·अयमस्मात्परइतिसन्निकृष्टवृद्धपिंडेविप्रकृष्टबालपिंडापेक्षयापरत्वव्यवहार<
दर्शनादनुमानेनावगतत्वात्·भूतभविष्यद्वर्त्तमानकालादिव्यवहारस्यप्रत्यक्षसिद्धत्वाच्च·अहमस्मिन्कालेनिवसा<
मीत्यनुभवस्तावत्सर्वजनीनः नचासौबाह्येंद्रियकृतः रूपादिहीनत्वात्· नापिमानसः।तार्किकैस्तन्नंगीकारात्·नाप्य
नुमानादिजन्यः।अपरोक्षप्रत्ययत्वात्· अतःसामग्र्यभावेप्यपरोक्षप्रत्ययदर्शनात्साक्षिप्रत्यक्षमितदिक्सोपनिषदा
मन्यते।भारतेपि·प्रहरौघटिकान्यूनौप्रहरौघटिकाधिकौ·सकालःकुतुपोज्ञेयःपितृणांदत्तमक्षयमिति·तार्किकै

अस्सर्वोत्पत्तिमन्निमित्तकारणत्वेनांगीकारात्. स च कालो द्विविधः। एकः केवलः कालोऽन्यः कालकालः तत्र येन प्राणिदे-
३ हादयोऽतीतवर्त्तमानादिरूपेण कल्प्यते स केवलः कालः। तादृशः कालोऽपि उत्पत्तिस्थितिविनाशकारिणा येन कल्प्यते
स कालकालः। स च रामायणे दर्शितः। कालोऽपि कल्प्यते येनेति ॥ अतिश्च भवति स विश्वकृद्विश्वदेहात्मा यो मित्रः काल-
कालो गुणीति. गुणी संसारमोक्षस्थितिबंधहेतुः। कूर्मपुराणेऽपि. अनादिरेष भगवान्कालोऽनन्तोऽजरः परः। सर्वगत्वा-
त्स्वतंत्रत्वात्सर्वात्मत्वान्महेश्वर इति. ननु कालस्यानित्यत्वे प्रलयकालः प्रलयकालोऽतीत इत्यादिकालव्यवहारः प्रल-
ये कथमिति चेत्. न नित्यत्वेऽपि समानः पंथा नित्यत्वेऽपि सूर्यपरिस्पंदाद्युपाधिकृत एतावान्काल इति कालेयत्ताव्यवहारः
कथं प्रलये इति तत्रोपाध्यायभावात्. अथ सत्कार्यवादाभ्युपगमे नोपाधीनां वासनारूपेण सद्भाव इति तर्हि अनित्यत्व-
मपि समानं. नैवैतावता नित्यत्वं. उपाधिस्तु तदनंगीकारात् स च कालः सामान्यविशेषाभ्यां द्विविधः। तस्य चोभयस्येश्वर-
त्वान्नित्यात्कालादुत्पत्तिं। मनुराह। कालं कालविभक्तिं च नक्षत्राणि ग्रहांस्तथा। सृष्टिं ससर्ज चैवैमां स्रष्टुमिच्छन्निमाः
प्रजा इति। तत्र सामान्यो यः कालः स विशेषेष्वनुगतत्वात्तदपेक्षया नित्यो गगत्या निरनुमेयो भूतोत्पत्तिनिमित्तकारण-
मिति तार्किकज्योतिषिकादयः। यथा प्रभवविरतिमध्यस्तानवंध्यानितान्तं विदितपरमतत्वा यत्र ते योगिनोऽपि। तमहमि-
ह निमित्तं विश्वजन्मास्य यानामनुमितमपि वंदे भग्रहैः कालमीशमिति. स च विशेषरूपः कालो द्विविधः। मूर्त्तश्चामूर्त्त २

श्चेति। यतः एकः स्थूलोऽपरः सूक्ष्म इति तत्र मूर्त्तामूर्त्तकालावाह। प्राणादिः कथितो मूर्त्तस्त्रुट्याद्योऽमूर्त्तसंज्ञकः। दशगुर्वक्षरोच्चारणाम
व्यवहितानामुच्चारणपरिमितः कालः प्राणः। उक्तं च सिद्धान्तशिरोमणौ। गुर्वक्षरैः खेन्दुमितैरसुस्तैः षड्भिः पलं तैर्घटिका खषड्भि
रिति। गुर्वक्षरलक्षणं च। सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः। वर्णस्तु गुरुमित्राऽऽहुश्छन्दःशास्त्रविशारदाः॥१॥ स च स्वस्थसु
खासीनपुंसः श्वासोच्छ्वासकालपरिमितो भवति। स्वस्थलक्षणं वैद्यकशास्त्रे उक्तं। समधातुः समाग्निश्च समदोषमलक्रियः।
षड्भिः प्राणैर्विनाडी स्यात्तत्षष्ट्या नाडिका स्मृता।१। नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्त्तितं। तत्त्रिंशता भवेन्मासः सा
वनोऽर्कोदयैस्तथा॥२॥ ऐन्दवस्तिथिभिस्तद्वत्संक्रान्त्या सौर उच्यते। मासैर्द्वादशभिर्वर्षं दिव्यं तदिह उच्यते॥२३॥
सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्। तत्षष्टिः षड्गुणा दिव्यं वर्षमासुरमेव च॥२४॥ २४ २४॥
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते इति। एष मूर्त्तकालः। एष एव स्थूलश्च त्रुट्यादिरमूर्त्तकालः। एष एव सूक्ष्मकालः। उ
क्तं च सिद्धान्तशिरोमणौ। योऽक्ष्णोर्निमेषस्य खरामभागः स तत्परः तच्छतभाग उक्ता॥ त्रुटिर्निमेषैर्धृतिभिः १८ च काष्ठा तत्त्रिं
शता ३० सत्कलकैः कलोक्ता त्रिंशत्कलाभिर्घटिका क्षणः स्यान्नाडीद्वयेनैः खगुणैर्द्युनं च। एतदुक्तं भवति। त्रुटीनां शतेन तत्परः
त्रिंशत्परैर्निमेषः स च नीरोगनेत्रयोर्यावता कालेन पक्ष्मपातो भवति तत्परिमितः। पंचचत्वारिंशता निमेषैः एकः प्राणः॥ ॥
प्राणषट्केनैकापि विनाडी भवति विनाडीनां षष्ट्या एका नाडी स्यात्। षष्टिभिर्नाडीभिरेकं नाक्षत्रमहोरात्रं स्यात्। तच्च यावता का
लेनाश्विन्यादिनक्षत्राणां भ्रमो भवति। तावन्नाक्षत्रं दिनं। यन्नक्षत्रमुदितं पुनस्तन्नक्षत्रोदयपर्य्यन्तेनाक्षत्रेन नक्षत्रसावनमिस

५ र्थः। नक्षत्रस्य गतेः सूक्ष्मत्वात् त्रिंशद्भिरहोरात्रैर्नाक्षत्रो मासः स्यात्। त्रिंशद्भिरर्कोदयैः सावनो मासो भवति। चान्द्रमासस्तु तिथि
भिरेव व्यवह्रियते। स च दर्शाद्दर्शपर्यन्तं यावद्यावत्संख्याको भवति। तावद्भिरेव चान्द्रो मासः स्यात्। संक्रान्तेरपरसंक्रान्ति
पर्यन्तं सौरो मासः। एतैर्मासैर्द्वादशभिस्तद्वर्षं भवति। वर्षमासाहोरात्राणामुत्पत्तिं वक्ष्यामः। तच्च वर्षं दिव्यमहोरात्रं भवति
दिविभवाद्दिव्यास्तेषां। तत्रोत्तरायणं सुराणां दिनमसुराणां निशा। दक्षिणायनं सुराणां रात्रिरसुराणां दिनमिति। त
त्षष्टिस्तेषां दिव्याहोरात्राणां षष्टिः ६० षड्गुणा ३६० षष्ट्यधिकशतत्रयं दिव्यं वर्षं भवति। अथ चतुर्युगप्रमाणमा

तद्द्वादशसहस्राणि चतुर्युगमुदाहृतं। सूर्याब्दसंख्यया द्वित्रिसागरैरयुताहतैः।१५। संध्यासंध्यांशस
हितं विज्ञेयं तच्चतुर्युगं। कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया।१६। युगस्य दशमो भागश्चतुस्त्रिद्व्येक
संगुणः। क्रमात्कृतयुगादीनां षष्ठोंशः संधयः स्वकाः।१७॥

ह। तद्द्वादशसहस्राणि तेषां दिव्यानां द्वादशसहस्राणि चतुर्युगप्रमाणं भवति। द्वित्रिसागरैरयुतगुणितैः सौरा
ब्दाश्चतुर्युगस्य भवंति। अथैतत्प्रमाणं चतुर्युगप्रमाणं भवति। द्वित्रिसागराः ४३२ अयुत १०००० गुणिताः ४३२००००।
विंशतिसहस्राधिकत्रिचत्वारिंशल्लक्षाणि सौराब्दाश्चतुर्युगस्य भवंति। अथैतत्प्रमाणं चतुर्युगस्यैव न भवति। किंतु ४
संध्यासंध्यांशसहितस्य चतुर्युगस्येत्याह।१५। तत्सर्वं तच्चतुर्युगप्रमाणं संध्यासंध्यांशसहितं ज्ञेयं। एषां चतुर्णां कृता
दीनां युगानां व्यवस्था धर्मपादव्यवस्थया ज्ञेया। यथा यत्र चतुःपाद्धर्मः स कृतयुगः। त्रिपादधर्मस्त्रेता। पादद्वयात्मको

धर्मे द्वापरः पादमात्रधर्मे कलिरिति । युगस्य चतुर्युगप्रमाणस्य दशमो भाग एकत्र चतुर्भिरन्यत्र त्रिभिरन्यत्र द्वाभ्या
मन्यत्रैकेन गुणपः सत्क्रमात्कृतादिप्रमाणं भवति । स्वकर्यौल्लीयः षष्ठोंशः संध्ययोः प्रमाणं भवति । तथा च तद्युग
स्य षष्ठः षष्ठोंशस्तत्तद्युगसंध्ययोः प्रमाणं स्यादित्यर्थः एकैकस्य युगस्य द्वे द्वे संध्ये एका पूर्वमपरं ते । तथा च तल्लोमर
षि युगनाम ष्ट संधयो भवंतीति । उक्तं च सिद्धान्तशिरोमणौ । स्वसंध्यकास्तद्दशांशे निजांके २ भागसंमितेः । इत्यादि ।
उक्तं च । संधयः स्युर्मनूनां कृताब्दैः समा आदिमध्यावसाने भुतैर्मित्रितैरित्यादि । उदाहरणं । चतुर्युगप्रमाणस्य ४३२०
००० दशमो भागः ४३२००० एष चतुर्धा स्थापितः एकत्र चतुर्गुणः १७२८००० जातं कृतयुगप्रमाणं । अन्यत्र ४३२०००
त्रिगुणः १२९६००० इदं त्रेताप्रमाणं । अपरत्र ४३२००० द्विगुणः ८६४००० एतद्द्वापरप्रमाणं अन्यत्र ४३२००० एके
गुणः ४३२००० एतत्कलियुगप्रमाणं । कृतयुगस्य १७२८००० षष्ठोंशः २८८००० जातं संधिद्वयमानं एतदर्धितं १
४४००० जातं कृताद्यसंधिमानं । एतावदेव १४४००० अंत्यसंधिमानं मध्यमानं १४४०००० एवं चतुर्युगद्वादशांशः
संधिमानं भवतीति । त्रेतामानस्य १२९६००० द्वादशांशः १०८००० आद्यसंध्यामानमेतावदेवांत्यसंध्या च १०८०००
मध्यमानं १०८०००० एवं द्वापर ८६४००० संधि ७२००० मध्यमानं ७२०००० कलिः ४३२००० संधि ३६००० मानं
युगानां सप्ततिः सैका मन्वंतरमिहोच्यते । कृताब्दसंख्यास्तस्यान्ते संधिः प्रोक्तो जलप्लवः ॥१८॥ ससंधयस्ते मनवः
मनवः कल्पे ते याश्चतुर्दश । कृतप्रमाणः कल्पादौ संधिः पंचदशः स्मृतः ॥१९॥ इत्थं युगसहस्रेण भूतसंहार
हारकारकः । कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती ॥२०॥ परमायुः शतं तस्य तयाहोरात्रसंख्यया ॥ ॥

5 अथ ब्रह्मायुःप्रमाणं॰ एकसप्ततिः ७१ चतुर्युगैरेकमन्वंतरप्रमाणं भवति॰ तस्य मनोरंते कृतयुगमानेन संधिर्भवति॰ ते मनवः क-
ल्पे संधिभिः सह चतुर्दश भवंति॰ कल्पस्यादौ च कृतप्रमाणेनैकः संधिः कथितः तथा चैवं चतुर्दश ससंधयः स्युः एतादृशेन युग-
सहस्रेण कल्पो भवति॰ कल्पशब्देन ब्रह्मणो दिनमुच्यते॰ तस्य ब्रह्मणो रात्रिरपि तावती चतुर्युगसहस्रेणैव कल्पो वा भवति॰
तया ब्राह्म्याहोरात्रसंख्यया पक्षवर्षमासादिकल्पनया शतं वर्षमितं ब्रह्मायुःप्रमाणं भवति॰ उदाहरणं॰ चतुर्युगमानं ४
३२०००००एकसप्तति ७१ गुणं ३०६७२००००जातं एकमन्वंतरसौरवर्षाः कृतमानं १७२८०००पंचदश १५ गुणं २५९२०
०००जातं पंचदशसंधिमानं॰ एतच्चतुर्दशमन्वंतरप्रमाणे ४२९४०८००००युतं ४३२००००००० जातं सौरवर्षैः
कल्पप्रमाणं॰ एतदेव चतुर्युगप्रमाणं ४३२०००० भक्तं १००० जातं चतुर्युगसहस्रपरिमितः कल्पः अयमेव ब्रह्मदि-
नं एतत् ४३२००००००० द्विगुणं ८६४००००००० जातं महोरात्रप्रमाणं एतत् षष्ट्यधिकशतत्रयेण ३६० गुणितं
३११०४००००००००० जातं वर्षप्रमाणं एतत् शत १०० गुणं ३११०४०००००००००००० जातं सौरवर्षैः ब्रह्मणः परमायुःप्र-

आयुषोऽर्द्धगतं तस्य शेषात्कल्पोयमादिमः ॥२१॥ कल्पादस्माच्च मनवः षड् व्यतीताः ससंधयः । वैवस्वतस्य
च मनोर्युगानां त्रिघनो गतः ॥२२॥ अष्टाविंशाद्युगादस्माद्यातमेतत्कृतं युगं । अतः कालं प्रसंख्याय संख्यामेक-
त्र पिंडयेत् ॥२३॥ ग्रहर्क्षदेवदैत्यादि सृजतोस्य चराचरं । कृताद्रिवेदा दिव्याब्दाः शतघ्ना वेधसो गताः ॥२४॥ ॥

माणं॰ अथ वर्त्तमानब्रह्मदिनेगतकालानयनं॰ तस्य ब्रह्मण आयुषोऽर्द्धं पंचाशद्वर्षाणि गतानि॰ शेषादुत्तरार्द्धादादितो- ५
ऽयं कल्पो वर्त्तते॰ अस्मिन्नपि कल्पे संधिभिः सह षण्मनवो गताः॰ वर्त्तमानस्य वैवस्वतमनोः युगानां त्रिघनः त्रयाणां घनः स

प्रविंशतिर्गता· अष्टाविंशतिसंख्याकेस्मिंश्चतुर्युगे कृतं युगं गतं· अत एतत्कालसंख्यामेकत्र कुर्यात्· ग्रहादिकं सृ[illegible]
जतो ब्रह्मणः शतगुणाः कृताद्विवेदाद्दिव्याब्दाः ४७४०० चतुःशताधिकसप्तचत्वारिंशत्सहस्रवर्षाणि गतानि· अथ
ग्रहाणां गतिभगणादिप्रमाणं चाह चतुर्भिः।१। ग्रहाणां पश्चाद्गतिः सकललोकप्रसिद्धा· ननु खे भ्रमतां ग्रहाणां दैनंदि
पश्चाद्व्रजंतोतिजवान्नक्षत्रैः सततं ग्रहाः। जीयमानास्तु लंबंते तुल्यमेव स्वमार्गगाः।२५। प्राग्गतित्वमत
स्तेषां भगणैः प्रत्यहं गतिः। परिणाहवशाद्भिन्ना तद्वशाद्भानि भुंजते।२६। शीघ्रगस्तान्यथाल्पेन कालेन
महताल्पगः। तेषां तु परिवर्त्तेन पौष्णांते भगणः स्मृतः।२७। विकलानां कला षष्ट्या तत्षष्ट्या भाग उच्य
ते· तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते·।२८॥ ॥ ॥ ॥ ॥ ॥ ॥
नोदयास्तमयवशात्· प्राग्गतित्वं दृश्यते· उच्यते सा गतिर्येन भवति प्रवाहप्रेरितं सग्रहतारकं प्रत्यक् भ्रमति ज्योर
तिश्चक्रं तत्रस्थो ग्रहः कुलालचक्रे कीटन्यायेन प्रत्यक्चलतीव दृश्यते· वस्तुतः प्राग्गतित्वमेव· एवं प्राक्यायिनो ग्र
हाः स्वमार्गे स्वस्वकक्षायां योजनानि स्वस्वकक्षायामन्योपि ग्रहो गच्छति· अतो योजनगत्या सर्वे तुल्यगतयः भगणे
मेषादिद्वादशराशिभिः छत्रशलाकावदुपर्युपरि भ्रमंति तस्य परिणाहवशात्तत्र गच्छतां ग्रहाणां प्रत्यहमेकदि
नसंबंधिनी कलागतिर्भिन्ना न्यूनाधिकत्वात्तन्न्यूनाधिकगतिवशात्ते ग्रहाः भानि राशीन् भुंजते· अतिशीघ्रं पश्चिम
दिशं यांतो ग्रहा नक्षत्रैरश्विन्यादिभिर्जीयमाना लंबंते पूर्वदिशं गच्छंति· यतश्चंद्रः पूर्वदिनेऽश्विन्यां दृष्टः स एवा

6 ऽश्विन्यादिनेभरण्यंतं दृश्यते ऽश्विनीतदपेत्यापश्चिमदिशंगता· यतो ग्रहाणां प्राग्गतित्वं सिद्धं· ग्रहाः प्रागेव गच्छंतीत्यर्थः। उक्तं च
सिद्धांतशिरोमणौ· यांतोभचक्रे लघुपूर्वगत्या खेटास्तु तस्यापरशीघ्रगत्या· कुलालचक्रभ्रमवामगत्या यांतो न कीटा इव भांति
यांत इति· ते च स्वे स्वे मार्गे ति निम्नोन्नते यांति तेषां च गतिः स्वकल्पे च सर्वेषां ग्रहाणां· सा च गतिर्दिनं भगणेनैतत्र गणैः समा
ऽपि परिणाहवशात्कक्षावशात्· अतिग्रहं भिन्ना भवति कस्य चिन्मंदा कस्य चिच्छीघ्रा भवति· कक्षावस्थिति तद्वशात्परि
णाहवशात्· नक्षत्राणि अल्पाधिककालेभुंजते· तदेवाह· शीघ्रगतिस्त्विति· शीघ्रगतिर्ग्रहो नक्षत्रमल्पेन कालेन मं
दगतिर्महता कालेन भुंक्ते· तेषां ग्रहाणां परिवर्त्तनाश्विन्यादिरेवत्यंतगमने नैको भगणो भवति· विकलाभिः षष्टिभिरे
का कला भवति· षष्टिकलाभिरेको भागो ऽशः स्यात्· त्रिंशद्भिरंशै राशिर्भवति· राशिद्वादशकेनैको भगणो भवति· अथ यु
गे सूर्यादिग्रहशीघ्रोच्चचंद्रमंदोच्चपातभगणानाह·॥
युगे सूर्यज्ञशुक्राणां खचतुष्करदार्णवाः। कुजार्किगुरुशीघ्राणां भगणाः पूर्वयायिनां॥२९॥ इंदो रसाग्नित्रि
त्रीषुसप्तभूधरमार्गणाः। दस्रत्र्यष्टरसांकाक्षिलोचनानि कुजस्य च॥३०॥ बुधशीघ्रस्य शून्यर्तुखाद्रित्र्यंकनगें
दवः। बृहस्पतेः खदस्राक्षिवेदषड्वह्नयस्तथा·॥३१॥ सितशीघ्रस्य षट्सप्तत्रियमाश्विखभूधराः। शनेर्भु
जंगषट्पंचरसवेदनिशाकराः॥३२॥ चंद्रोच्च [illegible] स्य नंदाजावसुसर्पार्णवा युगे। वामं पातस्य वस्व ६
ग्निद्वियमाश्विशिखिबाहवः॥ श्रीरामो जयति·

॥ चतुर्युगे सर्वोक्ते प्रमाणे सूर्य्यस्य खचतुष्करदार्णवाः ४३२०००० सूर्य्यस्य भगणा भवंति · बुधशुक्रयोरप्येत एव भगणाः ४३२०००० भौमगुरुशनिशीघ्रोच्चानामप्येत एव भगणाः ४३२०००० चंद्रस्य ५७७५३३३६ भौमस्य २२९६८३२ बुधस्य शीघ्रोच्चस्य १७९३७०६० गुरोः ३६४२२० शुक्रशीघ्रोच्चस्य ७०२२३७६ शनेः १४६५६८ चंद्रमंदोच्चस्य ४८८२०३ एते भगणाः सर्वेषां ग्रहाणां प्रोक्ताः · चंद्रपातस्य भगणा वामं पश्चाद्गत्या भवंति ते च २३२२३८ तथा च पातः पश्चाद्गतिरित्यर्थः ॥ अत्रोपपत्तिः शास्त्रस्य प्रामाण्यमेव · अथ युगे भूदिनानि ॥

उदयादुदयं भानोर्भूमिसावनवासराः ॥ वसुद्व्यष्टाद्रिरूपांकसप्ताद्रितिथयो युगे ॥२४॥ ॥ ॥

सूर्य्यस्यैकस्मादुदयादन्योदयपर्य्यंतं भूमिसावनदिनं भवति · सूर्य्योदयोर्द्वयोरंतरालः कालो भूदिनप्रमाणमित्यर्थः ॥ तानि च युगे १५७७९१७८२८ भूदिनान्येव चतुर्युगाहर्गणप्रमाणं · अथ युगे नाक्षत्रदिनानि · १५८२२३७८२८ अत्रोपपत्तिः सूर्य्यः स्वाधिष्ठितनक्षत्रेण सह प्रतिदिनं तत्तन्नक्षत्रं षष्टिभिर्नाक्षत्रघटीभिरुदयं याति · सूर्य्यस्तु सर्वस्मादग्रिमेंऽशे स्वगत्या गत्वा सर्वतो याति · तत्रानुपातः यदि सूर्य्याधिष्ठितोदयाद्यावत् षष्टिर्नाक्षत्रघट्यः सर्वे तेन राशिषट्कान्ताग्रिमांशगतस्यार्कस्योदयः किमधिकैरिति · तथा च स्वगतिकलाभ्यः सूर्याधिष्ठितराशिप्राणगुणाभ्यः खखाष्टैक १८०० हृताभ्यो यल्लब्धं तत्तुल्यैरसुभिरधिकाभिः षष्टिघटीभिरर्क उदेति · तथा च लब्धासुभिरधिकाः षष्टिर्नाक्षत्र

घघ्रः सूर्य्यसावनाहोरात्रप्रमाणं स्यात्. यथा. स्फुटोऽर्कः २।२५।१९।१८ स्पष्टगतिः ५६।५२ एषा सूर्याधिष्ठितकंपिलायां मि
7 थुनप्रमाणं ३०३ असुगुणित १८१८ जाताः असवः मिथुनराशिप्राणैः १८१८ गुणिता १७७३८३।३६ राशिकलाभिः १८००
भक्तालब्धा असवः ५७ एवं लब्धासुभिर्नाक्षत्रोदयानंतरं रविरुदेति. तथा च. सूर्य्यसावनाहोरात्रप्रमाणं. यथा. ६०।
५७ जाते। गतेः प्रतिदिनं भिन्नाकारत्वात्स्वोदयस्यापि प्रतिमासमन्याहक्त्वाच्च सावनाहोरात्रं प्रतिदिनं भिन्नं यत्तु नः
घटीषष्ट्या मध्यमभुक्तितुल्यासुयुतया ६०।५९।८ सावनं द्युरात्रमुच्यते तन्मध्यमं. अष्टांते मध्यमस्फुटसावनदिना
नां तुल्यत्वात्. गतीनामुदयानां च क्रासष्टयोस्तुल्यत्वात्. एवं चाऽष्टांते रविश्चक्रकलाश्चाक्रामति. तथा च. सूर्य्येण
यावत्यः कलाश्चाक्रांतास्तावंत एव सावनात्त्रदिनेभ्योऽधिका भवंति. तथा च चक्रकलासमाः सूनोमेकं दिनमधि
कं भवति. अतएवैकाष्टांते यावंतो भभ्रमास्तद्दिने कन्यूनाः सावनदिनानि स्युः (यथा भभ्रमा १५८२२३७८२८ सौरा
ष्ट ४३२०००० हृता लब्धं नाक्षत्राष्टप्रमाणं ३६६।१५।३१।३१ भदिनानि १५७७९१७८ [illegible] सौराष्टौ ४३२०००० हृतानि
लब्धं सौरसावनाष्टप्रमाणं ३६५।१५।३१।३१ भवर्षमाने ३६६। एकचक्रभ्रमोनं ३६५ जातं तदेव सौरसावनाष्टप्र(
माणं. एवं चन्द्रादीनामपि स्वस्वोदयप्राणगुणितगतेः खखाष्टैको १८०० हृतासुभिरधिकं चांद्रसावनादिदिनंका ७
र्य्यं. एतस्य स्पष्टाधिकारे वक्ष्यति. सिद्धांतशिरोमणौ. समंभसूर्यावुदितौ किलादौ षष्ट्या घटीनामुदितं पुनर्भं. र

विलतः स्वोदयभुक्तिघातात्खाभ्राष्टभूलब्धसमासुभिश्च । समागतासुसंयुतारवेस्तु षष्टिनाडिकाः स्फुटं द्युरात्रभुक्तिमा
द्युभुक्तितश्चतच्चलं । षष्ट्या घटी नाम दिनं सदा स्यात्तद्भुक्तितुल्यासुयुतं खराशेः । स्यान्मध्यमं सावनमेवमिष्टं तत्संख्यका
मध्यमतो निरेकेति । अथ युगे चांद्रदिनानि ॥

चांद्राः खाष्टखखव्योमखाग्निखर्तुनिशाकराः ॥

चांद्रदिनानि १६०३०००००८० अत्रोपपत्तिः । पूर्वयायिनोरर्कचंद्रयोः शीघ्रगतिश्चन्द्रः सूर्याद्वियुज्य यावता कालेन पुनः
पूर्वयुतिस्थानमेति तावच्चान्द्रं चक्रं तावल्लि जगत्याग्रतो गतमर्कं यावता कालेन पुनर्युनक्ति तावांश्चांद्रो मासः । ते च युगे
सूर्यचंद्रभगणयोरंतरपरिमिता भवंति । सूर्येन्दुभगणांतरमित्यस्य वक्ष्यमाणत्वात् । ५३४३३३३६ एते त्रिंशद्गुणा जा
ताश्चांद्रवासराः १६०३०००००८० अथ युगेऽधिमासाः ॥ ॥षड्द्विक्त्रिकृताग्निकतिथयश्चाधिमासकाः ॥३५॥
एतेऽधिमासाः १५९३३३६ अत्रोपपत्तिः । चंद्रो दर्शांते रविणा संयुज्यते । ततो द्वावपि पूर्वतो गच्छतः । तयोश्चन्द्रः शीघ्रगतित्वा
त् प्रत्यहं गत्यंतरेणाग्रतो याति । एवं गच्छंश्चक्रकलातुल्यमंतरं यदाग्रतो याति । तदा रविणा योगमेति । तयोः कालयोरंतरं
चांद्रमासः यथा । सूर्यगतिः ५९।८।१०।२७ चंद्रगतिः ७९०।३५।१।३ अंतरं ७३१।२६।४२।२६ एभिर्गत्यंतरकलाभिरेकं चां
द्रमेकं दिनं लभ्यते तच्चक्रकलाभिः किमिति । चक्रकला २१६०० गत्यंतर ७३१।२६।४२।२६ हृताः लब्धं चांद्रमाससप्रमाणं

४ २९।३१।५०।०।६ अधिमासाः १५९३३३६ द्वादशहृताः लब्धेन १३२७७८ युगाब्दाः ४३२०००० एकजातीयत्वाद्यु
ताः जातश्चांद्रवर्षप्रमाणं ४४५२७७८ एभिर्भूदिनानि १५७७९१७८२८ भक्तानि तानि जातं चांद्रसावनवर्षप्र
माणं ३५४।२२।१ अस्योपपत्तिः अथ चांद्रवर्षानयनं चांद्रदिनानि १६०२०००००८० सौराब्दैः ४३२००००
भक्तानि जातं चंद्रवर्षप्रमाणं ३७१।३।५३।२४ एतदेव द्वादशहृतं ३०।५५।१९।३७ जातं चांद्रमासप्रमाणं यावंति
जगत्यर्कश्चक्रमप्यर्येति तावत्सौरा द्वादशमासाः सावयवा भवंति यथा सौरसावनाब्दप्रमाणं ३६५।१५।३१
३०।२४ अस्य द्वादशभागः ३०।२६।१७।३७ जातं भूमिदिनैः सौरमासप्रमाणं अथाधिमासोपपत्तिः सौर
मासाच्चांद्रमासस्याल्पत्वाद्युगे सौरमाससंख्यायाश्चांद्रमाससंख्याधिका भवति तथा चार्कमासेभ्य
श्चांद्रमासाः साधिकैकादशदिनैरधिका भवन्ति ११।०।३।५३।२४ तथा चार्कमासेभ्यश्चान्द्रमासा यावद्भि
रधिकास्तेऽधिमासा भवंति यथा सौरमासः ३०।२६।१७।३७ चांद्रमासो २९।३१।५०।६।३०।०।५४।३७
३१ अनेन सावर्णितेन १९६०५१ चांद्रमास २९।३१।५०।६ सवर्णितो ६३७८६०६ भक्तः ३२।१६।३१ ८
५५ लब्धैः सौरमासादिभिः रेकश्चान्द्रोऽधिमासो भवति चैत्रशुक्लप्रतिपदि यदा मेषादिगताव

केचंद्रैदिनमासादीनां चैकदा प्रवृत्तिः। तत्र दर्शान्तं यावच्चान्द्रो मासः सूर्य्यंते सौरश्च मध्यमा
र्केवृषं याते सूर्यते तत्रैतन्मासद्वयं साधिकचतुःपंचाशत्कलान्तरेण भवति· एवमग्रिमदर्शां
ते द्वितीयश्चान्द्रो मासः सूर्यते· मध्यमार्के च मिथुनं गते द्वितीयः सौरमासः पूर्णो भवति तत्र य
दंतरं द्विगुणं भवति· एवमग्रेपि दर्शान्तादग्रतोऽग्रतस्तेनैवांतरेण सौरमासा भवन्ति· तथा
चाग्रतो यात्यर्कसंक्रांतिर्यदा पुनर्दर्शान्तमेति· तदैकश्चान्द्रो मासः सौरमासेभ्योऽधिको
भवति· ततश्च यदि साधिकद्वात्रिंशत्सौरमासैरेकश्चान्द्रोऽधिमासः प्राप्यते· तदा युगसौ
रमासैः कियंतश्चान्द्राधिमासा भवंति· अनुपातः। यथा। रविमासाः ५१८४००००

९ सावर्त्तिताः ५५९८९२००००००० एकाधिकमाससंयुक्त्या । ३२।२६। ३।५४ सावर्त्तितया ३५१३८
३४ भक्ताः फलं युगाधिमासाः १५९३३३६ एवं यदि साधिकत्रिंशद्भूदिनैरेकः सौरो
मासस्तदा युगभूदिनैः कियन्त इति । यथा भूदिनानि १५७७९१७८२८ सावर्त्तितानि २०
४४९८२५०५००८००००० सौरमासेन ३०।२६।१७।३१।३० सावर्त्तितेन ३९४४१९४५०
भक्तानि लब्धा युगभूदिनैः कियन्त इति । यथा । सौरमासा ५१८४०००० एवं सावयवैरूनत्रिं
शद्भूदिनैर्यद्येकश्चान्द्रमासस्तदा युगभूदिनैः कियंत इति । यथा । भूदिनानि १५७७९
१७८२८ सावर्त्तितानि २०४४९८२५०५००८००००० चान्द्रमासेन २९।३१। ९
५०।६।३० सावर्त्तितेन २८३५१६३९० भक्तानि लब्धा युगचान्द्रमासाः ५३४३३३३६ ॥

॥अथावमाः॥ तिथिक्षयावमास्तानि ह्यब्दब्धीमहाराश्विनः।२६। युगेऽवमाः २५०८२२५२ अ
त्रोपपत्तिः सावनमासः ३०।०० चांद्रमासो २९।३१।५०।०६ नितः ००।२८।०९।५४ तत्र सावनमासचां
द्रमासांतरेण सावनेन ०।२८।०९।५४ त्रिंशद्दिनानि लभ्यंते तदा परिपूर्णेनावमेन कियंतीति य
था तरेण ०।२८।०९।५४ सावर्णितेन २०२२९४ सावर्णितात्रिंशत् ६७८०००० भक्ताः फलं ६३।
५७।३२ एवं साधिकत्रिषष्ठिदिनैरेकोऽवमो लभ्यते इति अथवा गत्यंतरेणैकं चांद्रमहर्दिनं
लभ्यते तथा च गत्यंतरहृतायां तिथिभुक्तौ चांद्रदिनप्रमाणं लभ्यते यथा तिथिभुक्तिः ७२० सा
वर्णिता २५५५२०००० गत्यंतरेण ७३।१२।२६।४१।२६ सावर्णितेन २५७९९२२७६ भक्ता लब्धं चां
द्रदिनप्रमाणं ५९।०३।४०।२२ सावनदिनचांद्रदिनयोरंतरं ५८।२९।४८ अवमभुक्तिः कल्यादौ
अर्कोदये सावनचांद्रदिनयोरेकदैव प्रवृत्तौ सत्यां साधिकेकोनषष्ठिघटीष्वतीतासु चांद्रदि
नं समाप्तं सावनं पुनः पूर्णं षष्ठिघटीष्विति तयोरंतरमवमभुक्तिः ५८।२९।४८ अनुपातांतरं य
दि साधिकषट्पंचाशद्विकलाभिरेकं दिनं लभ्यते तदा परिपूर्णावमेन कियंति दिनानीति य
था दिनावमभुक्त्या ५८।२९।४८ सवर्णितया २०२७०८ सावनषष्ठिघट्यः ६० सावर्णिता १२९६
०००० भक्ताः फलं ६३।५७।३६ यदि साधिकत्रिषष्ठिदिनैरेकोऽवमो लभ्यते तदा युगचांद्रदि

नैः कियंतइति यथा युगचांद्रदिनानि १६०३०००००८० सावनानि तानि ५७७१०८००२८८०००साधि
10 कानि षष्ट्याप्ताः ३१५४१३८ सवर्णितयार २३७००७ दमलानि फलं २५०८२२५२ अवमा इति सर्वमुपपन्नं
। अत्र सौरचांद्रांतरमधिमासाः सावनचांद्रांतरं तु याहाः । उक्तंच श्रीधरेण मलो दर्शावधिश्चांद्र म
सोहि मासः सौरस्तु संक्रांत्यवधिर्यतोऽतः । दर्शाग्रतः संक्रमकालतः प्राक् सदैव तिष्ठत्यधि
मासशेषं । १ । दर्शांततो यात तिथि प्रमाणैः सौरैस्तु सौराः दिवसाः समेताः । यतो धिशेषो त्यादि
नाधिकास्ते तस्त्ववस्त्र दस्मा दधिमासशेषः । २ । तिथ्यं तत्सूर्योदययोस्तु मध्ये तथैव तिष्ठत्यवमाव
शेषं । यत्केन ते नोदयकालिकः स्यात्तिथ्यंतकाले द्युगलोन्यथा तः । ३ । ॥ अथ सूर्यादि दिनानि । दि
॥ ॥ भोदयाभगणैः स्वैः स्वैरूनास्तत्सोदयायुगे ॥ ॥ मानाम ष्टार्वीत्यादि नो का ।
भोदया यस्य भगणैरूनाः कियंतेतस्यैव भूदिनानि भवेयुः । यथा भोदयाः १५८२२३७८२८ सूर्यभ
गणैः ४३२०००० रूनाः जाताः सूर्यस्य सावनवासराः १५७७९१७८२८ एतदेव भूदिनपदेनोक्तं ते
। एवं चंद्रस्य सावनदिनानि १५२३३३६३३६ भौमस्य १५७७२९४०९९६ बुधशीघ्रस्य १५६४२९०७६८
गुरोः १५८२९७३६०८ शुक्रशीघ्रस्य १५७५२१५४५२ शनेः १५८२०८९२८० एवं मंदोच्चपाता
नामपि कर्त्तव्यानि अत्रोपपत्तिः सर्वोक्ताः युगाद्याः सौराः तत्रार्कः प्रत्यहं स्वगत्या चक्रमाक्रमति ।
भोदयस्तु प्रतिदिनं चक्रमाक्रमतीति सौरवर्षे यावंतो भोदयभ्रमास्त एव चक्रभ्रमोनाः सूर्यसावना [illegible]

निस्युरिति अथ चांद्रमासाः॥ ॥भवंति चान्द्रिनो मासाः सूर्येन्दुभगणान्तरं।३७॥
सूर्यभगणचंद्रभगणयोरंतरं।युगे चांद्रमासाः स्युः यथा सूर्यभगणाः ४३२०००० चंद्रभगणयोः
५७७५३३३६ रंतरं ५३४३३३३६ जाताश्चांद्रमासाः अथाधिमासावमाः॥ ॥रवि
मासोनितास्ते त्वशेषाः स्युरधिमासकाः।सावनाहानि चांद्रेभ्यो द्युभ्यः प्रोह्य तिथिक्षयाः।३८।
चांद्रमासा रविमासैरूनाः शेषमधिमासाः भवेयुः चांद्रदिनानि भूदिनानि शेषमवमाः स्युः।
यथा चांद्रमासाः ५३४३३३३६ रविमासैः ५१८४०००० ऊनाः १५९३३३६ जाता अधिमासाः चां
द्रदिनानि १६०३०००००८० भूदिनैः १५७७९१७८२८ ऊनानि २५०८२२५२ जाता अवमाः।अत्रोपप
त्तिः।अथ कल्पे भगणादयः॥ ॥अधिमासोनरात्र्यर्क्षचांद्रसावनवासराः।एते स
हस्रगुणिताः कल्पे स्युर्भगणादयः।३९ भगाः सहस्रगुणिताः कल्पगताः स्युः।यथा युगार्कभग भगणादयः
णाः ४३२०००० सहस्रगुणिताः ४३२०००००००० जाताः कल्पेऽर्कभगणाः एवं चंद्रस्य ५७७५३३३६०००
भौमस्य २२९६८३२००० बुधशीघ्रस्य १७९३७०६०००० गुरोः ३६४२२०००० शुक्रशीघ्रस्य ७०२२
३७६००० शनेः १४६५६८००० चंद्रोच्चस्य ४८८२०३००० चंद्रपातस्य २३२२३८००० भूदिनानि।
१५७७९१७८२८००० भोदयाः १५८२२३७८२८००० चांद्रवासराः १६०३०००००८०००० अधिमासाः
१५९३३३६००० अवमाः २५०८२२५२००० ।अथ कल्पे मंदोच्चपातभगणाः॥ ॥प्राग्गतेः

सूर्यमंदस्य कल्पेसप्ताष्टवह्नयः । कौजस्य वेदखयमा बौधस्याष्टर्तुवह्नयः ।४०। खखरंध्राणि जीवस्य
शौक्रस्याष्टगुणेषवः । गोग्नयः शनिमंदस्य पातानामथवामतः ।४१। मनुदस्रास्तु कौजस्य बौधस्या
ष्टाष्टसागराः । कृताद्रिचंद्रा जीवस्य त्रिखांकानि भृगोस्तथा ।४२। शनिपातस्य भगणाः कल्पेय
मरसर्तवः । भगणाः पूर्वमेवात्र प्रोक्ताश्चंद्रोच्चपातयोः ।४३।। ।।सूर्यस्य मंदोच्च भगणाः ३८७ भौ
मस्य २०४ बुधस्य ३६८ गुरोः ९०० शुक्रस्य ५३५ शनेः ३९ एते प्राग्गतयः पातभगणा वामतः । पश्चाद्ग
तय इत्यर्थः कल्पे भौमस्य पातभगणाः २१४ बुधपातस्य ४८८ गुरोः १७४ शुक्रस्य ९०३ शनेः ६६२।
अथ सृष्ट्यारंभगतकालानयनं ।। ।।षण्मनूनां तु संपीड्य कालं तत्संधिभिः सह । कल्पादि
संधिना सार्द्धं वैवस्वतमनोस्तथा ।४४। युगानां त्रिघनं यातं तथा कृतयुगं त्विदं । प्रोज्झ्य सृष्टेस्ततः
कालं पूर्वोक्तं दिव्यसंख्यया ।४५। सूर्याब्दसंख्यया ज्ञेयाः कृतस्यांते गता अमी । अतऊर्द्धममी यु
क्ता गतकालाब्दसंख्यया ।४६।। ।।अत्रोदाहरणे नैव व्याख्या । चतुर्युगानामेकसप्ततिरेको
मनुर्भवति तथा च षण्मनूनामतीतत्वात् एकसप्ततिः ७१ षड्भिर्गुणिता ४२६ जाता षण्मनू
नां युगानि सप्तममनोः सप्तविंशतियुगान्यतीतानि अतः षण्मनुयुगसंख्या ४२६ सप्तविंश
तियुता ४५३ ततोनया युगसंख्यया चतुर्युगसंख्या ४३२०००० गुणिता १९५६९६००००
चतुःखाब्धियमाश्विनिशररंध्रनिशाकराः १९५३७२००००=४

जाताः सौराब्दाः ततः सप्तसंधीनां गतत्वात्संधिसंख्या १७२८००० सप्तगुणा १२०९६००० जाताः
सप्तसंध्यब्दाः एभिरब्दाः १९५६९६०००० युताः १९६९०५६००० ततो गतकृतयुग १७२८०००
त्रेता १२९६००० द्वापरे ८६४००० युताः जातं १९७२९४४००० अस्मिन्मध्ये स्वएककाल १७०६
४००० हीनं जातं १९५५८८०००० ततो गतकलि ४९७२ युताः १९५५८८४९७२ जाता गताब्दाः
अथाहर्गणानयनं ॥ ॥मासीकृता युता मासैर्मधुशुक्लादिभिर्गतैः । पृथक्स्था
स्तेऽधिमासघ्नाः सूर्यमासविभाजिताः ।४७। लब्धाधिमासकैर्युक्ता दिनीकृत्य दिनान्विताः
। द्विस्थास्तिथिक्षयाभ्यस्ताश्चांद्रवासरभाजिताः ।४८। लब्धोनरात्रिरहिता लंकायामार्धरात्रि
कः । सावनो द्युगणः सूर्याद्दिनमासाब्दपास्ततः ।४९। सप्तभिः क्षयितः शेषो विज्ञेयो वासरेश्व
रः ॥ ॥गतसौराब्दा मासाः कार्याः द्वादशभिर्गुण्या इत्यर्थः द्वादशमासात्मकत्वादब्दस्येत
तश्चैत्रशुक्लप्रतिपदमारभ्य ये गता मासास्ते योज्याः एकजातीयत्वात् ततो जातास्ते सौरमा
साः स्थानद्वये स्थाप्याः ततः एकत्र युगाधिमासैर्गुण्याः युगसूर्यमासैर्विभज्य लब्धैर्गताधि
मासैरन्यत्र योज्यास्ते चांद्रमासाः स्युः ततस्ते दिनीकार्याः त्रिंशता संगुण्या इत्यर्थः ततश्चैत्रशुक्लप्र
तिपदमारभ्य गततिथिभिर्योज्याः स चांद्रोऽहर्गणः स्यात् ततः स्थानद्वये स्थाप्यः एकत्र युगावमैः सं

12 गुणेप युगचांद्रवासरैर्विभज्य लब्धैर्गतावमैरन्यत्रोनो लंकायामर्द्धरात्रिकालीनः सौरसावनो मध्य
मोऽहर्गणः स्यात् समस्तग्रमि विभज्य शेषे सूर्यादारभ्य दिनपतिर्गणनीयः। उदाहरणं स्व छिगता
ब्दाः १९५५८८४६१२ द्वादशघ्ना १२ गुणिताः २२४७०६१६०७६ जाताः सौरमासाः एते मासस्त्रयुताः
२२४७०६१६०७९ एते द्विःस्थापिताः। एकत्र युगाधिमासैः १५९३३३६ गुणिताः ३५९६५७१५४०
८४९५५७४ युगसूर्यमासैः ५१८४०००० भक्ताः लब्धागताधिमासाः ६९२१२८४५९ शेषं ३२६६५४४
लब्धाधिमासैः ६९२१२८४५९ द्वितीयस्थाने स्थापितो को २२४७०६१६०७९ युतः जाताश्चांद्रमासाः
२३१६२००००६१६ ततस्त्रिंशता ३० गुणिताः ६९४८६००२०२८० जातानि दिनानि गत १५ दिन युतानि जात
चांद्रोऽहर्गणः ६९४८६००२०२९५ एष द्विःस्थापितः एकत्र युगावमैः २५०८२२५२ संगुणेपः १६२०३६
२५७२०५६४२०४३४० युगचांद्रदिनैः १६०३०००००८० विभज्य लब्धानि गतावमदिनानि १०९४६६६
२६ शेषं २०४९६६२६० अवमैः १०९४६६६२६ रन्यत्र ६९४८६००२०२९५ ऊनीकृते जातो लंका
यामर्द्धरात्रिकालीनः सौरसावनोऽहर्गणः ६८४०४००३५६९ वारार्थमेकेनाहर्गणो ऊनः एषः स
प्तभक्ते शेषे ३ सूर्यवारादगणनया बहून् पंचदशाश्वतेमितशकस्यापाढशुक्लपूर्णिमायां भौमो दिनपतिर्लब्धः।
॥मासाब्द दिनसंख्याप्तं द्वित्रिघ्नं रूपसंयुतं। सप्तोद्धृता
अथ मासवर्षपयोरानयनं॥ १२

पूर्वा० ४८४५ संवत् १९२९

वशेषोतु विज्ञेयौ मासवर्षपौ ।५०॥ ॥अहर्गणात् मासदिनैरब्ददिनैश्च भागो यल्लब्धं तत्क्रमेण
द्विघ्नं त्रिगुणं कार्यं ततएकयुतं कृत्वा सप्तभिः शेषिते मासपवर्षपौ भवतः यथा अहर्गणात् १२४४०.४
००३५६८ मासदिनैः ३० लब्धं ४२२८१३०४६६१८५ द्विगुणिते ८४७६२६९३३७५७० रूपयुते ८४७६२६९३३७५७१
सप्तशेषिते ० एतन्निर्मासपः । अथ वर्षपः ॥ अहर्गणो १२४४०४००३५६८५ वदिनैः ३८० भक्तो लब्धं
५५८४४५५५६५ त्रिघ्नं १६७५३३६६९५ रूपयुतं १६७५३३६६९६ सप्तशेषितं ४ जातो बुधोऽब्दपतिः
अत्रोपपत्तिः । सौराब्दानां मासकरणाय द्वादशगुणको मासादीनां दिनीकरणाय त्रिंशद्गुणकः ननु
लब्धाधिमासकैर्युक्ताः स्वत्राधिमासानां चान्द्रत्वात्सौरमासेषु योगोऽनुपपन्नो भिन्नजातीयत्वादिति
चेत सत्यं चान्द्रमासानां सौरत्वेन परिग्रहणात् । २ । प्रासौरकयोगान् यथानुपपत्त्या नत्वधीकरणात्
प्रासौरकेरवात्र प्रमाणत्वात् अतएवाधिमासावमशेषाहादिन घट्यादिकं न गण्यते अन्यथानुपातस्य
सावयवत्वेनाधिमासावमशेषाहादिनादिगणत्यमेवस्यात् अत्र पुनः कल्पनयायोगकृते तच्छेषमवि
वानां द्विर्गहणं स्यात् उक्तं च सिद्धान्तशिरोमणौ दर्शविधिश्चान्द्रमसो हिमांशुः सौरस्तु संक्रान्त्यवधिर्य
तोतः । दर्शागतः संक्रमकालतः प्राक्सदैव तिष्ठत्यधिमासशेषं ॥ दर्शांतितीयात तिथिप्रमाणैः सौर
स्तु सौरा दिवसाः समेताः । यतो धिशेषोस्य दिनाधिकास्ते स्मात्तदस्मादधिमासशेष इति । यदि युगसौ

रदिनैर्युगाधिमासाः प्राप्यंते तदा वर्त्तमानकालीन सौरदिनैः कियंत इति ॥ त्रैराशिकं फलं वर्त्तमान
13 कालीनाश्चांद्राधिमासाः अथावमशेषत्यागकारणमुच्यते उक्तंच तिथ्यंत सूर्योदययोस्तु मध्ये स
देव तिष्ठत्सु निजावमावशेषे। त्यक्तेन तेनोदयकालिकः स्यात्तिथ्यंतकाले द्युगणोन्यथातः इति एवं
युगचांद्रदिनैर्यदि युगावमास्तदाभीष्टचांद्रैः कियंत इत्यपि अधिमासानां सौरचांद्रांतर्गतत्वात्
सौराणां चांद्रीकरणार्थमधिमासयोगः चांद्राणां सावनीकरणायावमैर्वियोगः अवमानां सावन
चांद्रांतरस्थत्वात् एवं चांद्रा अर्कसावनदिवसाः स्युः ॥ उक्तंच सौरेभ्यः साधितास्ते चेदधिमासा
स्तदैव वा। चेच्चांद्रेभ्यस्तदा सौरास्तच्छेषं तच्छ्यात्तथेति सच्छ्रा दोः सूर्यवारस्य जातत्वात्तदादिगण
न मितिसर्वमुपपन्नं ॥ अथ ग्रहानयनं ॥ ॥ यथा स्वभगणाभ्यस्तो दिनराशिः
कुवासरैः। विभाजितो मध्यगतो भगणादिर्ग्रहो भवेत्। ५१। एवं स्वशीघ्रमंदोच्चा ये प्रोक्ताः स्वर्वया
पिनः। विलोमगतयः पातास्तद्वच्चक्राद्विशोधिताः। ५२॥ ॥ अहर्गणः स्वस्वभगणेन गुणनी
यो भूदिनैर्भाज्यो लब्धं भगणादि मध्यमो ग्रहः स्यात् एवमानीताः पाताश्चक्राद्विशोध्याः। उदाहरणं। अ
हर्गणः ७१४४०४०० ३५६८ सूर्यभगणैः ४३२०००० गुणिताः २०८६२२५२८५४०३६०००० भूदिनैः १५७७
९१७८२८ भक्ताः लब्धाः सूर्यभगणाः १९५५८८८४६१२ शेषस्यावलीति संज्ञा ११५२०६९५६ शेषं
जीवदंतोकांकाशोधिनी परिभाषा। यथा। गुण्येगुणेन वहुते पाशे शेषघाते नं दाहते भवतिवः व १३

रिशेषराशिः घातेन गुण्यगुणयोर्नवशेषविते न साम्येन तस्य निगदेत् इति तस्य शुद्धिं। यथात्र गुण्यो
हर्गणो १२४०४००३५६८ कः ८ शेषितः ८ तथा गुणकोर्कभगणाः ४३२०००० कं र शेषितः ०
शेषयोः ८।०० घातः शून्येन गुणितं तत् शून्यमेव। तथा गुण्यगुणयोर्घातो ५३०८६२२५२९५४१३
७६०००० नवशेषितः ०० अस्य गुण्यगुणकशेषघातशेषे ०० समानत्वाज्ज्ञाता शुद्धिः। अथ भा
गहारे शोधनं यथा। हारभ्योर्नवशेषो तु घातेनाप्तशेषनवशेषः। भाज्याद्यो नवशेषस्तत्तुल्यः स्या
त्तदा शुद्धिरिति यथा भाज्यो भगणघ्नोहर्गणः ५३०८६२२५२९५४१३७६०००० अस्य नवशेषः ०० तथा
भाजकं भूदिनानि १५७७९१७८२८ अंकः ८ शेषः १ तथा लब्धभगणाः ३४५५८०८४६ कः २ शेषः १ भाज
कलब्धशेषयोः १।१ घातेन १ शेषो ३७५२०९७५६ युतः ३७५२०९७५७ अस्य नवशेषः ०० भाज्यशे
षेण ० सम इति शुद्धिरिति वक्ष्ये ३७५२०९७५६ द्वादशगुणः ४५०२५१७०७२ भूदिनैः १५७७९१७
लब्धा ८२८ भक्तौ राशयः २ शेषः १३४६६८०९१६ त्रिंशद्गुणः गुणः ४०४००४४२४८० भूदिनैर्भागे लब्धा
अंशाः २५ शेषात् २९५२४८२६७८० षष्टि ६० गुणात् १७७१४८९६०६८०० भूदिनैर्भागे लब्धाः कलाः
३६ शेषात् ३४१७६४४९२ षष्टि ६० गुणात् २०६८५८८२५२० भूदिनैर्भागे लब्धा विकलाः १३
शेषेषु प्रयोजनाभावात्त्यक्ते जातो भगणादिरर्कः १२५५८०८४६॥०।२।२५।३६।१३। अथ चं
द्रानयनं। अहर्गणः १२४०४००३५६८ चंद्रभगणाः ५७७५३३३६ गुणः ४१२५९२२४४५१८०९६२९६८

14 महद्दिनैर्भगितैर्लब्धा भगणाः २६२७१८८५३४९ शेषं वल्ली १८२०८००७१८ शोधनं हारांक ९ शेषः १ आ
प्तिशेष २ अनयोर्घातः २ अनेन युता वल्ली ११२०८०००७९ नवशेषविता० अस्य भाज्यां ४१२५९२१४४५
७८०१९०२८४८ क शेष० समत्वाज्जाता शुद्धि वल्ल्याः ११२०८०००७९ ह सर्वत्राप्यपादि ८।१५।४२।३२
जातो भगणादि स्पष्टंः २६२७१८८५३४९॥०।१५।४२।३२ अथ भौमः अहर्गणात् ७१४४०
४००३५६८ भौमभगणाः २२९६८३२ गुणात् १६४०८६५९७६३२३०९६५७६ महद्दिनैर्लब्धा भ
गणाः १०३९८९३७ २ वल्ली १००८८२६१६० शुद्धिः हारांकशेषा १ प्ति नवशेष १ योर्घात १ नवशे
ष १ युत वल्ली १००८८२६१६१ कशेषे लाभ भाज्य १६४०८६५९७६३२३०९६५७६ नवशेषः
३ समत्वाद्यति वल्ल्याः सर्वत्राप्यपादीति जातो भगणादि भौमः १०३९८९३७२॥७।२०।९१४४ अथ बु
धशीघ्रोच्चं । अहर्गणात् ७१४४०४००३५६८ बुधशीघ्रभगणाः ७९७१०८० गुणात् १२८१८२०१७६
२३६९८३०००८० महद्दिनैर्लब्धा भगणाः ८१२२०२२३१८ वल्ली ११६२५१६१६ शुद्धिः हारांकशेषा १ प्तां
कशेष २ घात २ युत वल्ली ११६२५१६१८ कशेषं० घातो १२८१८२०१७६२३६९८३०००८० कशेष००
समत्वादिति वल्ल्याः सर्वत्राप्यपादीति जातं भगणादि बुधशीघ्रोच्चं ८१२२०२२३१८॥०।१४।३।७ अथ २४
गुरुः अहर्गणात् ७१४४०४००३५६८ गुरुभगणाः ३६४२२० गुणात् २६०२००२२६७१९५३६९६ महद्
नै ५७१९७ ८२८ लब्धा भगणाः १६४९००९९९ वल्ली २४२६१८८ शुद्धिः हारांकशेष १ लब्धांकशेष २

घातां २ कशेष २ युतवल्यं २४२६।१९० कशेषो ३ भाज्यांक ९ शेषे ल २ समरतिवल्या राश्यादीतिजातो
भगणादिर्गुरुः १६४९००९९९ ॥००।००शि।२३ अथ शुक्रशीघ्रोच्चं। युगभगणात् १२४४०४००२५६८ शुक्रशी
घ्रभगणा २०२२३३१६ गुणात् ५०२९८९१३५११८९५१९९२ २६८ मूदिनैर्लब्धा भगणा ३१५ ९२९८९२० वल्ली
९१६९०३२८ शुद्धिः हरांकशेषा १ प्रांकशेष ५० घात० युतवल्ली ९१६९०२२८ कशेषो० घातांकशेष ००
समरतिवल्या: सर्वविद्धाराश्यादीतिजातं भगणादि शुक्रशीघ्रोच्चं ३१ ९२८९२२० ॥ ०।६।२९।२३।११ अ
थ शनिः युगभगणात् १२४४०४००२५६८ शनिभगणा १४६५६८ गुणात् २०४१०९१ ६५९९४९५४६४
मूदिनैर्लब्धा भगणाः ६६३५८८२० वल्ली ८१ ९९११६६४ शुद्धिः हरांकशेषा १ प्रांकशेष घात २ युतव
ल्ली ९१ ९९११६६६ कशेषो०० घातांकशेषेल० समरतिवल्याराश्यादीतिजातो भगणादि शनिः
६६३ [illegible] ५८८२० ॥ ०।६।१८।५५।३२ अथ चंद्रोच्चानयनं युगभगणात् १२४४०४००३५६८ चंद्रो
च्चभगणा [redacted] गुणात् २४८११९४९१ [illegible] ०४ मूदिनैः २५११९१८० लब्धा भगणा
२२०३८४३६ वल्ली: ५८१५१९२९६ सर्वविद्धाराश्यादि चंद्रोच्चं २२० [illegible] अथ
चंद्रपातः युगभगणः १२४४०४००२५६८ चंद्रपातभगणा २२२२३६ गुणाः १६५९४ ५६९८०६२५।८४
मूदिनै ५११९१८२८ भागे लब्धा भगणाः २०५२४६००५ वल्ली ११८८१४८००४४ सर्वविद्धाराश्यादिः ८।
२।१५।८।५४ एवं चक्र २ पातितो जातश्चंद्रपातः ३।०।८।३।६ अथ मंदोच्चानयनं तत्रादौ र

15 वे: अहर्गणः ७१४४०४००३५९८८ अर्कमंदोच्चभगणाः ३८७ गुणिताः २७६९७४२४९३८०८१६ कल्पभूदि-
नैः १५७७९१७८२८००० भागे लब्धा भगणाः ७५ वल्ली ३३८७२९४८०८१६ अनुच्छिः हारांकशेषं बलेध्नं
कशेषं ४ घोषितः ४ युतं वल्ल्याः ३३८७२९४८०८२० नवशेषं ०० घातशेषं ० समो च वल्ल्याः ३३८७२९४८०८१६
सर्ववज्राभ्यासादि २१७१८६।५६ जातं भगणादि रविमंदोच्चं ७५।२।७।१८६।५६ अथ भौमस्य गणः ७१४४०
४००३५९८८ भौममंदोच्चभगणाः २०४ गुणाः १४५७२८८४१६७३८७२ कल्पभूदिनैः १५७७९१७८२८००० ।
लब्धा भगणाः ९२ वल्ली ५६९९९७६५५१८७२ अनुच्छिः सर्ववित्सर्वत्र कार्या वल्ल्या सर्ववज्राभ्यासादि ४।२०।
०।२।२२ जातं भगणादि भौममंदोच्चं ९२।४।२०।०।२।२२ अथ बुधस्य गणः ७१४४०४००३५९८८ बुधमं-
दोच्चभगणाः ३६८ गुणाः २६२९०००६७३३२९२४ कल्पभूदिनाः १५७७९१७८२८००० लब्धा भगणाः १६६
वल्ली १६६३१२८६४९२४ वल्ल्याः सर्ववज्राभ्यासादीति जातं बुधमंदोच्चं १६६।७।२०।३७।०७ अथ गुरोः ग-
णः ७१४४०४००३५९८ गुरुमंदोच्चभगणाः ९०० गुणाः ६४२९६३६०३२१२०० कल्पभूदिनैः १५७७९१७८-
२८००० लब्धा भगणाः ४०७ वल्ली ७५२०४७२२५२०० जातं सर्ववित् गुरुमंदोच्चं ४०७।१।५।२२।२१।१ अथ
शुक्रस्य गणः ७१४४०४००३५९८८ शुक्रमंदोच्चभगणाः ५३५ गुणाः ३८२२०६१४१९०८८८० कल्पभू- १५
दिनैः १५७७९१७८२८००० लब्धा भगणाः २४२ वल्ली २५००३७५२२८८० अस्याः सर्ववज्राभ्यासादि ०।
।३७।२०।४४ जातं भगणादि शुक्रमंदोच्चं २४२।०।१।३७।२०।४४ अथ शनेः गणः ७१४४०४००३५९८८

शनिमंदोच्चभगणाः ३९ गुणाः ३१ ९६१५६२९१५२ कल्पभूदिनैः १५७७९१७८२९००० राप्ता भगणाः ७व
ल्ली १०३११५३०६२१५२ अस्याः पूर्ववद्राश्यादि ७।२६।३१।३० जातं भगणादि शनिमंदोच्चं ७।।७।२६।३१।
३० अथ पातानयनं तेष्वादौ भौमस्य गणाः ११८४०४००३५६८ भौमपातभगणाः २२४ गुणिताः ११५२६८
२७५६९ ६३५५२ कल्पभूदिनैः १५७७९१७८२९००० राप्ता भगणाः १६ वल्ली १८०२३४५३१ ५५५२ गुणिः पू
र्ववत्कार्या वल्ल्याः पूर्ववद्राश्यादि २०।२९।५६।३६ एव चक्रे द्वादशराशिषु १२ शोधितः १।९०।३।२४
जातो भगणादिर्भौमपातः ९६।।१।९०।३।२४ अथ बुधस्य। गणाः ११८४०४००३५६८ बुधपातभ
गणाः ४८८ गुणाः ३४८६६२९२५३१४११८४ कल्पभूदिनैः १५७७९१७८२९००० आप्ता भगणाः २०० वल्ली
१४८७२३१५८११८४ अस्याः पूर्ववद्राश्यादि ११।०९।१८।३६ एतेन चक्रे १२ शुद्धः ०।२०।४१।२४ जातो
भगणादिर्बुधपातः ३२९।००।२०।४१।२४ अथ गुरोः द्युगणात् ११८४०४००३५६८ गुरुपातभ
गणाः १७४ गुणात् २०६०२९६६२०८३२ कल्पभूदिनैः १५७७९१७८२९००० राप्ता भगणाः १८
वल्ली १२२८१०६०३६८३२ अस्याः पूर्ववद्राश्यादि ०९।१०।१९।३९ चक्रात् १२ शुद्धं २।१९।४०।२१ जातो
भगणादिर्गुरुपातः १८।।०२।१९।४०।२१ अथ शुक्रस्य। द्युगणात् ११८४०४००३५६८ शुक्रपात
भगणात् ९०३ गुणात् १०६९१०६८८१५४१२९०४ कल्पभूदिनैः १५७७९१७८२९००० राप्ता भगणाः

४.८ वल्ली ३।२।६३४।३।२९।९०४ अस्याः ध्रुवं व्यासाद्यादि ०।००।२९।१७ वक्रारम्भ ई ०।२।२९।४०।६३ जातो
16 भगणादि शुक्रपातः ४.८।।०।२।२९।४०।६३ अथ शनेः। युगभगणा ७।४४।०४।०० ३५६८ शनिपातभ
गणा ६६२ युगभगणा ४।२९।३५४५।०३६२०१८ कल्पभूदिनैः २५।१९।७८२८००० लब्धा भगणाः २९ वल्ली
११३।८०।२९।७ ९६००१८ अस्याः ध्रुवं व्यासाद्यादि ८।२९।३८।१८ वक्रारम्भ ई ०।१।०।२२।४४ जातो भ
गणादिः शनिपातः २९।८।०३।०।२२।४४ अत्रोपपत्तिः यदि भूदिनतुल्यदिनगणेन युगभगणा
समो भगणादिर्ग्रहः प्राप्यते तदा भावयुगणेन किमिति त्रैराशिकेनानुपातः युगभूदिनानि
प्रमाणं तत्कालीनो द्युगणः इच्छा युगभगणाः फलं भगणादिर्ग्रह पाक्षिकी लब्धिः लंकाया
हि मार्द्धरात्रिकः स्यात् नेन लंकासंनिहित देशे ग्रहा आर्द्धरात्रिका पूर्वोत्तर संनिहित देशे तारतम्येन मध्या हि
ह्निकस्सायंकालीनोदयिको भवतीति तथाच पूर्व्यः सिद्धान्तशिरोमणौ "यथा लंका कुमध्ये यम
कोटिरस्याः प्राक् पश्चिमे रोमकपत्तनं च। अधस्ततः सिद्धपुरं सुमेरुः सौम्येऽथ याम्ये वडवान
लश्च॥ लंकापुरेऽर्कस्य यदोदयः स्यात्तदा दिनार्द्धं यमकोटिपुर्य्याम्। अधः स्थिते सिद्धपुरेऽस्त
कालः स्याद्रोमके रात्रिदलं तदैवेति। अथ संवत्सरानयनं॥ ॥द्वादशघ्ना गुरो १६
यातभगणा वर्त्तमानकैः। राशिभिः सहिताः शुद्धाः षष्ट्या स्युर्विजयादयः।५२॥ ॥गुरोर्येभ

गणनयागतास्ते द्वादशगुणाः कार्यास्ततो वर्त्तमानै राश्यादिभिर्युक्ता स्ततः षष्ट्या विभज्य शेषे
विजयादिगणनया संवत्सरः स्यात् उदाहरणं गुरुयातभगणाः १६४९००९९९ द्वादशगुणाः
१९७८८११९८८ राश्यादिगुरुः ००।१००।३३।१२ युताः १९७८८११९८८।१००।००।३३।१२ षष्ट्याप्तं ६० ल
ब्धाः परिवर्त्ताः ३२९८०१९९ शेषं ४८ अस्य विजयादिगणनया विक्रमाख्यः संवत्सरो लब्धः शेषं ०।
००।३३।१२ द्वादशगुणे ००।१००।३९६।१५६ अधःस्थांके १५६ षष्ट्या विभज्य लब्धं २ उपरि ३९६ यु
तः ३९८।३६ एवमेव षष्ट्या विभज्योपरि ००।१०० युतः ००।१०६।३८।३६ तथा चाषाढशुक्लैकादशीरात्रि
कालीन गुरुभुक्तांशकादिः ००।३३।१२ लब्धमासादिना ००।१०६।३८।३६ मध्यमराशिभोगो भुक्तः
तथा चाषाढशुक्लैकादशीनवम्यां चतुर्विंशतिपलाधिके कविंशतिघटीष्वतीतासु विक्रमसंवत्सरप्रारं
भो जात इति अत्रोपपत्तिः बृहस्पतेर्मध्यमराशिभोगात् संवत्सरप्रवृत्तिर्भवति यथोक्तं श्रीपति
पद्धतिः परिवत्सराणां बृहस्पतेर्मध्यमराशिभोगात् इत्यादि तत्र च स्वर्वमध्यमराशिभोगादिना
इति मम मध्यमराशिभोगगतिवशात् किंचिन्न्यूने सावनवत्सरे भवति न तु परिपूर्णे तद्यथा।
गुरोर्युगभगणाः ३६४२२० द्वादशगुणाः ४३७०६४० युगवर्षाणि ४३२०००० अनयोरन्तरं व
र्षाणि ५०६४० जाता लुप्तसंवत्सरा युगे तत्र यदि वर्षाणिं शाधिकपंचशतोत्तरपंचाशत्सहस्रो
परिमिता लुप्तसंवत्सरा युगवर्षैर्लभ्यन्ते तदैको लुप्तसंवत्सरः कतिवर्षैरितित्रैराशिकेनानुपातः

यथा युगवर्षाणि ४३२०००० युगलुप्तसंवत्सरैः ५०६४० भक्तानि फलं ८५।०३।२०।५४
17 ।०।४२ पञ्चाशीति वर्षाणि ८५ मासाः ३ दिनानि २० कलादि ५४ पलानि ० तत्र त्र्यंशाः ४२ तथा चैता
वति काले गते एको लुप्तः संवत्सरो भवतीत्यर्थः यद्येतावद्भिर्वर्षैरेको लुप्तः संवत्सरो लभ्यते तदा एके
न वत्सरेण किं यास्तदंशो लभ्यते इत्यनुपातात्तरं यथा अनेन ८५।०३।२०।५४।०।४२ सावर्णि
तेन ६६३५५४५०२ सावर्णिताः केवर्षाणि १११६०००० लब्धं वर्षं शून्यं शेषात् १११६०००० द्वाद
गुणात् १३३९२०००० हरेण ६६३५५४५०२ लब्धं मासाः शून्यं शेषात् १३३९२०००० त्रिंशद्गुणात् ४०१
७६०००००० हरेण लब्धं दिनानि ०।६।१३।१२ तथा च द्वादशपलाधिके त्रयोदशघटिकोत्तरदिनेन च
तुष्टयेन पूर्णे सावने वत्सरे संवत्सरप्रवृत्तिर्भवतीति सर्वमुपपन्नं आर्यभटेन गुरुभगणा
३६४२२० भगणाश्च तुष्टयमधिकं कृतं ३६४२२४ श्रीपतिभट्टेन चार्यभट्टेन चार्यभट्टोक्तभगणेभ्य
त्वकेन्द्रकालत्वादिना प्रभवाद्यानयनं कृतं तत्र च वर्षाणि ८५।०।२।२।४९।०५ तथा च सूर्यसिद्धा
तावेत्यैतत्तन्न जातं तथा चात्रार्यभटस्य भगणचतुष्टययोगे श्रीपतिभट्टस्य चार्यभट्टोक्त
भगणेभ्यः प्रभवाद्यानयने ऽभिप्रायं न विद्म इति विद्वद्भिर्विभावनीयं अथ प्रकारान्तरेण ग्रहान
यनं ॥ ॥ ॥ विस्तरे लोतद्वृत्तं संक्षेपाद्व्यावहारिकं । मध्यमानयनं कार्यं ग्रहाणा ७
मिष्टतो युगात् ॥ ५४ ॥ अस्मिन् कृतयुगस्यान्ते सर्वे मध्यगता ग्रहाः । विनेन्दुपातमंदोच्चमेषादौ तुल्य

तामिताः ।५५॥ ॥एतत्सर्वं यथा स्वं स्वं भगणानां सावनादिना ग्रहानयनं कृतं मया तद्विस्तरेण अनेन
व्यवहारः कर्तुमशक्यः इत्यर्थः तथा च व्यवहारार्थं इष्टतो युगात् कांचिद्युगस्य वृत्या परिकल्प्य
ततो मध्यमा आनेयाः तथा युगकल्पना कार्या यथा संक्षेपेण लघुना श्रमेण ग्रहानयनं स्यादित्यर्थः
।तत्रैकं प्रकारं स्वयमेवाह ॥ ॥कल्पस्यात्र सहस्रांशो युगं तावत्प्रकीर्त्यते।चतुर्विंश
युगस्यांशः सूर्याचंद्रमसोर्युगं ॥५५॥ एकैकमष्टादशभिः सूर्याचंद्रयुताहतैः।तत्राधिमा
सा किंघ्नाह्नानि ह्रासतां ॥५६॥ ॥यथा कल्पस्य सहस्रांशो युगं भवति तथा युगचतुर्विंशां
शः सूर्याचंद्रमसोरेकैकं युगं भवति तत्र सूर्याचंद्रमसोर्निःशेषत्वात् सूर्याचंद्रमसोर्युगमित्यु
क्तं कल्पः ४३२०००००००० सहस्र १००० भक्तः तल्लब्धं युगमानं ४३२०००० एतच्चतुर्विंशतिभ
क्तं लब्धं सूर्याचंद्रमसोर्युगमानं १८०००० एवमस्यापि चतुर्विंशांशे निःशेषतास्यात् अत ए
वैकैकमिति वीप्सा एवं कल्पस्यापि चतुर्विंशांशे तस्यापि चतुर्विंशांशे एवं तस्यापीति निःशे
षता भवतीति युगचतुर्विंशांशपरमितसूर्याचंद्रमसोर्युगस्य स्वयमेव प्रमाणमाह अष्टा
दशभिरिति अष्टादश १८ अयुत १०००० गुणः १८०००० जातं सूर्याचंद्रमसोर्युगमानं तत्र सू
र्याचंद्रमसोर्युगे सूर्याचंद्राधिमासशतानि कुकोष्ठे चांद्रदिनानां ह्रासतानिःशेषता भवति अ

18 मेषं तु सम्प्रोपते सर्वः ॥ तत्र युगे भगणाद्याः ॥ ॥ एकादशायुतान्यत्र सूर्यस्य भ
गणाः स्मृताः । नवाब्धिगुणबाणव्योमकृतनेत्राणि शीतगोः ।५७। अधिमासनवाब्ध्यग्नि
तुपक्षाग्निविधि तथा । षडंगोनाः समुद्रांकव्याप्तकृतखेंदवः ॥५८॥ रसाद्रिशरतर्काब्धिन
गपंचरसास्त्विह । सषडंशाः कुदिवसा नलिनीरिपुवासराः ।५९। खाद्रित्रैकेंदुनंदाः स्युः खाद्रि
त्रैकरसास्तथा । कुजस्य भगणा राशिचतुष्कसहिताः क्रमी ।६०। चंद्रखाद्रीपुनंदाः स्युः खरद्रिखेंदुरसा
शनेः । [illegible] नगाद्यग्निसप्तवेदनगास्तथा ।६१। भगणास्ते सषडंशाः स्युः भगणाः स्युरमी
गुरोः सषडंशागाः शराद्रिद्रुतिपयो भगणाः क्रमी ।६२। नववह्नितत्त्वरंध्राद्रिसंख्याः स्युरोस्त
था । शीघ्रोच्चभगणाः ज्ञेयास्तथा मंदोच्चकेंद्रविधो ।६३। साद्रिपुनयमाब्ध्यग्निनखाः पातस्य
शाश्वताः । रसाद्रिरसनंदाः स्युः सूर्यचंद्रमसोर्युगे ।६४। स्पष्टार्था एते २१ ॥ ॥ सूर्यचंद्रम
सोर्युगे सूर्यभगणाः १८००००० चंद्रभगणाः २४०६२८९ अधिमासाः ६६३९० ९ । अवमदि
नानि १०४५० २३५० भूदिनानि ६५७४६५७६०१० चांद्रदिनानि ६६७१९१६७० भौमभगणाः १९
९५७०७१४ शनिभगणाः ६७०१ बुधशीघ्रोच्चभगणाः ७४११११ । गुरुभगणाः १५३५१२०

शुक्रशीघ्रोच्चभगणाः ७०२२५४९४ चंद्रोच्चभगणाः ४८८२०३ रा० १७५ चंद्रपातभगणाः २३२३१३७ उप
हरणं गतकल्पवर्षाः ४६७३ मासीकृताः ५६०७६ मासे ३ युताः ५६०७९ एवं द्विःस्थापितः एकत्राधिमा
से ६६३२९ गुणितः ३७२२०२२७२ सूर्यमासैः २२६०००० भक्तः लब्धाधिमासैः १७२ अन्यत्र ५६०७९
युतः ५७००२ एवं त्रिंशत् ३० गुणितः १७१०६० तद्दिनैः २५ रन्वितः १७१०७५ एवं द्विःस्थापितः एक
त्र तिथिक्षयैः २०४५०८२१५० गुणितः ३४९८३८८९६८५७५ पुनर्गततद्दिनान्वितदिनगणः १७१०७५
षडंशोनावमदिन ५० गुणितः ८५५३७५० षष्ट्या विभज्य लब्धेन १४५० ६२१३० अवमदिनगु
णितो ३४९८३८८९६८५७५ युतः ३४९८३८९१८१०३७१३० चंद्रवासरैः ६६७९८१६७० भक्तः लब्धाव
मदिनैः ३७१७२ द्विःस्थो १७१०७५ हीनः १७००६८४ जातो द्युगणः एवं वारानयनार्थमेकेनोनः १७०
०६८३ एवं सप्तशोषितः ५ शुक्रवारात् गणनया जातो भौमवारः अथ ग्रहानयनं तत्रादौ सूर्यः द्यु
गणः १७००६८४ सूर्यभगणैः ४३२०००० गुणितः ७३४६९५६८८०००० एवं सवर्णितः ७३४६९५६८८०००००
महर्गणैः १५७७९१७८२८ सवर्णितैः ३९४४७९४५७ भागे लब्धा भगणाः ४६७३ वल्ली ३७७१९०० अत्राः
एवं विभागाद्याः २।२५।३४।५० जातो भगणादिः सूर्यः ४६७३।२।२५।३४।५० अथ चंद्रः द्युगणः १७००६८४
चंद्रभगणैः ५७७५३३३६ गुणितः ९८२२८७०४७१८४ सवर्णितः ९८२२८७०४७१८४०० सवर्णितमहर्दि
नैः ३९४४७९४५७ लब्धा भगणाः ६२३६१५ वल्ली २८०२००२२५० एवं वर्जा तो भगणादि चंद्रः।

19 ६२४९५।।०।५।४२।३३ अथ भौमः द्युगणः ७०६८४२ भौमभगणैः ८५७०२ गुणितः १६३३
५५८६०६५२ पुनर्द्युगणो ७०६८४२ राशिचतुष्केण ४ गुणितः ६८३११६८ द्वादशशेषलब्धेन ५८६९
०० पूर्वांको १६३३५५८६०६५२ युतः १६३३५६५२६९८२ सवर्णितः ८८०१३५९३११२६० सवर्णित
भूदिनैः ३९४४७१८४५७० लब्धा भगणाः २४८०४ वल्ली ५५२२०६५८०० जातो भगणादि भौमः
२४८०४।।०।२।२०।०।१२९ अथ बुधोच्चं द्युगणः ७०६८४२ बुधोच्चभगणैः १७९३७७ गुणितः १२७५
७२०८४४७५ पुनर्द्युगणः ७०६८४२ बहद्गुणः १०२४ १६४८ द्वादशाप्तेन ८५२९७० पूर्वमां
को १२७५७२०८४४७५ युतः १२७५७९२९१२२७ सवर्णितः १६५७११७८३३६२० सवर्णितभूदि
नैः ३९४४७१८४५७० लब्धाः भगणाः ११८४०३ वल्ली २९०८१९२० जातं भगणादि बुधशीघ्रोच्चं १९
४०३।।८।२५।२७।१७ अथ गुरुः द्युगणः ७०६८४२ गुरुभगणैः ११७५ गुणितः २५९०२८२९६
५ पुनर्द्युगणो द्वाभ्यां गुणः ७०६८४२० द्वादशाप्तेन ५८९०३५० पूर्वांको २५९०२८२९६५ युतः २५
९०८८५२१२५ सवर्णित १५५४२५५१२७५०० सवर्णितभूदिनैः ३९४४७१८४५७०० लब्धा भगणाः।
३९४ वल्ली ६०६६९२० जातो भगणादि गुरुः ३९४।००।००।३३।१७ अथ शुक्रोच्चं। द्युगणः ७०६८४२ १९
शुक्रोच्चभगणैः २९२५९९ गुणितः ४८८४४९२२८६५८ सवर्णितः २८९८६८५३३१९५४० सवर्णि

तभूदिनै ३९४४७९८४७ भागे लब्धा भगणाः ७५९६ वह्नी २२९६४२२५८२० जातं भगणादि भुक्तशीघ्रोच्चं ७५
९६।०।६।०।६।२९।२२।३।१ अथ शनिः युगगणः ७०६९९४७ शनिभगणैः ६७०७ गुणितः ९०४२४२९८८६९७
सवर्णितः ६२४४५७३२१२२२० सवर्णितभूदिनैः ३९४४७१९४५७० भागे लब्धा भगणाः १५८ वह्नी २५७७
७९१६० जातो भगणादिः शनिः १५८।।०।६।२८।५५।३२ अथ चंद्रोच्चं युगगणः ७०६९९४७ चंद्रोच्चभगणैः
२०३४२ गुणितः १४३७२२४९४१८२२ पुनर्युगगणः एकेन गुणितः १२५६९४७ पुनर्युगगणः ७०६९९४७ पं
चदशा ५ गुणः २५६०४९२५ एवं त्रिंशत्कृतः लब्धेन ८५१४७० एकगुणित युगगणः ७०६९९४७ युतः २५६०४१४ अस्मात् द्वादशाप्त २१३३६७ सर्वांको ३४७२२५९३८२२ युतः ३४७२२६०७१९९ सव
र्णितः २०८३२६८४३३२४० सवर्णितभूदिनैः ३९४४७१९४५७० भागे लब्धा भगणाः ५२८ वह्नी ५१
६८९५३८० जातं भगणादि चंद्रोच्चं ५२८।।१।१७।१०।१८ एकराशित्रययुतः ५२८।४।१७।१०।१८ अ
थ चंद्रपातः युगगणः ७०६९९४७ चंद्रपातभगणैः ६९७६ गुणितः १६४१६३६१२१६ पुनर्युगगणेन
वत्सरगणः १५७३८४६९ द्वादशभक्तः लब्धेन १२८०२० सर्वांको १६५१६३६११६ युतः १५४७६४१
२१।०।८ सवर्णितः ६८१०५९८७९६० सवर्णितभूदिनैः ३९४४७१९४५७० भागे लब्धा भगणाः ५१ वह्नी
८२५०४२९० अस्मात् सर्वं वह्नी पादिः २।७।३०।२४ राशिषट्कयुतो भगणादि चंद्रपातः।

20 २५।।८।।७।३०।३४ चक्रे २ शोधितो जातः ३।२८।२९।३८ अथ परिधिः॥ ॥योजना
नि षट् शतान्यथो भूकर्णो द्विगुणानि तु। तद्वर्गतो दशगुणात् पदं भूपरिधिर्भवेत्॥९९॥ ॥अष्ट
शतयोजनानि द्विगुणानि षोडशशतयोजनपरिमितो भूकर्णः स्यात् तस्य कर्णस्य वर्गो दश
गुणः कार्यः तस्य मूलं भूपरिधिः स्यात्। यथा योजनानि ८०० द्विगुणानि १६०० जातं भूक
र्णप्रमाणं कर्णस्य १६०० वर्गः २५६०००० दशगुणः २५६००००० अस्य मूलं मूलकर्णनं
यथा लीलावत्यां त्यक्त्वान्त्याद्विषमात् कृतिं द्विगुणयेन् मूलं समे तद्धृते। त्यक्त्वा लब्धकृतिं तदा
द्विविषमाल्लब्धं द्विनिघ्नं न्यसेत्॥ पंक्त्यां पंक्तिहृते समेन्यविषमात्त्यक्त्वाप्तवर्गं फलं पंक्त्यां तत्
द्विगुणं न्यसेदिति मुहुः पंक्तेर्दलं स्यात्पदमिति अंत्यविषमे २५ पंचानां वर्गः पातितः १ ५ मू
लं ५ द्विगुणं कृतं १० अनेन समे ६ हृते लब्धं ० शेषं ६०००००० अंके मुत्सार्य पंक्त्या १०० समो
६००० हृतः लब्धं ५ शेषः १००००० लब्धस्य ५ कृतिः २५ अग्रिमविषमादस्मात् पातिता शेषः ७५०० २०
लब्धं ५ द्विगुणः १० पंक्तौ योजितं जाता पंक्तिः १०१० समो ७५० हृतः लब्धं ९ शेषं ६६०० लब्धस्य ९
कृतिः ८१ अग्रिमविषमादस्मात् पातिता शेषं ६५१९ लब्धं ९ द्विगुणं १८ पंक्तौ स्थापितं जाता पंक्तिः १०१८

अस्याः ई५०५८जातं मूलं शेष ६५१८अन्तरगुलं:२६०७६ द्विगुणमूलेन १०११८ भक्तं लब्धो क्रोशो
२ शेषं ५८४० सहस्रद्वितयेन २००० गुणितं ११६८००० हारेण १०११८ लब्धा दण्डाः ११५४ शेषं ३८२८
चतुर्गुणं १५३१२ हारेण १०११८ लब्धो हस्तः १ शेषः ५१९४ चतुर्विंशतिगुणं १२४६५६ हारेण १०११८ लब्धा
न्यङ्गुलानि १२ जातं भूपरिधिमानं ५०५८।२।११५४।१।१२ अङ्गुलादिपरिमाणं लीलावत्यां यथा य
वोदरैरङ्गुलमष्टसंख्यैर्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः। हस्तैश्चतुर्भिर्भवतीह दण्डः क्रोशः सहस्रद्वि
तयेन तेषां। स्याद्योजनं क्रोशचतुष्टयेनेति परिधिर्वेष्टनं व्यासः देवे मध्यमानं अथ स्वदेशप
रिधिः॥ ॥लंबज्याघ्नस्त्रिजीवाप्तः स्फुटो भूपरिधिः स्वकः॥ ॥भूपरिधिर्लंबज्य
यागुण्यः त्रिज्यया भाज्यः स्फुटो भूपरिधिः स्यात् यथा लंबज्यानयनं त्रिप्रश्नाध्याये वक्ष्यति।
यथा शंकुच्छायाकृतियुते मूलं कर्णोऽस्य वर्गतः॥ तथा शंकुच्छायाहते त्रिज्ये विषुवत्कर्णभाजि
ते लंबाक्षज्येति शंकु १२ वर्ग १४४ छाया विषुवत्प्रभा मेषादौ यन्मध्याह्ने याच्छाया सा विषुवत्प्रभेत्यु
क्तः काम्पिल्ये विषुवच्छाया ६ एतद्वर्गः ३६ शंकु १२ वर्गः १४४ वर्गयोर्योगः १८० अस्य मूलं १३।२५
जातो विषुवत्कर्णः त्रिज्या ३४३८ शंकु १२ गुणिता ४१२५६ विषुवत्कर्णः १३।२५ भक्ता जाता लंबज्या
३०७४।५९ भूपरिधिः ५०५८ स्वदेशलंबज्यया ३०७४।५९ गुणितः १५५५२१९२५ त्रिज्यया ३४३८ भ
३०७४।५९ भूपरिधिः ५०५८ स्वदेश लंबज्यया ... १५० अस्याः ५५ दिः लंकामेर्वन्तरे लंबांशाः नवतिः ९० त
क्तः लब्धं स्वदेशपरिधिप्रमाणं ४५२३।१५०

त्रैकोमधष्ठ्यधिकपंचसहस्रयोजनमितः परिधिरंगीकृतः तत्र यदि त्रिज्यारूपलंबज्यया यं परिधि
५०५९राप्तस्तदा स्वदेशलंबज्यया किमिति त्रैराशिकेनानुपात इति ॥ अथ देशांतरं ॥ ॥ तेन देशां
तराभ्यस्ता ग्रहभुक्तिर्विभाजिता । ६७ । कलादि तत्फलं प्राच्यां ग्रहेभ्यः परिशोधयेत् । रेखाप्रतीचीसं
स्थाने प्रक्षिप्ताः स्युः स्वदेशजाः । ६८ ॥ ॥ ग्रहाणां भुक्तिर्दिनगतिः देशांतरेण गुणनीया तेन स्व
देशपरिधिना भाज्या लब्धं कलादिफलं मध्यरेखातः प्राच्यां स्वदिशि ग्रहेषु शोधयेत् लब्धं कुर्या
त् रेखातः पश्चिमदिशि धनं कार्यं ते तस्ते ग्रहाः स्वदेशा भवेयुः उदाहरणं तत्रादौ दिनगतेरान
यनं युगाः १ सूर्यभगणाः ४३२०००० गुणः ४३२०००० मदिन १५७७९१७८२८ भक्तः लब्धा भ
गणाः ० अन्यं ० वली ४३२०००० द्वादशगुणं ५१८४०००० मदिने १५७७९१७८२८ भं कालं राशयः
० शेषात ५१८४०००० त्रिंशगुणात १५५५२०००००० मदिनैराप्तं भागाः ० शेषात १५५५२००००००
षष्ठिघ्नात ९३३१२०००००००० मदिनैराप्ताः कलाः ५९ शेषात २१८६५८७८ षष्ठिघ्नात १३११५२६८८०
८८० मदिनैराप्ता विकलाः ८ शेषात १६७५४८२५८ षष्ठिघ्नात १००५२८९५४८० मदिनैराप्तं जा
ता रवेर्दिनगतिः लिप्तादिः ५९।०८।१० एवं चंद्रगतिः ७९०।३४।५४ भौमस्य ३१।२६।२८ बुधस्य २४५
।३२।१८ गुरोः ४।५९।० शुक्रस्य ९६।७।४४ शनेः २।००।२६ चंद्रोच्चस्य ६।४०।५४ चंद्रपातस्य ३।१०।
४८ रवेर्दिनगतिः ५९।०८।१० कांपिल्यमध्यरेखांतरयोजनैः ३ गुणिता ७।३।५ स्वदेशपरिधि २१

ना४५२४१५० भागे लब्धाः कलाः ०० शेषात् ७११८१५ षष्टिघ्नात् ४२६४४७५ परिधिना ४५२४१५० भागे लब्धा
विकलाः २३ जाता किंम देशांतरं ००।२३ चंद्रगतिः ७९०।३५ देशांतरयोजनैः गुणाः ४७१७।३० परिधिना
४५२४१५० लब्धं कलादि ५।१८ भौमगतिः ३१।२६।२९ गुणकः ० घ्ना ९८७।२४ हारेण ४५२४१५० प्तं कलादि
००।१२ बुधगतिः २४५।३२।१५ गुणकः ० गुणे ७३६।२०।० हारः ४५२४१५० हृतं लब्धं कलादि ०।१३ गुरुगतिः
४।५९।० गुणकः ० गुणा २४९।३४ हारः ४५२४१५० प्तं कलादि ००।०१।५८ शुक्रगतिः ९६।०।२३ गुण
कः ० गुणा २९८।४५ हारा ४५२४१५० प्तं कलादि ००।२८ शनिगतिः ०२।०।२२ गुणकः ० गुणा ६०।२१ हा
रा ४५२४१५० प्तं कलादि ००।०० चंद्रोच्चगतिः ०६।४०।५४ गुणकः ० गुणा २००।३७ हारा ४५२४१५० प्तं कला
दि ००।०२ चंद्रपातगतिः ०३।१०।४९ गुणकः ० घ्ना ९५।२४ हारा ४५२४१५० प्तं कलादि ००।०१ देशांतरस्फु
ट ग्रहा जाताः रविः ० ४।२।२५।३४।३७ चंद्रः ०८।१५।३७।१५ भौमः ०७।२०।०।१७ बुधोच्चं ०८।२५।२५।
४० गुरुः ००।००।३२।१७ शुक्रोच्चं ०६।२९।२१।३२ शनिः ६।१८।५४।३२ चंद्रोच्चं ०५।७।१०।१९ चंद्रपातः ०३।
१२।२९।३५ अत्रोपपत्तिः लंकामेरुस्थरेखायां यदार्द्धरात्रं ततः पूर्वमेव रेखा पूर्वदिक्स्थ अर्द्धरात्रं भवती
ति फलस्य धनत्वोक्तिः रेखातः पश्चिमदिशि रेखोर्द्धकालादनंतरं अर्द्धरात्रं भिति तत्र फलस्य ध
नत्वोक्तिः तदंतरकालस्तदंतरयोजनैः स्वस्वभुक्तिवैष्णवादनुपातेन लभ्यते यदि स्फुटपरिधियोज

२२ नैः षष्टिघटिका लभ्यंते तदा रेखा स्वपुरांतर योजनैः किमिति त्रैराशिकेन देशांतर घटिकाल
भ्यंते यदि स्फुट परिधियोजनै र्गति र्लभ्यते तदा देशांतर योजनैः किमिति योजनै र वानुपातेक लं
कलाः इति सर्वमनवद्यं मेरुगर्भ स्वपुरांतरे या वेति योजनानि तानि लंबांशजानि निरक्षस्वपु
रांतर योजनैर्मेरोः समेततो य ह तं जायते स स्फुट भूपरिधिः त्रिज्यापि मेरुगर्भ निरक्षांतर गता
। यदि त्रिज्या समान लंबज्यया मध्य भूपरिधि र्लभ्यते तदा स्वदेश लंबज्यया किमिति लंबज्या गुणा
त्रिज्याहारः फलं स्फुट परिधिः अस्योपपत्तिः लंकामेर्वंतर योजनानि २२८७ भां ३६० गुणि २२५४।४५=
तानि ७५५८२१२ भूपरिधि ५०५९ भक्तानि लब्धा लंकामेर्वंतरे लंबांशाः ९० एतावंत एव मेरुलंबांतरे लंबा
शाः मेरावक्षांशाः ९० लंकायां लंबांशाः ९० यदि सकोंशत्रयेण चतुः षष्ठ्यधिक षट्शतयोजनैर्भूप
रिधिना ५०५९ नवतिरक्षांशा लभ्यंते तदा स्वदेश लंबांतर योजनैः कियंत इति त्रैराशिके कांपिल
लंकांतर योजनानि ३७१२।५०० भांशा ३६० गुणितानि १२८५८६ परिधिना ५०५९ भागे लब्धा कां
पिल्ले ऽक्षांशाः २७ कांपिल्यमेर्वंतर योजनानि ८८५१७१६०० भांशा ३६० गुणितानि ३१८७ परिधि ५०५९
भक्तानि जाता लंबांशाः ६३ अनुविलोमगणितेन योजनानि ज्ञातव्यानि कांपिल्य लंकांतर योजनानि
३७१२।२५० कांपिल्य मेर्वंतर योजनानि ८८५२।१६० एतदुक्तं सिद्धांतशिरोमणौ योजनसंख्याभां २२

दोर्गुणिताः स्वपरिधिविहृता भवंत्यंशाः । भूमौ कृतायां वा भागेभ्यो योजनानि च व्यस्तमिति ।
। अथ मध्यरेखा ॥ ॥ राक्षसालयदेवौकःशैलयोर्मध्यसूत्रगाः । रोहीतकमवंती
च यथा संनिहितं सरः । ६९ । स्पष्टार्थः । यत्र रेखातः पूर्वपरत्वं नास्ति स्वदेशस्य तत्र देशांतर
कर्मणाह ॥ ॥ अतीतोन्मीलनं लिंदोर्हकासिद्धिकरणागतं । यदा भवेत्तदा प्राच्यां स्व
स्थानं मध्यतो भवेत् । ७० । अप्राप्य वा भवेत् पश्चादेवं चाप्यनिमीलनात् । तयोरंतरनाडीभिर्हन्या
द्भूपरिधिं स्फुटं । ७१ । षष्ट्याविभज्य लब्धैस्तु योजनैः प्रागथापरा । स्वदेशपरिधिर्ज्ञेयः कुर्यात्
देशांतरं हितैः । ७२ ॥ ॥ चंद्रस्य गणितागतोन्मीलनसमयमतीत्य यदोन्मीलनं भवति
तत्र रेखातः प्राग्देश इति यत्र गणितागतनिमीलनकालात्पूर्वं निमीलनं तत्र पश्चाद्देश इति त
त्र तयोर्गणितागतकालोन्मीलनकालयोरंतरघटीभिः स्फुटभूपरिधिं संगुण्य षष्ट्या विभज्य
लब्धैर्योजनैर्देशांतरं कार्यं स्वपरिधिश्च स्वदेशीयो ग्राह्यः यथा गणितागतोन्मीलनका
लः २०।०० अतीतोन्मीलनकालः ~~नाडिकाभिः [illegible] इति उदाहरणं [illegible]~~
~~[illegible] ०।०० [illegible] देशांतरं ०।० [illegible] देशांतर [illegible]~~
~~[illegible]~~ २०।२४ अनयोरंतरघटीभिः ००।२४ स्फुटपरिधिः ४५२४।५०।

23 गुणितः १८०९।५८ बाहुभक्ताः लब्धान्तरयोजनानि १० । अथ वारप्रवृत्तिः ॥ ॥
वारप्रवृत्तिप्राग्देशे स्यात् पार्द्धेऽप्यधिके भवेत् । तद्देशान्तरनाडीभिः पश्चादूने विनिर्दिशेत् । ७२ ॥
प्राग्देशे मध्यरेखातः पूर्वस्यां दिशि देशान्तरनाडीभिरधिके रात्र्यर्द्धे वारप्रवृत्तिर्भवति पश्चाद्दे
शे देशान्तरनाडीभिरूने रात्र्यर्द्धे वारप्रवृत्तिर्भवति तथा रवावुत्तरगोले गते च समानचरघटीभि
रर्कोदयानन्तरं वारप्रवृत्तिः दक्षिणगोले च समानचरघटीभिरर्कोदयात् पूर्वमेव वारप्रवृत्तिः स्या
दाद्यावुत्तरगोलस्थत्वाद् दक्षिणे स्फुटः । एवं च यदा देशान्तरनाडीभिरर्कोदयानन्तरं चरनाडी
भिरर्कविम्बोदयानन्तरमेव वारप्रवृत्तिस्तत्र देशान्तरघटीवर्तमानकालिकचरयोर्योगतु
ल्यकालेनेष्टयोदयात् पूर्वं यदा देशान्तरघटीभिः पूर्वं चरघटीभिरधस्तत्रोभयोर्वियोगतु
ल्यकालेनार्कोदयात् पूर्वमेव वारप्रवृत्तिरित्युक्तं भवति उक्तं च अर्कोदयात् पूर्वमधश्च ताभिः
प्राच्यां प्रतीच्यां दिनपप्रवृत्तिः ऊर्द्ध्वं तथा अम्बरनाडिकाभिरवावुदग्दक्षिणगोलसंस्थे
ति उदाहरणं उत्तरगोलपरमदिनं ३४।०० चरार्द्धं २।०० अर्कदेशान्तरं ०।२२ अत्र चरा २३
र्द्धदेशान्तरयोर्द्वयोरपि सूर्योदयात् पूर्वं वारप्रवृत्तिकारित्वात् योगः २।२२ तथा च सूर्योदया

दूइमितावतिकालेगतेवारप्रवृत्तिः दक्षिणगोलेरात्रिप्रमाणं ३४।०० चरार्द्धं २।०० देशांत
रं ०।०।२२ अत्रचरार्द्धमध्योवारप्रवृत्तिकारिदेशांतरमूर्द्धमित्यनयोर्वियोगः १।५।३७ त
थाचानेनकालेनार्कोदयात्सर्वरात्रिशेषवारप्रवृत्तिरितिरेखातः सर्वदिग्भागेषु पश्चा
त्तु एतद्द्वैपरीत्येनेति उदग्गोले दिनप्रमाणं त्रिंशत्घटीभ्यो यावदधिकं तदर्द्धितंच
रार्द्धंस्यात् दक्षिणगोले रात्रिमाणं त्रिंशत्घटीभ्यो यावदधिकं तस्यार्द्धं चरार्द्धमिति अ
त्रोपपत्तिः रेखायां सर्वत्र सर्वदार्कोदय एव वारप्रवृत्तिः अन्यत्र देशांतरतुल्यमू
र्द्धधस्तं तथाचरेखोदयदेशोदययोर्यावदंतरं तावदेव देशांतरं खोदयात्क्षितिजस्यो
न्मंडलाधःस्थितत्वाद्देशांतर घटीभिः सूर्योदयादूर्द्धगताभिः प्राच्यांरेखोदयका
लउपलभ्यतेप्रतीच्यां त्वर्कोदयात्पूर्वं तत्रत्यक्षितिजस्यमंडलादूर्द्धंस्थितत्वादितिसर्व
मुपपन्नं अथतात्कालिकीकरणं ॥ ॥इष्टनाडीगुणभुक्तिःषष्ट्या

२५ भक्ता कलादिकं। गतेष्टो ध्रुवं युतं गमे कृत्वा तात्कालिको भवेत्॥७४॥ योगस्तात्का
लिकः कर्त्तुमिष्टस्तस्य भुक्तिरिष्टघटीभिर्गुणिता षष्ट्या भाज्या लब्धं कलादिकं अ
र्द्धरात्रात् पूर्वं चेदिष्टं तदा ग्रहे शोध्यं अर्द्धरात्रादूर्द्ध्वं चेदिष्टं तदा योज्यं एवं सति तात्का
लिको ग्रहः स्यात् गतिः ५९।८ इष्ट २०।०० गुणिता ५९२।४० षष्टिभक्ता लब्धा कलाः ९।
५२ सूर्यः २।२५।३४।२७ कलादिना ९।५२ युतः २।२५।४४।१९ जातस्तात्कालिकोऽर्कः
चंद्रभुक्तिः ७९०।३५ इष्ट २०।०० गुणिता १५८०५।५० षष्ट्या लब्धेन २।२२।४५। चंद्रः ८
।५।३२।२९ युतो ८।७।५५।१४ जातस्तात्कालिकश्चंद्रः एवमन्येऽप्युदाहार्याः। अ
थ विक्षेपाः॥ ॥भचक्रलिप्ताशीत्यंशपरमं दक्षिणोत्तरं। विक्षिप्यते स्वपा
तेन स्वक्रांत्यंतादनुक्रमात्॥७५॥ तन्नवांशं द्विगुणितं जीवस्त्रिगुणमर्कजः। बुधशु २४
क्रार्कजाः पातैर्विक्षिप्यंते चतुर्गुणाः॥७६॥ एवं त्रिघनरंध्रार्करसार्कार्कदशाहताः।

चंद्रादीनां क्रमादेता मध्यविक्षेपलिप्तिकाः।७। अत्रोदाहरणेनैव व्याख्या भचक्रस्य
राशिचक्रस्य २२ लिप्ताः २१६०० अशीति ८० भक्ताः लब्धाश्चंद्रविक्षेपकलाः २७० एताभिः
स्वपातेन चंद्रो दक्षिणतः उत्तरतश्च प्रेर्यते स्वक्रांत्यंतस्थानात् एताश्च परमविक्षेपक
लाः चंद्रविक्षेपस्य २७० नवमांशाः ३० द्विगुणाः ६० जातो गुरुविक्षेपः चंद्रविक्षेपनवां
श ३० त्रिगुणः ९० जातो भौमविक्षेपः सप्तव २० चतुर्गुणः १२० जातो बुधशुक्रश
निविक्षेपाः एवं कृत्वापि सिद्धा एव विक्षेपाणां कलाः सुगमार्थं लिखति एवमिति
त्रिघनं सप्तविंशतिः रंध्रा नव अर्का द्वादश रसाः षट् अर्का द्वादश अर्का द्वादश
२७।९।१२।६।१२।१२ एते दश १० गुणा जाता चंद्रादीनां विक्षेपलिप्ताः २७०।९०।१२२
१ ६०।१२०।१२९ अत्रोपपत्तिः विमंडलप्रतिमंडलयोः संपातस्य पात इति संज्ञा तत्रस्था
रभ्य विक्षेपप्रवृत्तिः क्रांतिवृत्तस्य च कांशेरंकितस्य प्रतिमंडलसंज्ञा तत्र भूसरल
धरापालाकया कक्षामंडलं छ यथोक्तविधिना विरचय्य तत्र मंडलमेवादेः प्रति

२५ लोमं पातस्थानं चिह्नयित्वा तत्र विमंडलं निवेश्य पातचिह्नाद्राशित्रयांतरे विमंडलप्र
तिमंडलयोः संपाते तत्पातात् पूर्वतः त्रिभांतरे पठितविक्षेपभागप्रमाणेन प्रतिमंडला
उत्तरतो दक्षिणे तत्र विमंडलं केनापि आधारेण स्थिरं कृत्वा मेषादेरनुलोमं मंदस्फु
टग्रहं मंडले विमंडले च दत्वा विक्षेपोपपत्तिं दर्शयेत् । सूर्यस्य विक्षेपाभावात् क्रांति
वृत्तमेव विमंडलं ~~राशित्रयांतरे परमो वि~~ अन्येषां तु वृत्तद्वयसंपातस्थाने क्षेपाभावा
त् क्रांतिवृत्तमेव विमंडलं राशित्रयांतरे परमो विक्षेपः अंतरा तु पातस्यार्थः यदि क
र्णाग्रे एतावांस्तदा त्रिज्याग्रे कियान् इति तथा च स्वपातोनग्रहज्यागुणाः पठितवि
क्षेपभागा गुणकः कर्णो भाजकः फलेयम् इति सर्वमुपपन्नं ॥ इति श्रीज्योतिर्विद्भूधर
कृते सूर्यसिद्धांतविवरणे मध्यमाधिकारः ॥ ॥ ॥ ॥

॥ अथ स्पष्टीकरणाध्यायो व्याख्यायते तत्रादौ ग्रहाणां गतिहेतूनाह शीघ्रोच्चमंदोच्चपाताः ग्रहाणांमू
अदृश्यरूपाः कालस्य मूर्त्तयो भगणाश्रिताः शीघ्रमंदोच्चपाताख्या ग्रहाणां गतिहेतवः १
यदा गां याम्गतिस्तस्य हेतवः एतद्वशादेव ग्रहा दक्षिणोत्तरपूर्वापरादिषु प्रयांतीत्यर्थः तत्र पातो विक्षे
हेतुः पवशाद्दक्षिणोत्तरगतिः उच्चानि फलधनर्णवशात्पूर्वापरगतिहेतूनि एतदग्रेव क्ष्यति ते शीघ्र
मंदोच्चपाताः कालस्य ग्रहदृश्यरूपा मूर्त्तयो भगणे व्याप्रिता ग्रहरूपा इत्यर्थः अत एव कालस्य सदात
नत्वेपि नियमः संगच्छते कथमेते गतिहेतवो भवंतीत्यत्राह तेषामुच्चादीनां वाततुल्यै रश्मिभिर्बद्धा
तद्वातरश्मिभिर्बद्धास्तैः सव्येतरपाणिभिः प्राक्पश्चादपकृष्यंते यथासन्नं स्वदृग्मुखं २ प्रव
प्रवहाख्यो मरुत्तांस्तु स्वोच्चाभिमुखमीरयेत् । पूर्वापरापकृष्टास्ते गतिं यांति पृथग्विधां ३
ग्रहास्ते उच्चादिभिर्वामदक्षिणहस्तैः दक्षिणोत्तरहस्तैः स्वदिगभिमुखं प्राक्पश्चाच्चाकृष्यंते ते च यथा
सन्नं उच्चेन स्वस्थानात् षड्राशिपर्यंतं स्वस्थानस्य पश्चाद्भाग एवासन्नस्थाने स्यासन्नत्वाद्ग्रह एवाकृष्य
ते प्रवहाख्यो वायुश्च तान् स्वोच्चसंमुखं प्रेरयति उच्चैः पूर्वतोऽपरतो वाकृष्यंते तेषां ग्रहाणां पृथक्भि
न्ना गतिर्भवति वायुवशेनोच्चप्रत्यग्गतेर्भिन्नगतयो भवंतीत्यर्थः वायवश्च सिद्धांतशिरोमणौ म
वायुरेव हि प्रवहस्त्वद्वर्द्धस्यादुद्वहस्तदनु संवहसंज्ञकश्च अन्यस्ततो विप्लुवेहः परिवहः परावहो

26 स्माद्यांयः परामवरमेपवनाः प्रसिद्धाः। भूमेर्वहिर्द्वादशयोजनानि भूवायुरभ्रांबुदविद्युताद्यं। तदूर्ध्वगोवः प्र
वहः सत्नि त्व प्रत्यग्गतिस्तस्यतु मध्यासंस्था नसंच कदाः खचरैः समेताय समाद तस्तेन समाहतो
यं। भपंजरः खेचरचक्रयुक्तो भ्रमत्यजस्त्रं प्रवहानिलेन। तथा ततो परा भाभिमुखं भपंजरेस खेचरे
शीघ्रतरे भ्रमत्यपत्पु। तदस्य गत्पेद्रदिशं न भभ्रराभ्रं रंति नीचोच्चतरात्म वर्त्मसु इति॥ ॥अ
थो खा कर्बलप्रकारं फलध नर्द्धप्रकारं चाह॥ ॥ग्रहा आग्भगला ईस्यः प्राङ्मुखं कर्षति ग
हं। ऊर्ध्वसंज्ञो परा ईस्यस्तद् त्पश्चान्मुखं ग्रहं।४। स्वोच्चाभिमुखं रूष्टा भगलेप्राङ्मुखं यांति यद् ग्रहाः
न तेषु धने मित्सु चेत्मलं पश्चान्मुखेषु च।५। ग्रहाधिष्ठित राशेराशिषट्कं पाव प्राग्भगलाई संज्ञो
तथा च ग्रहात ग्रहाधिष्ठित राशेः प्राग्भगला ईस्य मुखं ग्रह पश्चान्मुखं कर्षति। एवं स्वे स्वोच्चे राशि
ग्रहाः यत यस्मात भगले प्राङ्मुखं गच्छंति तत तस्मात् तेषु ग्रहेषु फलं धनं भवति पश्चान्मुखेषु तेषु
लं भवति अत्र शिष्यबोधार्थं पूर्वकमुदाह्रियते मित्रो फलके वा मध्ये विंदुं रुत्वा तस्माद्विंदोः त्रिज्याप्र
माणेन कर्कटेन वृत्तं लिखेत् तत्केन्द्रात तसंज्ञं यस्य ग्रहस्य स्पष्टे षट्कं लिख्यते तस्य मध्ये भगणांशैः पं
चदशांशेन विभेक विंशोदेवयवृत्तं क्रियते तन्महीवृत्तसंज्ञं तच्चावनति लंबन दर्शनार्थं ग्रस्यमाणादि २६
दुरेखैव मभूयः कल्पते तत्केन्द्राद वृत्तं च क्रांशीरंकितं कार्यं तत्रैष स्थाने मे षादं प्रकल्प्य तत्र मध्य
×सर्वाभिमुखं ग्रहमाकर्षति॥ अपरस्मात् पक्षस्थः परस्संज्ञा तत्रस्थ मुखं ६

ग्रहमुखं च दत्वा तदग्रयोः चिह्ने कार्ये भूमध्ययोरुपरिगता रेखा कार्या साऽउच्चरेखा ततो भूमध्याद्
खोत्थमत्स्याभ्यां तिर्यग्रेखाऽन्या कार्या ततो ग्रहस्यान्त्यफलज्यामिति तत्सूत्रमुच्चरेखायां भूमध्याद्द
त्वा तदग्रे चिह्नयेत् ततश्चिह्नात् त्रिज्यामितं तत्कर्कटेन वृत्तं लिखेत् तत्प्रतिमण्डलसंज्ञं केन्द्राह
ते योच्चरेखा तामेव प्रतिमण्डलपर्यन्तं संवर्द्ध्य सा प्रतिमण्डले लग्ना तत्रैव प्रतिमण्डले उच्चं कल्प्यं
ततोऽन्त्यफलज्याग्राच्चिह्नं मध्ये कृत्वा संपादितं मत्स्याभ्यां तिर्यग्गता अन्या रेखा कार्या ततः प्रतिमं ग्रा=५
डलं चक्रांशैरंकयेत् व्यस्तमार्गेण उच्चस्थानात् [illegible] ततो मेषादि कल्प्यः ततो ग्रहोदयः य
घ थोदाहृतभौमग्रहे [illegible] के कल्पिते मन्दस्फुटो भौमः २।०।१५।९।२८ अस्य भुक्तांशाः कक्षाहृते प्रति
मण्डलवृत्ते च भौमभुक्तं कर्कटस्य दशमांशस्थाने चिह्नं कार्यं ततः कुमध्यात् प्रतिमण्डलवृत्तस्थितक
र्कटदशमांशपर्यन्तं सूत्रं प्रसार्य तत्सूत्रे यत्र कक्षाहृते तलग्नं तत्र स्पष्टो ग्रहः तत्र च कक्षाहृत्तल
ना ग्नसूत्रे स्यात् कक्षावृत्तगकर्कटदशमांशपर्यन्तं येंऽशास्ते फलं यथात्र कर्कटचतुर्थांशस्य सूत्रात
रेषडंशाः ते च स्वल्पमतः कर्कटचतुर्थांश ५ कक्षावृत्ते स्पष्टो जातः यत्र कक्षावृत्ताद्योगतं प्रतिमं
डलवृत्तं तत्र कुमध्यात् प्रतिमण्डलवृत्तस्थितग्रहचिह्नोपरिगतसूत्रं कक्षावृत्तपर्यन्तं दद्यात् तत्सू
त्रं यत्रैव कक्षावृत्ते लग्नं तत्रैव स्पष्टो ग्रहः यथागणितागतो मन्दस्फुटो भौमः ७।०।२।१५।२।८

२७ वृश्चिकनवभागेस्थित इति हरगतदये पिनवमभागस्थानं विहायित्वा प्रसारितस्तत्र कर्णाहत्त संपात
स्थानाच्छिद्रितस्थानपर्यंतं च चतुश्चत्वारिंशदंशाः फलमत्रलमतः कन्यापंचविंशतिभागे स्पष्टो
जातः अत्र कर्कटस्य भौमाद पराईगत मुख्यं मिथुनस्यत्वात अतउचेनन भौमः पश्चात्कृष्टो जा
तः फलमृणं एवं मेषेय दार्धचत्वारिंशांशपर्यंतं सूत्रे प्रसारिते कर्णाहत्ते हबोनवविंशोंशोस्पष्टोग्रहः।
तत्रोच्चस्य ग्रहात्प्राग्भगणार्धगतत्वात् प्राङ्मुखमाकृष्टो ग्रहोतः फलं धनमिति सर्वमुपपन्नं।
एतदुक्तं सिद्धांतशिरोमणौ त्रिज्यकाभज्यका संमितकर्कटेन कार्यावृत्तं प्रथमं विलिख्य। तन्म
ध्यतो मध्यमखेटभुक्तितिथ्यंशमानेन महीसूत्रतो। कर्णारव्यहत्ते भगणांकिते च दत्वोच्चखेटौ क्रियतो
धरेखा। कुवृत्ततुंगोपरिगा विधेया तिर्यक्तितोन्यासुधिया कुमध्ये। उच्चोन्मुखी मंत्यफलज्यकां च दत्वाकु
मध्याद्धिलिखेत्तदग्रे। त्रिभज्ययैवं प्रतिमंडलाख्यं सेवोर्ध्वरेखा त्वपरा च तिर्यक्। तुंगोर्ध्वरेखा खलु यत्र लग्
ना तत्रोच्चमस्मिन्प्रतिमंडलेपि। ततो विलोमं खलु तुंगभोगैर्मेषादिरस्मात्खचरोनुलोममिति। अथ
दक्षिणोत्तराकबलिमाह॥ ॥ दक्षिणोत्तरयोरेवं पातोराहुश्चरं हसा। विक्षिप्तस्तेषु विक्षेपश्चं
द्रादीनामपक्रमात्॥६॥ उत्तराभिरवं पातो विक्षिप्तपरार्धगाः। ग्रहं प्राग्भगणार्धस्थो याम्यायामपक २७
मेति।७। बुधभार्गवयोः शीघ्रात्तद्वत्पातोयथास्थितः। तच्छीघ्रकर्णाद्योतु विक्षिप्तेतेयथोक्तवत्॥८।

एवं यथोक्तेन सर्वपराकर्षणं तथा पातो ऽर्कं हस्तावेगेनापकर्षमात्र क्रांतिमंडलाद्दक्षिणत उत्तरतश्च विक्षिपति
। सर्वे ग्रहाः क्रांतिवृत्त एव भ्रमंति पातेन विक्षेपवशात्तु दक्षिणोत्तरं विक्षिप्यंते अत एव पातस्थाने वि
क्षेपाभावः पातस्थानं च क्रांतिमंडलविमंडलयोः संपातः तत्र च क्रांतिमंडल एव ग्रहो भ्रमति राहुपा
तयोरैकत्वस्थापनार्थो ग्रहणं यतश्चक्रशोधितस्य पातस्यैव राहुरिति संज्ञा । चंद्रादीनामित्यनेन सूर्य
स्य विक्षेपाभावः सूचितः तदेव विवृणोति उत्तराभिमुखमित्यादिना ग्रहादपरार्द्धे स्थितः पातो ग्र
हमुत्तराभिमुखं विक्षिपति ग्रहात्प्राग्भगणार्द्धे स्थितः पातो याम्यायां दक्षिणाभिमुखं ग्रहं विक्षिपति ।
यथा मंदस्पष्टो भौमः ७।८।५९।२८ राहुः १।२।१०।३४ स्वपातोनाद्ग्रहाज्जीवेति वक्ष्यमाणप्रकारेण
पातेनोनो भौमः ५।२८।५६।२४ अत उत्तरकेंद्रं तथा पातो हस्ताभ्यां कराग्रैः स्वमेरुपरार्द्धे स्थित इति भौ
माद्परार्द्धगः उत्तरकेंद्रत्वादुत्तरतो भौमो विक्षिप्यते एतदग्रे स्फुटीकरिष्यामः बुधशुक्र
योः शीघ्रोच्चादपरार्द्धगः पातः शीघ्रोच्चमुत्तरतश्चाकर्षति प्राग्भगणार्द्धगतो दक्षिणतः ततश्च
शीघ्रोच्चाकर्षितेन तौ बुधशुक्रौ शीघ्रौ यथोक्तवत् उत्तरतो दक्षिणतश्च विक्षिप्येते एतदुभयस्य स्पष्टी
करतो [illegible] व्याख्यास्यामः अथ मंडलवशादाकर्षणे भेदमाह ॥ महत्त्वान्मंडलस्यार्कः स्वल्पमेवापकृष्य
ते ॥ मंडलाल्पतया चंद्रस्तु तीव्र स्वपकृष्यते ॥८॥ भौमादयो ऽल्पमूर्तित्वाच्छीघ्रमंदोच्चसंज्ञितैः दैवतैर

28 पकृष्यंते स्युर्दूरमतिवेगिताः ।२०। अतो धनर्णं सुमहत्तेषां गतिवशाद्भवेत् । आकृष्यमाणास्ते रेवं
व्योम्नि यांत्यनिलाहताः ।२१॥ ॥रविमंडलस्यातिदीर्घत्वात्तत्स्थैर्यात्स्वल्पं किंचिदेवाकृष्य
ते चंद्रमंडलस्यातिदीर्घत्वात्तत्स्थैर्यात्तां कांचिदेवाकृष्यते लघुत्वाच्चंद्रो बहु पकृष्यते भौमादयश्च स्वल्पमूर्ति
त्वात् शीघ्रोच्चादिभिर्दूरमाकृष्यंते यतो तस्तेषां भौमादीनां महद्धनर्णं महत्फलं भवतीत्यर्थः तच्च ध
नर्णं गतिवशाद्भवति अजादिकेंद्रे धनं तुलादिकेंद्रे ऋणं भवति एवं ते कृष्यादिभिराकृष्यमाणा ग्रहाः प्रव
हवायुना प्रेरिताः आकाशे यांति · अथ गतेः स्पष्टत्वमाह ॥ ॥वक्रानुवक्रा विकुलाम
न्दा मंदतरा समा । तथा शीघ्रतरा शीघ्रा ग्रहाणामष्टधा गतिः ।२२। तत्रातिशीघ्रा शीघ्राख्या मंदामं
दतरा समा । ऋज्वीयं चविधा ह्येया याव क्रा सानुवक्रगा ।२३। तत्तमतिवशान्नित्यं यथादृक्तुल्यतां ग्र
हाः । प्रयांति तत्प्रवक्ष्यामि स्फुटीकरणमादरात् ।२४॥ ॥स्वशीघ्रोच्चाद्दूरस्थो ग्रहः स्वशीघ्रोच्चेनाकृष्टो
वक्रगतिर्भवति वक्ष्यति च दूरस्थितः स्वशीघ्रोच्चात् ग्रहः शिथिलरश्मिसमेतः कृष्टतनुर्भवेद्वक्र
गतिस्तद् इति दूरस्थितिस्थानं च मंदस्फुटो भौमादिग्रहः स्वशीघ्रोच्चाद्यद्यधिकस्तदा स्वशीघ्रोच्चं राशि २८
द्वादशयुतं कृत्वा तस्मिन् ग्रहं शोधयेत् स्वशीघ्रोच्चाद्यूने ग्रहे राशिद्वादशकं संयोज्य तस्मिन् स्वशीघ्रो
च्चं राशिद्वादशसंयुतं कृत्वा तस्मिन्ग्रहं शोधयेत् स्वशीघ्रोच्चाद्यूने ग्रहे द्वादशकं संयोज्य तस्मिन्स्व

शीघ्रोच्चं पातयेत् । पातिते चेत् ग्रहभ्रमकापराईगस्तदा शीघ्रोद्दूरगो ग्रहः एवमनुलोमविलोमाभ्यां दूरनि
कटस्थितिर्ज्ञेया तथा शीघ्रपरिधेर्महत्त्वाल्पत्वाभ्यामपि दूरनिकटस्थितिर्ज्ञेयेवस्ताति च महत्वाच्छीघ्रपरि
धिः सप्तमेभ्रमणे सुतोऽष्टमे जीवशशिजौ नवमे तु शनैश्चर इति यदा मंदस्फुटागतिः शीघ्रोच्चगति
फलेवतति तदा वक्रा साचयावत्स्ल ... तावद्भवति सैव फलस्य ह्रासेऽनुवक्रेत्युच्यते अनुलोमविलोम
संधौ मंदस्फुटसमे ... कलं विकलागतिः ... फले मंदा अति ... फले मंदतरा धनर्णसंधौ समा ध
नफले शीघ्रा अतिफले शीघ्रतरा तत्र मंदा मंदतरा समा शीघ्रा शीघ्रतरेति पंचप्रकारा गतिः ऋज्वी सरला
ज्ञेया सूर्यचंद्रमसोः सदा ऋज्वेव गतिः भौमादीनां त्वष्टधा यावक्रागतिः सानुवक्रगता तथा च वक्रानु
वक्रा विकलेति त्रिविधाऽन्याऽज्वगतिरित्यर्थः एवं विधिगतिवशाद्यथायेनप्रकारेण दृक्तुल्यतां दृग्गोच
रत्वं ग्रहा यांति तत्तत्स्फुटीकरणप्रकारमिदानीं वक्ष्यामि अथ स्फुटीकरणोपयोगिनीनां ज्यानामुत्पत्तिः

॥ ॥ राशिलिप्ताष्टमो भागः प्रथमं ज्यार्द्धमुच्यते । तत्तद्विभक्तं लब्धोनं मिश्रितं तद्द्वितीयकं ।
१५ । आद्येनैवं क्रमात्पिंडान् भक्त्वा लब्धोनितैर्युताः । खंडकाः स्युश्चतुर्विंशज्यार्द्धपिंडाः क्रमादमी । १६ ॥ ॥ एकराशेर्या लिप्तास्तासामष्टमोंऽशः प्रथमज्यार्द्धं भवति यथा एकराशेर्लिप्ता १८०० अ
ष्टमोंऽशः २२५ जातोऽष्टमो भागः एवमेव प्रथमज्यार्द्धं तत्तदेव प्रथमज्यार्द्धं २२५ तेनैव प्रथमज्यार्द्धेन स्व
भक्तं १ लब्धेन प्रथमज्यार्द्धं २२५ न्यूनं २२४ एतत्प्रथमज्यार्द्धेन २२५ युतं ४४९ जातं द्वितीयं ततो ज्यार्द्धं एवम

29 नेनैव क्रमेण पिंडात् द्वितीयादिज्याईपिंडान् आद्येन प्रथमज्याईपिंडेन भक्त्वा विभक्तलब्धेन प्रथमज्या
ई पिंड ऊनः कार्यः तेन च खंडेन द्वितीयादिखंडा योज्याः। एवं चतुर्विंशतिज्याईखंडाः कार्याः यथा द्वि
तीयखंड ४४९ प्रथमपिंड २२५ भक्तः अवाप्तात् रत्वात् लब्धं २ अनेन सर्वलब्धेन च २ प्रथमः खंडः २२५
ऊनः २२३ एव द्वितीयज्याईखंड ४४९ युतः ६७२ जातस्तृतीयो ज्याईखंडः एष ६७२ प्रथ
मखंड २२५ भक्तः लब्धं ३ सर्वलब्ध ५ योगेन ६ प्रथमखंड २२५ ऊनः २१९ एव तृतीयखंडे ६७२ युतः
८९० जातश्चतुर्थः खंडः अस्मादाद्यखंड २२५ लब्ध ४ सर्वलब्ध ६ योगो १० न प्रथमखंडे २२५ चतुर्थखंडे
८९० युतः ११०५ जातः पंचमखंडः अस्मादाद्यखंडा २२५ प्राप्त ५ सर्वपिंड १० योगो १५ नाद्यखंडेन २१० पंचम
खंडो ११०५ युतः १३१५ जातः षष्ठखंडः अस्मादाद्यात् प्राप्त ५ सर्वपिंड १५ योगः २० हीनाद्यखंडेन २०५ षष्ठः खं
डो १३१५ युतो १५२० जातः सप्तमखंडः अस्मात् १५२० दाद्यात् २२५ प्राप्त ६ सर्वपिंड योग २६ हीनाद्य २२५ खंडेन १९९
सप्तमः खंडो १५२० युतः १७१९ जातोऽष्टमः खंडः अस्मात् १७१९ दाद्यखंडेन २२५ लब्धं ८ अस्य ८ सर्वपिंड स
व २६ योगे नाद्य ३४ खंड २२५ ऊनः १९१ अनेनाष्टमः खंडो १७१९ युतः १९१० जातो नवमः खंडः अस्मात्
१९१० आद्यखंड २२५ लब्धं ८ सर्वपिंड ३४ योगो ४२ नाद्यखंडे १८३ न नवमः खंडो १९१० युतो २०९३ जातो द
शमः खंडः अस्मात् २०९३ आद्यखंडा २२५ प्राप्त ९ सर्वपिंड ४२ योग ५१ हीनाद्यखंड १७४ युतो दशमः खंडो २९
२०९३ जातएकादशः खंडः २२६७ अस्मादाद्यखंडा २२५ प्राप्त १० सर्वपिंड ५१ योग ६१ हीनाद्यखंडेन १६४ एको

दशः खंडो २२६७ युतो २४३१ जातो द्वादशः खंडो अस्मादाद्यखंडाप्त १० सर्वपिंड ६१ योग ७१ हीनाद्यखंडेन २५४
द्वादशः खंडो २४३१ युतो २५८५ जातः त्रयोदशः खंडः अस्मादाद्यखंडाप्त ११ सर्वपिंड ७१ योगो ८२ नाद्य
खंडेन १७० त्रयोदशः खंडो २५८५ युतो २७२८ जातश्चतुर्दशः खंडः अस्मादाद्यखंडाप्त १२ सर्वपिंड ८२
योगो ९४ नाद्यखंडेन १३१ चतुर्दशः खंडो २७२८ युतो जातः पंचदशः खंडः २८५९ अस्मादाद्यखंडाप्त
सर्वपिंड ९४ योगो १०६ नाद्यखंडेन ११९ पंचदशः खंडो २८५९ युतो २९७८ जातः षोडशः खंडः अस्मादा
द्यखंडाप्त १३ सर्वपिंड १०६ योगो ११९ नाद्यखंडेन १०६ षोडशः खंडो २९७८ युतो ३०८४ जातः सप्तदशः खं
डः अस्मादाद्यखंडाप्त १३ सर्वपिंड ११९ योगो १३२ नाद्यखंडेन ९३ सप्तदशः खंडो ३०८४ युतो ३१७७ जातो
ऽष्टदशः खंडः अस्मादाद्यखंडाप्त १४ सर्वपिंड १३२ योगो १४६ नाद्यखंडे ७९ नाष्टादशः खंडो ३१७७
युतो ३२५६ जातः ऊनविंशः खंडः अस्मादाद्यखंडाप्त १४ सर्वपिंड १४६ योगो १६० नाद्यखंडेन ६५ ऊना
विंशः खंडो ३२५६ युतो ३३२१ जातो विंशः खंडः अस्मादाद्यखंडाप्त १४ सर्वपिंड १६० योगो १७४ ना
द्यखंडेन ५१ विंशः खंडो ३३२१ युतो ३३७२ जात एकविंशः खंडः अस्मादाद्याप्त १४ सर्वपिंड १७४ योगो १८८
नाद्यखंडेन ३७ एकविंशः खंडो ३३७२ युतो ३४०९ जातो द्वाविंशः खंडः ~~[illegible]~~
अस्मादाद्याप्त १५ सर्वपिंड १८८ योगो २०३ नाद्यखंडेन २२ द्वाविंशः खंडो ३४०९ युतो ३४३१ जातस्त्रयो
विंशः खंडः अस्मादाद्यखंडा २२५ प्त १५ सर्वपिंड २०३ योगो २१८ नाद्यखंडेन ७ त्रयोविंशः खंडो ३४३१
युतो जातश्चतुर्विंशो ज्याखंडः ३४३८ अत्राद्यं नरकहतो व्रजलिखित तवाक्यं एकविंशखंडे २२वि

मुनि भद्र्यमनेत्राणि २२६१ चंद्राग्नि कृतदस्रकाः २४३१ पंचाष्टविषया दीलिः स्य ५८५ कुंजरश्विनगाश्विनः २७२८ X ३०५

30 मास्त्व २० षष्ठात् ६ पंचदशात् ५ दवि। सप्तमात् ७ द्वादशात् १२ सप्तदशात् ७ न्नार्द्धेत्तरं मतमिति अत्रार्द्ध
धिकेनफलेनहोतेमतः स्वष्टप्रकारेणज्योत्यत्तिंदर्पयिष्यामः अमीदस्युक्त्वा सर्वोत्पादितखंडान्
लिखति॥ ॥तत्वाश्विनोंकाधिकृता रूपभूमिधरर्त्तवः। खांकाष्टौ पंचसन्येशावाण
रूपगुणेंदवः।१७।भूनत्नोचनपंचैका छिद्ररूपमुनीदवः। वियद्वंद्वातिधृतयोगुणारंध्रावराश्वि
नः।१८।रंध्रपंचाष्टकयमा वन्हयद्धंकयमास्ततः। कृताष्टभून्यज्वलनानगाद्रिशशिवन्हयः।१९
।षट्पंचलोचनगुणा श्चंद्रनेत्राग्निवन्हयः। यमाद्रिवह्निज्वलनारंध्रशून्यार्णवाग्नयः।२०।
रूपाग्निसागरगुणावस्वत्रिकृतवन्हयः। स्पष्टार्थः। अथोत्क्रमज्यासाधनं। ओंस्यो त्क्रमेणव्या
सार्द्धादुत्क्रमज्यार्द्धपिंडकाः॥२२॥ ॥एतेक्रमज्यार्द्धपिंडाः व्यासार्द्धेउत्क्रमेणपात्याः तेउत्क्रमज्या
र्द्धपिंडा भवेयुः यथा व्यासार्द्धपिंडः ३४३८ चतुर्विंशपिंडेन ३४३७ ऊनः १ जातः प्रथमउत्क्रमज्यार्द्ध
पिंडः व्यासार्द्धपिंडः ३४३८ द्वाविंशखंडो ३४०९ नैः २९ जातो द्वितीयो व्यासार्द्ध पिंडः ३४३८ एकविंशखं
डेन ३३७२ ऊनः ६६ जातस्तृतीयः एवमन्येपुत्पाद्याः चतुर्विंशः सर्वोत्क्रएवस्याप्यः ३४३८ एवमु
त्पादितखंडानामंकानाह॥ ॥मुनयोरंध्रयमला रसषट्का मुनीश्वराः। द्व्यष्टैकाः
पषट्दस्राः सागरार्थहुताशनाः।२२। खबाणबाणनवाद्युर्थादिग्नगास्त्र्यर्थकुंजराः। नगांबरवियं
चंद्राः रूपभूधरपंचेशवाः। शरार्णवहुताशैका भुजगाक्षिशरेंदवः।२३। नवरूपमहीध्रैकागजेकांक ३०

निशाकराः। गुणाब्धिरूपनेत्राणि पावकाग्निगुणाब्धिनः। २४। वस्वर्णवार्धियमलास्तुरगार्णनगाब्धिनः।
नवाष्टनवनेत्राणि पावकैकयमाग्नयः। २५। अष्टाग्निसागरगुणा उत्क्रमज्यार्धपिंडकाः। २६।
॥ ॥ स्वष्ठ्यर्धी एते अथ स्पष्टतरप्रकारेण ज्योत्पत्तिः १४ ज्याः ३४३८ अस्या वर्गः।
११८२१९८४४ एषस्थानत्रयेस्थापितः। एकत्रैकेन गुणितः ११८२१९८४४ द्वितीयस्थाने।
११८२१९८४४ द्वाभ्यां गुणितः २३६४३९६८८ तृतीयस्थाने ११८२१९८४४ त्रिभिर्गुणितः ३५४
६५९५३२ एकगुणितं ११८२१९८४४ वेदैः ४ गुणस्य २८५४७८६८ मूलं ७१९ जाता त्रिंशद्भक्ता

[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

जातोष्टमः
खंडः एष
एवं ७१९ त्रि
ज्यायां ३४३८
पातितो ७१९
जात उत्क्रम

31 ज्यायाः कोटिज्या:। अथ त्रिगुणोच्चज्या वर्गात् २२६३९८८८ वेदै४ राप्तस्य ५९०९९२२ मूलं ३०७७।२ जाता
पंचचत्वारिंशदंशज्या। एवं द्वादशः खंडः। अनेन त्रिज्यो ३४३८ ना ८०८।५८ जाता उत्क्रमज्योद्वाद
शः खंडः। अथ त्रिगुणोच्चज्या वर्गात् ३५४५९५३२ वेदाप्तस्य ८८६४८८३ मूलं २९७७।२२ जाता ष
ष्ट्यंशानां ज्या एवं कोटिज्याः खंडः। एवं २९७७।२२ त्रिज्यायां ३४३८ पातितः ४६०।३७ जातोष्टम उत्क्र
मज्याखंडः त्रिपादांशाक्रमज्या ७९।१ वर्गः २९५४९६२ त्रिपादांशोत्क्रमज्या ४६०।३७ वर्गः २१२।६७।
४२ अनयोर्योगः ३१६७।२८।४२ अस्याः क्षिप्ते ४ लब्धः ७९१७।८२।१७ एषस्थाने द्वयेस्थापितः।
७९१७।८२।१७ एकत्र मूलं गृहीतं ८८९।५० ज्या ता पंचदशांशानां ज्याः चतुर्थः खंडः एव त्रिज्या
यां शुद्धः २५४८।१० जातो विंशः खंडः उत्क्रमज्यायाः २५४८।१० द्वितीयस्थानस्थः ७९१७८२।१७ त्रि
ज्या ३४३८ वर्गः ११८१९८४४ शोधितः ११०२६०६१ अस्य मूलं ३३२०।५१ जाता पंचसप्तत्यंशानां ज्याः
विंशः खंडः एवं त्रिज्यायां शुद्धो ११७।९ जातश्चतुर्थ उत्क्रमज्याखंडः पंचदशांशाक्रमज्या ८८९।५०
वर्गः ७९१८०२।२१ उत्क्रमज्याचतुर्थखंड ११७।९ वर्गः १३७२४।१७ अनयोर्योगः ८०५५३१।२८ अस्याः
क्षिप्ते ४ लब्धः २०१३८२।५२ एवं द्विः एकत्र मूलं ४४८।४५ जाता सार्द्धसप्तांशानां ज्याः द्वितीयः खंडः ३१
एवं ४४८।४५ त्रिज्यायां ३४३८ शुद्धो २९८९।१५ जातो द्वाविंशः खंडः उत्क्रमज्यायाः द्वितीयस्थान
स्थः २०१३८२।५२ त्रिज्यावर्गे ११८१९८४४ पातितः ११६१८०४६१।८ अस्य मूलं ३४०८।३५ जाता

साई घशीति भागानां ज्या द्वाविंशः खंडः एवं ३४०८।३५ त्रिज्यायां शुद्धो २९।२५ जातो द्वितीयउ
त्क्रमज्याखंडः साई सप्तांशज्या ४४८।४५ वर्ग २०१२७६।३४ उत्क्रमज्या द्वितीयखंड २९।२५
वर्ग ८६५।२० अनयोर्योगः २०२२४१।५४ अस्याब्धि ४ लब्धं ५०५६०।२९ एवं द्विः एकत्र मू
लं २२४।५२ जाता पादोनां शचतुष्टयज्याः प्रथमः खंडः एवं २२४।५२ त्रिज्यायां ३४२८ शुद्धः
३२०३।८ जात त्रयोविंशतिरुत्क्रमज्याखंडः द्वितीयस्थानस्थः ५०५६०।२९ त्रिज्यावर्गे
११८१९८४४ शोधितः ११७६८२८३।३१ अस्य मूलं ३४२०।२८ जाता सपाद षड्भांशानां
ज्याः त्रयोविंशः खंडः एवं ३४३०।२८ त्रिज्यायां ३४२८ शुद्धः ७।२२ जातउत्क्रमज्याप्रथमः खंडः
पंचसप्तांशज्या ३३२०।५२ वर्गः ११०२८०४४।४३ उत्क्रमज्या विंशः खंडः २५४८।१० वर्गः ६४९८२०।५२
२२ अनयोर्योगः ७५२२२९८।४ अस्याब्धि ४ लब्धं ४३८०२९९।३१ एवं द्विः एकत्र मूलं २०९२।४५
जाता साई सप्तत्रिंशद्दशांनां क्रमज्या [illegible] दशमः खंडः १२४५।०५ द्वितीयस्थानस्थः ४३८०२९९।
३१ त्रिज्यावर्गे ११८१९८४४ शुद्धः ७४३९५४४।२९ अस्य मूलं २७२७।३३ जाता साई द्विपंचाशद्दशानां
क्रमज्या एवं चतुर्दशः खंडः एवं २७२७।३३ त्रिज्यायां ३४३८ शोधितो ७१०।२७ जातउत्क्रमज्या दशमः
खंडः साई सप्तत्रिंशद्दशज्या २०९२।४५ वर्गः ४३८०३००।२० उत्क्रमज्या दशमः खंडः ७१०।२७ वर्गः ५०
४७२९।१२ अनयोर्योगः ४८८५०३९।३२ अस्याब्धि ४ लब्धं १२२१२५९।५० एवं द्विः एकत्र मूलं।
खंडः एवं २०९२।४५ त्रिज्यायां ३४३८ शुद्धः जातउत्क्रमज्याखं चतुर्दशः ५

३१ ११०५।६ जातापादोनोनविंशत्यंशानां क्रमज्या पंचमः खंडः एव ११०५।६ त्रिज्यायां ३४३८ शोधिता ३३२
१५४ जात उत्क्रमज्या नवविंशतिखंडः द्वितीयस्थानस्थः १२२१२५९।५० त्रिज्यावर्गो ११८१९८४४ शोधि
तः १०५९८८५८४।१० अस्य मूलं ३२५५।३३ जातासपादैकसप्तत्यंशानां क्रमज्या षडूनविंश खंडः। एवं
३२५५।३३ त्रिज्यायां ३४३८ शोधिते १८२।२७ जात उत्क्रमज्या पंचमः खंडः सार्द्ध द्वापंचाशदंशानां
ज्या २७२१।३३ वर्ग ७४०३९५४०।१३ उत्क्रमज्या चतुर्दशः खंडः सार्द्ध २७४५।०५ वर्गः ७५००९२४९।१०
अनयोर्योगः ८२४८१८९९।२३ अस्यार्द्धं ४ लवः २३१२२६७।२० एवं द्विः एकत्र मूलं ५२०।३५ जा
ता सपादषट्विंशत्यंशानां क्रमज्या सप्तमः खंडः एवं ५२०।३५ त्रिज्यायां ३४३८ शोधिते २९१७।
२५ जातः सप्तदशः खंडः उत्क्रमज्यायां। द्वितीयस्थानस्थितः २२२२२६७।२० त्रिज्या ३४३८।
वर्गे ११८१९८४४ शोधितः ९५९७६४६।४० अस्य मूलं ३०९३।२७ जातापादोनचतुःषष्ठ्यंशानां
क्रमज्या० सप्तदशः खंडः एवं ३०९३।२७ त्रिज्यायां ३४३८ शुद्धो ३५४।३४ जातः सप्तम उत्क्रमज्या
खंडः सार्द्ध द्वाशीतिभागानां ज्या ३४०८।३५ वर्गः ११६१८४४०।२० उत्क्रमज्या द्वाविंशतिखंड २९८१।४
वर्गः ८९३५६१५।३२ अनयोर्योगः २०५५४०५५।५३ अस्यार्द्धं ४ लवः ५१३८५१३।५८ एवं द्विः एक
त्र मूलं २२६६।५० जाता सपादैकचत्वारिंशदंशानां ज्या० एकादशाः खंडः एवं २२६६।५० ३२
त्रिज्यायां ३४३८ शोधिते जात उत्क्रमज्या त्रयोदशः खंडः ११७१।१० द्वितीयस्थानस्थः ५१३८५१३।

५८ त्रिज्या ३४३८ वर्गे ११८१९८४४ शोधित: ६६८१३२०।२ अस्य मूलं २५८४।४८ जात: पादोनो नवपंचा-
शद्दशानां क्रमज्या त्रयोदश: खंड: एवं २५८४।४८ त्रिज्यायां ३४३८ शोधितो ८५३।०५ जात उत्क्रमज्यैका-
दश: खंड:। एता ज्या अष्टक्रमज्यात उत्पन्ना:। अथ पंचचत्वारिंशद्दशा क्रमज्या २४३१।२ वर्ग: ५९०-
९९२३ उत्क्रमज्या द्वादश: खंड: १००६।५८ वर्ग: १०१३४८१।५२ अनयोर्योग: ६९२३९०४।५२ अ-
स्यार्द्धे ४लव: ७३०९७६।१३ एवं हि: एकत्र मूलं ३५७३९ जाता सार्द्धद्वाविंशत्यंशानां क्रम-
ज्या षष्ठ: खंड: एवं २३१५।३९ त्रिज्यायां ३४३८ शोधितो ११२२।२१ जात उत्क्रमज्या षोडश: खं-
ड: द्वितीयस्थानस्थ: ७३०९७६।१३ त्रिज्या ३४३८ वर्गो ११८१९८४४ शोधित: १०८८८६७।४७ अ-
स्य मूलं ३१७६।१७ जाता सार्द्धसप्तषष्ट्यंशानां क्रमज्या अष्टादश: खंड: एवं ३१७६।१७ त्रिज्याया
३४३८ शोधितो २६१।४३ जात उत्क्रमज्या षष्ठ: खंड: सार्द्धद्वाविंशत्यंशानां क्रमज्या १३१५।३९
वर्ग: ७३०३४।५५ उत्क्रमज्या षष्ठ खंड: २६१।४३ वर्ग: ६८४६५।३६ अनयोर्योग: ७९९४२०।-
३१ अस्यार्द्धे ४लव: ४४९८५७।३१ एवं हि: एकत्र मूलं ६७०।४२ जाता सपादैकादशानां क्रम-
ज्या तृतीय: खंड: एवं ६७०।४३ त्रिज्यायां ३४३८ शोधितो २७६७।१७ जात उत्क्रमज्यैकविंश:
खंड: द्वितीयस्थानस्थ: ४४९८५७।३१ त्रिज्या ३४३८ वर्गो ११८१९८४४ शोधित: ११३६९९८६।२९
अस्य मूलं ३३७१।५६ जाता पादोननवसप्तत्यंशानां क्रमज्या एकविंश: खंड: एवं त्रिज्यायां शो-
धितो ६६।० जात उत्क्रमज्या तृतीय: खंड: सार्द्धसप्तषष्ट्यंशानां क्रमज्या ३१७६।१७ वर्ग:।

33 १००८८७७५।४८उत्क्रमज्याष्टादशः१४खंडः२२२२।२७वर्गः४५०४३८८।३०अनयोर्योगः१८५१३
१८५।२० अस्याश्छिन्नलवः ३८४८२८८।२० एषाद्धिः एकत्र मूलं २९२०।२ जा तापादोन चतुस्त्रिंशता
नांक्रमज्या नवमः खंडः एष त्रिज्यायां शोधितो २५२७।५७ जातउत्क्रमज्या पंचदशः खंडः द्वि
तीयस्थानस्थः ३८४८२८८।२० त्रिज्या ७७३८ वर्गे ११८१९८७४ शोधितः ८७३५५७।४० अस्यमू
लं २८५८।३५ जाता सपादषट् पंचाशदंशानां क्रमज्या पंचदशः खंडः एष २८५८।३५ त्रिज्यायां ३४३८
५६ शोधितो ५७९।२५ जातं उत्क्रमज्या नवमः खंडः एतासां द्वादशः खंडो मूलं एवं स्पष्टतरप्रकारेण
ज्यास्साधिता अत्रोपपत्तिः समायां भूमौ दृष्ट त्रिज्यामितांगुलप्रमाणेन कर्कटेन वृत्तं विलेख्य

क्रमज्या	८	४	२	१	२४	२९	७	१२	२२	६	१	१५	१६	२०	२२	२२	१०	०५	२२	७	१८	२१	९
उत्क्रमज्या	१६	२०	२२	२३	२३	२०	७	११	१२	१२	२२	९	८	४	२	१	२४	२९	१२	७	६	२	१५

दिक् चिह्निते तद्वृत्तं चक्रांशैरंकितं कुर्यात् तत्रैकस्मिन् वृत्तचतुर्थांशे नवतिभागा भवंति ततो यावं
तिज्या हानिकार्या स्तितावद्धि भागेकेंद्रत्तेच तुर्थांशं विभज्य तत्र चिन्हानि कार्याणि तथा अत्रैच
तुर्विंशतिज्याः साध्याः तत्र च तुर्विंशतिभागाः कार्याः एवं द्वितीय चतुर्थांशेपि ततो दिक् चिह्न 33
द्वयोपरिस्थसूत्रं ज्यारूपं भवति एवं च तुर्विंशतिज्या भवंति तासामर्धानि ज्याहानि द्वयोर्द्ध
त्रिज्या सा कर्णः कल्प्यः या भुजज्या सा भुजः तयोः कर्णभुजयोर्वर्गांतरं कोटिज्येरस्य सिद्धः। तत्रय

स्पा०

भुजकोटिज्ये ते भुजकोट्यंशानां क्रमज्ये स्तः तत्र भुजज्या त्रिज्यायां शोध्यते तदा तावत्कोट्यंशानां उत्क्रम
ज्या च विशिष्यते एवं कोटिज्यया नात्रिज्या विशिष्ठ भुजांशानां उत्क्रमज्या तत्र पूर्वलिखितवृत्ते चिह्नयो
रुपरिगतं स्फुटं उत्क्रमज्या तदुपरि चिह्नयो मध्ये यच्छत्र खंडं तस्यां वंधनुः चापमध्यस्य ज्या मध्यस्य च यदन्तरं
वा तत्कारं स्यात् उत्क्रमज्या यदि त्रिज्या ३०३९० भुज त्रिज्ये वृ ३४३८ तयोर्वर्ग ११८१९०८४४ योग २२६३९६८८
पदं ४८६२१४२ वृत्तान्तर्वर्त्ति समचतुरस्रस्य भुजो भवति सैव नवतिभागानां ज्या एतदर्धं २४३११२१ भागांशा
अतो वर्गयोगस्य चतुर्थांशः कृतः ५९०९९२२ तदेव त्रिज्या वर्गार्धं अतएतन्मूलं द्वारवेदभागानां
ज्येत्युपपन्नं अथ त्रिंशद्भागानां ज्या त्रिज्यार्धमिति स्यात् १७१९ तस्याः कोटिभागानां ६० ज्यापष्टिभा
गानां ज्या स्यात् वृत्तान्तः पातसमखंडस्तस्य भुजो व्यासार्धमितः स्यात् अथोक्तं बीजगलिते त्रिघ्नाका
ग्निनभश्चन्द्रैः १०३९२२ स्त्रिवाणाष्टयुगाष्टभिः ८४८५२ वेदाग्निपंचखाश्वेभैः ८७०५३४ खाभ्राभ्ररव
रसैः ६०००० क्रमात् वाणेषुनखवाणैः ५२०५५ द्विद्विनन्देषुसागरैः ४५९२२ कुरामदशवेदैश्च ४१०३१
वृत्तव्यासे समाहते खखखाभ्रार्क १२०००० संभक्ते लभ्यन्ते क्रमशो भुजाः वृत्तान्तस्त्र्यस्रपूर्वाणां नवास्रां
तं पृथक् पृथगिति यथा वृत्तव्यासार्धं ३४३८ वह्निरपुते ६०००० गुणितं २०६२८०००० खखखाभ्रार्कैः ।
१२०००० भक्तं १७१९ लब्धं तदेव वृत्तान्तः पातिसमषट्कोणस्य भुजः अतस्त्रिज्यार्धमेव त्रिंशद्भागानां
ज्येत्युपपन्नं अनुवृत्तान्तर्व्यासचतुर्थांशं त्यक्त्वा चिह्नं कुर्यात् तच्चिह्नोपरि उभयतो वृत्तलग्नात्तिर्यग्रे

34 खांप्रसारयेत् सैवैकोभुजः अतस्तत्र समानान्तरेखा या तिर्यग्रेखोत्पन्नह्य पर्यंतिमन्यो भुजो कुर्यात्
एवं त्र्यस्रमेकमुत्पाद्य व्यासरेखामूलादपरत्र्यस्रे कृते वृत्तान्तः समान्तरं कोणषट्कं स्यात् अत्रोक्ततिर्य
ग्रेखा द्वपस्य अस्तादिष्टयोर्यो वृत्तसंपातौ तद्वद्वंसूत्रं व्याससमितं सकर्णः एकदिक्स्थरेखासंपातयोरंत
रं भुजो व्यासार्धमितः पातिर्यग्रेखा मंडलमध्यपातिसमचतुरस्रस्य भुजं मिता सा कोटिः एवास्त्वत्तृती
यभागोन परिधिजो वायतो नयामंडलतृतीयांशस्थितो नवषष्ट्यंशानां ज्येत्युपपन्नं एवं यावदंशानां
ज्या कार्या तावतां क्रमोत्क्रमज्यावर्गयोगमूलार्धं तावदंशानां ज्यार्धं भवति यथा यदि पंचदशभागानां।
ज्या कार्या तदा त्रिंशद्भागानां क्रमज्या ७१९ वर्गः ५१६५४८८। उत्क्रमज्या ४८०।३७ वर्गः २२२६७।८२ अनयो
र्योगः ३१६७२२८।४२ अस्यार्धं लब्धः ७८२७८२।२१ अस्य मूलं ८८९।५० जातानां पंचदशभागानां ज्या
अत्रोपपत्तिः क्रमज्या भुजः उत्क्रमज्या कोटिः तयोरंतनिबद्धसूत्रं कर्णः स एव त्रिंशद्भागानां ज्यया
रचितमंडलान्तःपातिसमचतुरस्रस्य भुजः यदा युग्मे वत्रिंशद्भागानां ज्या तदा पंचदशभागानामेतद
र्धं ज्येत्युपपन्नं तया मंडलतृतीयांशास्थितोऽतः षष्ठ्यंशानां ज्येत्युपपन्नं एवं यावदंशानां ज्या कार्या ताव
तां क्रमोत्क्रमज्यावर्गयोगमूलार्धं तावदंशभागानां ज्या कार्या तदा त्रिंशद्भागानां क्रमज्या ७१९ वर्गः ५१६५४ ३४
९८९ उत्क्रमज्या ४८०।३७ वर्गः २२२६७।८२ वर्गयोर्योगः ३१६७२२८।७ अस्य मूलं ७१९।५० अस्यार्धं ८८९।
५० जातानां पंचदशभागानां ज्या अत्रोपपत्तिः क्रमज्या भुजः उत्क्रमज्या कोटिः तयोरंतनिबद्धसूत्रं वै कर्णः
स एव त्रिंशद्भागानां ज्यया रचितमंडलान्तःपातिसमचतुरस्रस्य भुजः यदीयमेव त्रिंशद्भागानां ज्या तं

दापंचदशभागानामेतदर्द्धज्येत्युपपन्नं एवमन्यत्रापि ॥ अथ क्रांतिसाधनं ॥ ॥ परमापक्रमज्या तु सप्त
रंध्रगुणेंदवः । तद्गुणा ज्या त्रिजीवाप्ता तच्चापं क्रांतिरुच्यते ॥ ३१ ॥ ॥ त्रिभिरूनानि चतुर्दशशतानि परमाप
क्रमज्या १३९७ अनया इष्टज्या गुणनीया त्रिज्यया भाज्या लब्धं क्रांतिज्या स्यात् ततः साधनुः क्रांतिः स्या
त् उदाहरणं एकराशिज्या ७१९ परमापक्रमज्यया १३९७ गुणिता २४.१८४३ त्रिज्यया ३४३८ भक्ता
६९८।२० लब्धा क्रांतिज्या अस्या वक्ष्यमाणप्रकारेण धनुः १०२।२५ जाता क्रांतिः अत्रोपपत्तिः पर
मक्रांतिचतुर्विंशतिधनुरंशानां परमक्रांतिज्या । अथ स्पष्टीकरणार्थं केंद्रभुजकोटिकल्पनमाह
॥ ॥ ग्रहं संशोध्य मंदोच्चात् तथा शीघ्राद्विशोध्य च । शेषं केंद्रं पदे तस्माद्भुजज्या
कोटिरेव च ॥ २८ ॥ गताद्भुजज्या विषमे गम्यात्कोटिः पदे भवेत् । समे तु गम्याद्भुजज्या कोटिज्या
तु गताद्भवेत् ॥ २९ ॥ ॥ मंदकर्मणि ग्रहं मंदोच्चे पातयेत् । शीघ्रकर्मणि ग्रहं शीघ्रोच्चे पातयेत्
तत्र यच्छेषं तत्केंद्रसंज्ञं स्यात् । तस्मात्केंद्रपदात् भुजज्या कोटिज्या कर्तव्या तत्र केंद्रस्य त्रिभिस्त्रिभि
राशिभिः केंद्रपदं कल्प्यं ~~भुजज्या भुजज्योत्पन्ने [illegible] भुजज्येत्युक्तं तत्करणमेवाह गताद्धिति~~ विष
~~[illegible]~~ भुजज्या भुजज्या
रंभे दोष्फलाद्भुजज्येत्युक्तं तत्करणमेवाह गताद्धिति विषमे पदे केंद्रं विषमपदस्य सा हि गता तस्मात्केंद्रभ
क्तात् भुजज्या कल्प्या विषमपदस्य केंद्रभुक्तमेव भुज इत्यर्थः गम्यात्केंद्रस्य भोग्यात् कोटिः कल्प्या वि

षमपदस्थितकेंद्रस्यभोग्यमेवकोटिरित्यर्थः एवंकेंद्रे समपदेस्थिते केंद्रस्य गम्याद्भोग्यात् भुजज्याकल्प्या
35 तथाच राशित्रये याति भुजस्य यच्छेषं सा कोटिरित्यर्थः अत्रोपपत्तिः समायां भूमौ त्रिज्यामितकर्क
टकेन वृत्तं विधाय भांशैरंकितं तन्मध्ये पूर्वापरं याम्योत्तरं च रेखां कृत्वा प्राचीतः सव्यक्रमेण पदानि
कल्प्यानि वृत्तरेखावस्थानि तेषां चायुग्मयुग्मसंज्ञा च तत्र प्रथमपदे प्राचीसकाशादभीष्टस्थाने विं
दुः कार्यः तद्विंदोः प्राच्यपरयोर्यदंतरं सा दोर्ज्या विंदोर्याम्योत्तरयोश्च यदंतरं सा कोटिज्या तदनुभी
भुजकोटिसंज्ञे ततो यथा यथा सविंदुरग्रतश्चाल्पते तथा तथा दोर्ज्योपचीयते कोटिज्यापचीयते
विंदोपदांतप्राप्ते कोटेरभावः दोर्ज्या च व्यासार्द्धतुल्या स्यात् ततो द्वितीयपदे कोटेरुपचयो दोर्ज्यायाश्चाप
चयः पदांते कोटिपरमा भुजस्याभावः अत एवोक्तं गताद्भुजज्या विषमे द्वितीये भुजाग्रस्पर्शांतर ऊ
र्ध्वाधरवाहुरेव कोटिः गणिते तु इष्टाहोर्यः स्यात्तस्याद्भुजा दिङ्मंतरे वाहुः त्र्यस्रे चतुरस्रे वा सा कोटिः
तथात्र धनुर्विज्यारूपं यदंतरं सा क्रमज्या १० शररूपं यदंतरं सोत्क्रमज्या वाणेन व्यासार्द्धं तदितरस्पा
तुल्यं स्यात् ज्योनं व्यासार्द्धं तदितरवाणतुल्यं स्यात् व्यासार्द्धं ३४३८ राश्यर्द्धोत्क्रमज्यारूपवाणेन ७०७ ऊ
नं २७३१ क्रमज्या जाता व्यासार्द्धं ३४३८ राश्यर्द्धज्यया ८९० ऊनं २५४८ जाता कोट्युत्क्रमज्या वाणरूपा ३५
एतत्सर्वं पूर्वलिखितवृत्ते दर्शनीयमिति सर्वमुपपन्नं अथ ज्यास्पष्टीकरणं॥ ॥
लिप्तास्तत्त्वयमैर्भक्ता लब्धं ज्यापिंडकं गतं । गतगम्यांतराभ्यस्तं विभजेत्तत्त्वलोचनैः २२५ । तदवाप्तफ

कोत्तिंतातन्नौरति अत्र भुजास्ति पक्ष्य ऊर्ध्वधरा कोटिः ९
यथा ४

लं योज्यं ज्यापिंडे गतसंज्ञके। स्यादुत्क्रमज्याविधिरयमुत्क्रमज्यास्वपि स्मृतः।२१॥ ॥यस्य ज्याका
र्मुकमिष्टा तस्य लिप्ताः कार्याः ताश्च पंचविंशत्यधिकशतद्वयेन विभजेत् तत्र यल्लब्धं तत्तत्तं ज्यापिंडं स्या
त् यच्छेषं गतगम्यखंडयोरंतरेण संगुण्य तत्त्वलोचनैर्विभज्य लब्धं तेन तज्ज्यापिंडे योज्यं। एवं स्फुटा
ज्या भवेत् एवप्रकारः क्रमज्यासूत्क्रमज्यासु च ज्ञेयः। उदाहरणं जिनांशाः २४ कलाः १४४० तत्त्वयमै २२५
र्भक्ताः लब्धं गतं ज्यापिंडं ६ शेषं ९० गत६ खंड १२१५ गम्य ७ खंड १४२० योरंतरेण २०५ गुणितं १८४५०
तत्त्वलोचनैः २२५ र्भक्तं ८२ गतपिंडे १२१५ योजितं १२९७ जाता परक्रांतिज्या अत्रोपपत्तिः अत्र किल
चतुर्विंशतिज्याः हानि वृत्तचतुर्थांशे तत्र कलाश्चतुः पंचाशच्छतानि ५४०० आसां चतुर्विंशतिभाग
स्तत्त्वाश्विनः २२५ अतो गतास्तत्त्वाश्विहताः गतज्या लभ्यते अथ वृत्ते ज्या गतयोरंतरं तत्त्वाश्वि
कलामितधनुःखंडः यद्यनेन धनुःखंडेन गतागतज्यांतरतुल्यं ज्याखंडं लभ्यते तदा शेषकलातु
ल्येन किमिति फलेन युक्ता सती गतज्या इष्टा स्यादिति सर्वमुपपन्नं अथ धनुःकरणमाह ॥
॥ ॥ज्यां प्रोह्य तत्त्वयमलैर्हृत्वाप्तहृद्विवरोद्धृतं। संख्यातत्त्वाश्विसंवर्गे संयोज्यं धनुरुक्
मतो।२२॥ ।यस्य धनुः कार्यं तस्मिन् या ज्या प्रयुज्यते ताः शोधयेत्। शेषं तत्त्वयमलैः संगुण्य
पतितखंडागमिमखंडयोरंतरेण विभज्य लब्धेन यत्संख्यः खंडः पतितस्तत्संख्यया गुणितत्तत्त्वा
श्वियोगे धनुः स्यात्। उदाहरणं। परमक्रांतिज्याया धनुः क्रियते १२९७ अस्यां षष्ठी ज्या १२१५ प

36 तिता ग्रोबं ८२ तत्स्वयमेले: २२५ गुणितं १०४५० पतितद्दस्वंडं ३२२ स्वगम्यस्वंडं ५२० योरंतरेण २०५ भक्तो
९० तत्वाम्बिन: २२५ पतितखंडं दसंख्यया ६ गुणिता: १३५० लब्धेन ९० युक्ता: १४४० जातं धनु: अत्रो
पपत्ति: ज्योत्पत्तिवैपरीत्येना तो विलोमगत्या तेनैव वासना अथ परिधीनाह। तत्रादौ सूर्याचंद्रमसो:
॥ ॥रविमंदपरिधंप्रमाणमनव: शीतगोरदा:। युग्मांते विषमांते च नखलिप्तोनितास्त
योः १३२॥ ॥रवेर्मंदपरिधंप्रमाणमनुश्चतुर्दश १४ चंद्रस्य द्वात्रिंशत ३२ एते च युग्मांते ज्ञेया: युग्मपरि
धंप्रमाणमित्यर्थ: विषमांते विषमपरिधंप्रमाणंकृतयो: सूर्याचंद्रमसोर्विंशतिकलोनिता: पूर्वोक्ताएवां
शा ज्ञेया: रवे: १३।४० चंद्र ३१।४० इह ग्रहफलोपपत्त्यर्थं मंदोच्चनीचवृत्तानि पूर्वै: कल्पितानि तेषां
मेतावंतो भागा: प्रमाणानि अत्रोपपत्ति: ग्रहस्य यंत्रवेधाविधिना यत्परमं फलमुत्पद्यते तस्य ज्यापर
मफलज्या वोपपद्यते अत: फलज्यातुल्यव्यासार्द्धेन यद्वृत्तमुत्पद्यते तन्नीचोच्चवृत्तं तत्परिधिस्त्रैराशि
केन यदि त्रिज्याव्यासार्द्धे भांशा: ३६० तदैतस्य फलज्याव्यासार्द्धे किमिति यथा लीलावत्यां व्यासे भनंदा
ग्निहते विभक्ते खबाणसूर्यै: परिधिस्तु सूक्ष्म इति व्यास: ६०।६ भनंदाग्नि ३९२७ गुणित: २३००
२०५२ खबाणसूर्यै: १२५० भक्त: २१६०१ लब्धा: परिधिकला:। आभ्य: षष्टि ६० भागे लब्धांशा: ३६
३६० रवेरंत्यफलज्या १२० ।३।१० बहिर्गुणिता २६१।२ जाता नीचोच्चवृत्तव्यास: एव २६१।२ भनंदा
ग्नि ३९२७ गुणित: १०२५०७१५४ खबाणसूर्यै: १२५० भक्त: ८२० जाता: परिधिकला: आभ्य: षष्ट्या ६

भागे २२।४० जाताः परिध्यंशाः अथ चंद्रांत्यफलज्या २०।२।४८ एषा द्विगुणा ६०५।३६ जाता नी
चोच्चवृत्तव्यासः एष भमनंदाग्नि ३९८७ गुणः २३७९८२९।३ खखबाणसूर्यैः १२५०० भक्तः १९० जा
ताः परिधिकलाः आभ्यः षष्ट्या भागे ३१।४२ जाताः परिध्यंशाः अत्र सुगमत्वार्थं प्रकारांतरेणा
नीयते व्यासार्द्धं १२०।३ अब्धि ४ गुणं ४८०।१२ त्रिसप्तत्यधिकपंचशत ५७३ भक्तं २।४० जाताः पूर्वा
नीताः परिध्यंशाः। अथ भौमादिपरिधयः॥ युग्मांतेऽर्थाद्रयः खाग्नीसुराः सूर्या नवार्णवाः।
ओजे खगा वसुयमा रदा रुद्रा गजाब्धयः ।२४। कुजादीनामतः शैघ्रा युग्मांतेऽर्थाग्निदस्रकाः।
गुणाग्निचंद्राः खनगा द्विरसाक्षीणि गोऽग्नयः ।२५। ओजांते द्वित्रिकयमा द्विविश्वे यमपर्वताः।
खर्तुदस्रा वियद्वेदाः शीघ्रकर्मणि कीर्तिताः ।२६॥ इति ॥ भौमस्य मंदयुग्मपरिधिः
७५ बुधस्य ३० गुरोः ३३ शुक्रस्य १२ शनेः ४९ भौमस्यौजपरिधिः ७२ बुधस्य २८ गुरोः ३२ शुक्र
स्य ११ शनेः ४८॥ अथ शीघ्रा युग्मपरिधयः भौमस्य २३५ बुधस्य १३३ गुरोः ७० शुक्रस्य २६२ श
नेः ३९। अथ शीघ्रा ओजपरिधयः भौमस्य २३२ बुधस्य १३२ गुरोः ७२ शुक्रस्य २६० शनेः ४०।
अत्रोपपत्तिः भौममंदयुग्मांतफलज्या ७।१६।१५ अत्र लघुप्रकारेणोदाह्रियते ज्या ७।१६।१५
अब्धि ४ गुणा २९।५।० हारेण ५७३ भक्ता ७५ जाता भौममंदयुग्मपरिधिभागाः भौमस्य मंदो

37 जेफलज्या ६८७।३८ बाहि० गुणा ४२५६ हारेण ५७३ भक्ता ७२ जाता भौममंदौजपरिधंशाः अथ भौ
मस्य शीघ्रयुग्मांत्यफलज्या २२७४।१५ बाहि० गुणा १२४६५५ हार ५७३ भक्ता २३५ जाता भौमशीघ्र
युग्मपरिधंशाः भौमस्य शीघ्रौजांत्यफलज्या २२२५।३८ बाहि० गुणा १३२९३६ हारेण ५७३ भक्ता।
२३२ जाता भौमशीघ्रौजपरिधिभागाः एवमन्येषामपि परिधंशाः आनेयाः अंत्यफलज्यानयनं
च सिद्धांतशिरोमणौ। त्रिज्योद्भवं फलमिहांत्यफलस्य जीवेति त्रिज्या पृथक् पृथक् ग्रहाणां मंदशी
घ्रपरिधिभागैर्गुण्याः भांशैर्भज्याः अंत्यफलज्या भवतीत्यर्थः यथा त्रिज्या ३४३८ सूर्यस्य मंदपरि
धिभागे १४ गुणिता ४८१३२ भांशै ३६० भक्ता १३३।४२ जाता रवेर्युग्मांत्यफलज्या पुनस्त्रिज्या ३४३८
रवेरोजपरिधंशैः १३।४० गुणिता ४६९८६ भांशै ३६० भक्ता १३०।३१ जाता रवेरोजांत्यफलज्या एवमन्या
कार्या इति सर्वमनवद्यं। अथ परिधिस्फुटीकरणं॥ ॥ओजयुग्मांतरगुणा भुजज्या
त्रिज्ययोद्धृता। युग्मे वृत्ते धनर्णं स्यादोजादूनेधिके स्फुटं॥ ३७॥ ॥ओजपरिधंशानां युग्मपरि
धंशानां चांतरेण भुजज्यां गुणयेत्। त्रिज्यया विभजेत् तत्र युग्मपरिधंशादोजपरिधंशे न्यूने जाता
त्तदा लब्धं युग्मपरिधंशेषु ऋणं कार्यं यदि युग्मपरिधंशा ओजपरिधंशेभ्योधिकास्तदा लब्धं यु ३७
ग्मपरिधंशेषु धनं कार्यं एवं कृते स्पष्टपरिधंशा भवंति। अथ भुजकोट्योः फलानयनं॥
॥ ॥तद्गुणो भुजकोटिज्ये भगणांशविभाजिते। तद्भुजज्याफलधनुर्मांदं लिप्तादिकं फलं।

।२८॥ ॥तन्मूलोत्तेन स्फुटपरिधिना गुणिते भुजज्याकोटिज्ये भगणांशैर्हरणीये तत्र लब्धं यद्भुजज्याफलं तं
तस्य धनुः कार्यं तदेव लिप्तादिकं मंदफलं स्यात् अस्योपपत्तिः एवमानीतं यद्भुजफलं तद्भुजज्या स्यात्
त्वाज्यारूपं जातं धनूरूपमहेतसा जात्यकरणाय फलस्य धनुः करणमिति किंच समभूमौ
त्रिज्यामितकर्कटेन लिखितकक्षावृत्तस्य भगणांशांकितस्य मध्ये ग्रहमध्ये ग्रहमध्यगतिपंचु
दशांशेन मंडलं कुर्यात् ततो ग्रहमुच्चं च दत्वा भूवृत्तमध्योच्चोपरिगतां रेखां मुच्चाख्यां कक्षावृत्तो
भयतो गतां कृत्वाऽन्यां तिर्यग्गरेखां च कुर्यात् ततो भूमिमध्यादंत्यफलज्यां मुच्चाभिमुखीं दत्वा त
दग्रात् त्रिज्यामितकर्कटेन प्रतिमंडलवृत्तं लिखेत् । तन्मंडलेपि यत्रोच्चरेखासंपातस्तत्रोच्चं त
तः प्रतिमंडलमध्येपि तिर्यग्गरेखा कार्या तत उच्चांशाननुचस्थानात्प्रतिलोमं दत्वा ग्रहोनुलो
मं देयः तथा च ग्रहोच्चयोरंतरं केंद्रं भवति तत्र प्रतिमंडले ग्रहोच्चयोर्यावदंतरं तावदेव नीचोच्चवृ
त्तेपि । उक्तं च सिद्धांतशिरोमणौ । ततो विलोमं खलु तुंगभागान्मेषादिकस्मात्खचरेनुलोमं । दद्यात्
दुच्चांतरमत्र केंद्रं दोर्ज्याद्विरेखाखगयोश्च मध्ये तिर्यक्स्थरेखाखगयोस्तु कोटिरिति नीचोच्चवृत्तेपि
।नीचोच्चवृत्ते भगणांकिते स्मिन्मांदं विलोमं निजकक्षयास्या । शीघ्रेनुलोमं भ्रमति स्वतुंगाद्दारभ्य मध्य
ध्रुवरेखैव यस्मात् अथो यथोक्तं मृदुशीघ्रकेंद्रदोर्ज्या निजा ध्रुवरेखातो दृश्या । दोर्ज्या द्विरेखावधि खेटतः
स्यात्तिर्यक्स्थरेखावधि कोटिजीवेति । नीचोच्चवृत्तकरणं च एवं किंतु त्यादिकं तारतम्य मध्यग्रहा ता।

३४ धिष्टितस्यान्तं मध्यं कृत्वांत्यफलज्याप्रमाणं कर्कटकेन वृत्तं लिखेत् । तन्नीचोच्चवृत्ताख्यं भमध्यात्
ग्रहोपरिगते रेखा कार्या सा रेखा कक्षावृत्तांतर्गते नीचोच्चवृत्ते यत्र लग्ना तन्नीचं कक्षावृत्ताद्बहिर्गते
नीचोच्चवृत्ते यत्र लग्ना तदुच्चं ततो नीचोच्च चिह्नाभ्यां मत्स्यं कृत्वा भमध्ये तिर्यग्रेखा कार्या तस्मिन्वृ
त्ते केंद्रगत्या उच्चस्थानादारभ्य मध्यग्रहो भ्रमति फलज्योत्पन्ने विलोमसक्रमेण निजकेंद्रगत्या भ्रम
ति शीघ्रांत्यफलज्योत्पन्ने विलोमसक्रमेण निजकेंद्रगत्या भ्रमति अतो मंदकेंद्रमपसव्येन शीघ्रकेंद्रं
सव्येन देयं एवं चात्र नीचोच्चवृत्ते स्वोच्चादारभ्य यत्र मांदं शीघ्रं वा केंद्रमपसव्यक्रमेणा कलादि सं
भवति तदग्रे ग्रहो देयः तत्रापि ग्रहोच्चरेखयोरंतरं दोर्ज्या ग्रहतिर्यग्रेखयोरंतरं कोटिज्या उच्चग्र
हयोरंतरं केंद्रं तत्र पुनर्विशेषः प्रतिमंडलं त्रिज्यामितं व्यासार्द्धं नीचोच्चवृत्तमंत्यफलज्याप्रमाणं
व्यासार्द्धं तत्र प्रतिमंडलस्य नीचोच्चवृत्तपरिमाणयानुपातः यदा त्रिज्यारूपव्यासार्द्धे नांत्यफलज्या तदा
भाद्धेन किमिति तथा च त्रिज्याव्यासार्द्धे त्पन्न परिधिभांशपरिधिः अंत्यफलज्याव्यासः परिधिकृत
घ्यते सनीचोच्चपरिधिः अत्रैवैराशिकेनानुपातः यदि भांशपरिधावेते भुजकोटिज्ये तदा परिध्यं ३८
शमंडले किमिति परिध्यंशागुणता कलांशा हरइति सर्वमुपपन्नं अनुपातद्वये फलमेकमेव अथ और
चलकर्णानयनं ॥ ॥शीघ्रकोटिफलके क्रमकरादौ धनं स्मृतं । संस्कृत्य त्रिज्यया कर्णो
कोटिजं फलं । तद्बाहुफलवर्गैक्यान्मूलं कर्णश्चलाभिधः ॥२९॥ ॥शीघ्रदीपकमन्ति

यत्कोटिफलं जातं तत्केंद्रे मकरादिके सति त्रिज्यायां धनं कार्यं केंद्रे कर्कादिके सति तदेव फलं त्रिज्याया
म्रणं कार्यं एवं संस्कृतायास्त्रिज्यायावर्गः कर्त्तव्यः भुजफलस्य च वर्गः कर्त्तव्यः वर्गयोर्योगस्य च य
न्मूलं स चलकर्णः स्यात्। अत्रोपपत्तिः समायां भूमौ बिंदुं कृत्वा तमेव भूकेन्द्रं परिकल्प्य तत स्त्रिज्या
मितकर्कटेन कक्षामंडलं विलिख्य भगणांशांकितं कुर्यात्। ततो ग्रहमध्यमं च दत्वा तत्र चिह्नं कार्यं
ततो भूबिंदुग्रहचिह्नयोरुपरि रेखा कार्या सोच्चरेखोच्यते। अथ तद्रुत्थमन्त्यफलेन कक्षामंडलेऽन्या ति
र्यग्रेखा कार्या भूबिंदोरंत्यफलज्यामुच्चाभिमुखीं दत्वा तदग्रे त्रिज्यामितकर्कटेन प्रतिमंडलं
कार्यं तस्योच्चरेखायां यत्र संपातस्तत्र प्रतिमंडले उच्चं ज्ञेयं तस्मादुच्चान्मंदभागान् विलोमं दत्वा
तत्र प्रतिमंडले मध्यो ग्रहो ज्ञेयः ततो ग्रहमनुलोमं दत्वा तत्र चिह्नं कार्यं अतिप्रतिमंडले ऽप्यन्या तिर्यग्रे
खा कार्या तत्र तिर्यग्रेखयोरंतरमन्त्यफलज्यातुल्यमेव सर्वत्र भवति ग्रहात्र रेखयोरंतरं दोर्ज्या।
ग्रहतिर्यग्रेखयोरंतरं कोटिज्या प्रतिमंडलस्य ग्रहात् भूबिंदुगामि सूत्रं कर्णः कर्णसूत्रस्य कक्षा
वृत्तस्य च यत्र संपातः तत्र स्फुटो ग्रहः कक्षावृत्ते स्फुटमध्यमयोर्यदंतरं तत्फलं तच्च मध्यमग्रहा
त् स्फुटोऽग्रतस्ते धनं पृष्ठस्ये ऋणं। अथ कर्णोपपत्तिः तत्र तिर्यक्स्थरेखयोरंतरं किलां
त्यफलज्या प्रतिमंडलात्कोटिज्या ऽग्रे ऽन्त्यफलज्या ग्रहादुपरि भवति मृगादिकेंद्रे अतस्तदेव तत
द्वेकं स्फुटाकोटिः कर्कादौ तदधः अतस्तत्रैतदंतरं स्फुटाकोटिः स्फुटकोटिमूलस्य भूबिंदो

39 अथ यदंतरं तत् भुजज्यातुल्यमेव स्यात् अतस्तयोर्भुजकोट्योर्वर्गयोगपदं कर्ण इत्युपपन्नं। इदं
कर्णानयनं प्रतिमंडलभंग्या अथ नीचोच्चवृत्तभंग्योच्यते तत्र पूर्वसाधितनीचोच्चवृत्तमुच्चप्रदेशा
त् भांशैरेकं तत्रोच्चात् शीघ्रकेंद्रमनुलोमं देयं मंदकेंद्रं तु विलोमं तत्र शीघ्रकेंद्राग्रे पारमार्थिको ग्रहः
मंदाग्रे मंदस्फुटः अत्रापि ग्रहोच्चरेखयोरंतरं भुजफलं ग्रहतिर्यग्रेखयोरंतरं कोटिफलं ग्रहभूम्यो
रंतरं प्राग्वत्कर्णः तत्र मकरादिकेंद्रे त्रिज्यार्द्धतः कोटिफलं दृश्यते कर्क्यादिकेंद्रे तु तदधः अतस्त
दैक्यमंतरं च स्फुटा कोटिः भुजफलं तु तत्र भुजः तयोर्वर्गयोगपदं कर्ण इत्युपपन्नं। अथ शी
घ्रफलानयनं ॥ ॥त्रिज्याभ्यस्तं भुजफलं चलकर्णविभाजितं। लब्धस्य चापं
लिप्तादिफलं शीघ्रमिदं स्मृतं। ४०॥ ॥पूर्वोक्तप्रकारेणानीतं भुजफलं त्रिज्यया गुणितं च
लकर्णेन भाज्यं लब्धस्य धनुः कर्त्तव्यं तद्धनुरेव लिप्तादिशीघ्रफलं स्यात् अत्रोपपत्तिः भूम
ध्यात्प्रतिमंडलस्थितग्रहयोरंतरे कर्णः भूकेंद्रात्प्रतिमंडलस्थग्रहपर्यंतं प्रसारितकर्णसूत्रस्य
कक्षामंडले यत्र संगस्तत्र नरैः स्पष्टो ग्रहो दृश्यते स्पष्टग्रहाधिष्ठानात्कक्षामंडले यत्र मध्यमो ग्रहस्त ३९
त्पर्यंतं यावदंतरं तदेव तत्फलं तथोक्तं सिद्धांतशिरोमणौ कर्णः स्फुटमध्यप्रतिमंडलस्थखेटांतरेणास्पष्टखे
गो हि दृश्यतेः कक्षाख्यवृत्तेषु निरस्तसूत्रे फलं च मध्यस्फुटखेटमध्य इति इदं फलं प्रतिमंडल

गतं लभ्यते पारमार्थिकग्रहस्य तु कक्षामंडलाग्रे भ्रमणं तदुक्तं सिद्धांतशिरोमणौ भ्रमन्ग्रहः स्वप्रतिमं
डलेन भिः स्पष्टकक्षावलये विलोक्यत इति अतः प्रतिमंडलस्य भुजफलस्य त्रिज्यापरिणामात्
मौर्ध्यमनुपातः यदि कक्षाग्रे भुजफलतुल्यमंतरं तदा त्रिज्याग्रे किमिति फलं च मध्यस्फुटखेटम
ध्य इति सिद्धांतशिरोमणावुक्तं ग्रहफलं वृत्तगतं भवति अत एव धनुः कृतमिति सर्वमुपपन्नं
अनुपातश्च त्रिज्यागुणकः कर्णो हरः फलं त्रिज्यावृत्तगतमध्यस्फुटांतरं ज्यारूपं तत्तच्चापं कृ[illegible]
र्णेन वृत्तगतत्वं फलस्योपपन्नं अयं फलापन्नकल्पना ॥ ॥एतदादौ कुजादी
नां चतुर्थं चैव कर्मणि । मांदं कर्मैकमर्केंद्वोर्भौमादीनामथोच्यते । शैघ्रं मांदं पुनर्मांदं शैघ्रं च
त्वार्यनुक्रमात् ।४२॥ ॥भौमादीनां स्पष्टीकरणे एतत् शीघ्रं कर्म प्रथमं कर्त्तव्यं चतुर्थे
कर्मणि च कर्त्तव्यं द्वितीय तृतीययोर्मांदमित्यर्थादेव सिद्धं वक्ष्यति च शिष्यमोहविनिवृत्तये शैघ्र
मांदमित्यादि सूर्यचंद्रमसोस्तु एकं मांदमेव कर्म एतयोः शीघ्रोच्चाभावात् भौमादिपंचकस्य च
प्रथमे शैघ्रं द्वितीयं तृतीयमांदं चतुर्थं शैघ्रं कर्म तथा चेतत्क्रमकृतकर्मचतुष्टये भौमादयः स्प
ष्टाः स्युरित्यर्थः अत्रोपपत्तिः मध्यमोग्रहो निजकक्षावृत्ते स्वमध्यमगत्या मंदनीचोच्चवृत्तस्य
मध्यं याति ततो मंदस्फुटः शीघ्रनीचोच्चस्य मध्यं याति यतस्ततः शीघ्रनीचोच्चवृत्ते मध्यस्थितिः

40 हानादौ तृतीयं मांदं कर्म ततः खेटस्य स्पष्टत्वज्ञानाय चतुर्थं शीघ्रकर्म द्वितीयं च मांदे कर्म संस्कारा
र्थमेवेति अथ धनर्णकल्पना ॥ ॥ अजादिकेंद्रे सर्वेषां मांदे शैघ्रे च कर्मणि ॥ धनं
ग्रहाणां लिप्तादि तुलादावृणमेव तत् ॥ ४२ ॥ ॥ सर्वेषां ग्रहाणां मांदे शैघ्रे च कर्मणि अजादिकें
द्रे मेषादिराशिषट्कस्थे सति लिप्तादि धनं ग्रहेषु धनं कार्यं केंद्रे तुलादिराशिषट्कस्थे सति ऋणं का
र्यं अथ फलार्धादिकल्पना ॥ ॥ मध्ये शीघ्रफलस्यार्धं मांदमर्धफलं तथा ॥ मध्यग्रहे मं
दफलं सकलं शैघ्रमेव च ॥ ४३ ॥ ॥ प्रथमं शीघ्रकर्मणि तत्फलं जातं तदर्धं कृत्वा मध्यग्रहः सं
स्कार्यः द्वितीयं मंदफलार्धेन च शीघ्रसंस्कृत एव संस्कर्तव्यः तृतीयं मंदफलेन समस्तेनैव मध्य
मग्रह एवं संस्करणीयः चतुर्थशीघ्रसमस्तफलेन च तृतीयकर्मसंस्करणीयः एवं कर्मचतुष्टये
न भौमादीनां स्पष्टता स्यात् सूर्यचंद्रमसोस्त्वेवं मांदकर्मणैव स्पष्टता अथ गतिस्पष्टीकरणम्
॥ ॥ ग्रहवन्मंदकर्मणि ---------- । कर्कादौ तद्धनं कार्यं मकरादावृणं स्मृ
तं ॥ ४४ ॥ दोर्ज्यांतरगुणा भुक्तिस्तत्वनेत्रोद्धृता पुनः । स्वमंदपरिधिक्षुण्णा भगणांशोद्धृताः कलाः ४०
॥ ४५ ॥ ॥ मंदकर्मणि तत्रापि भुक्तिस्फुटीकरणार्थं भुक्तेः फलं कर्तव्यं तेन च यथा ग्रहफलेन ग्र
हः संस्कृतस्तथा भुक्तिः संस्करणीया तत्संस्कारमेवाह कर्कादाविति ततः भुक्तेः फलं केंद्रे कर्कादि

राशिचक्रस्य सति भुक्तो धनं कार्यं मकरादिराशिचक्रस्य केंद्रफलं कर्तव्यं तत्फलं कथं स्यादित्युपे
त्यामाह दोर्ज्यांतरेत्यादि ग्रहस्य तत्तीयमंदकर्मलिप्ता दोर्ज्याकरणे ये भुक्तभोग्यखंडे तयोरंतरेण कें
द्रभुक्तिर्गुणनीया पंचविंशाधिकद्विशतेन भाज्या ततः स्वमंदपरिधिना गुणनीया भगांशैर्भजि
लब्धं कलाः स्युः तेन कलात्मकफलेन भुक्तिः संस्कारणीया अत्रोपपत्तिः अधस्तनोर्ध्वस्तनग्रह
योरंतरं गतिग्रहफलयोश्चांतरं गतिफलं अधस्तनोर्ध्वस्तनकेंद्रयोरंतरं केंद्रगतिः कर्कादौ म
करादेश्च कक्षावृत्तांतर्गततिर्यग्रेखाप्रतिमंडलं संपातो भवति कर्कादेर्धनुरंते यावत् भ्रमेणा
सन्नत्वात्स्वल्पं प्रतिमंडलाधःखंडं अल्पकालेनैव गम्यत इति क्रमति ततः कर्कादौ धनं मकरादे
रहस्यत्वा र्मिथुनांतं यावत् भ्रमे दूरत्वात् दीर्घं प्रतिमंडलार्द्धखंडं बहुतरकालेन गम्यत इति क्रमती अतो म
करादौ ऋणं अत्रानुपातः यत्र भुजाभावे फलाभावः तत्र भोग्यखंडेन २२५ केंद्रगति १८३४५ गु
णिता ७६२९०१२५ तस्यांशा २२५ भक्ता १८३१५५ जाता स्पष्टा केंद्रगतिः एवं चंद्रस्य स्फुटपरिधिना
३२ गुणिता २५८५।२० भगांशै ३६० भक्ता ६८।४० जातं चंद्रपरमफलं यदि खंडाभावे गुणकभा
जकयोः साम्येन केंद्रगतिरेव स्पष्टा जातः तदा ऽभाव खंडप्राप्तौ त्रैराशिकेन केंद्रगतिः स्पष्टका
र्या तत्र दोर्ज्यांतरं गुणकः तत्र नेत्राग्नि भाजकः फलं स्पष्टकेंद्रगतिः अथ फलकरणयानुपा
तः यदि भांशामित परिधौ तावत्फलं तदानीं चोच्चमंडलपरिधौ किमिति परिधिर्गुणकः भांशा

ततफलं चेद्भुक्तौ नयते तदा भुक्तिं तत्फलेशो धयेत् शेषं वक्रगतिः स्यात् ६

भाजक इति सर्वमुपपन्नं अथ गति शीघ्रफलं ॥ ॥ मंदस्फुटीकृतां भुक्तिं प्रोह्य शी
५। घ्रोच्च भुक्तितः। तच्छेषं विवरेणाथ हन्यात् त्रिज्यांत्यकर्णयोः। ४८। चलकर्णहृते भुक्तौ कर्णे त्रि
ज्याधिके धनं। ऋणमूने धिके प्रोह्य भुक्तिं वक्रगतिर्भवेत्। ४९॥ ॥ सर्वोक्ते मंदकर्मणा कृतां मं
दस्फुटभुक्तिः स्वशीघ्रोच्च भुक्तौ पात्या तत्र यच्छेषं तत्त्रिज्यांत्यकर्णयोरंतरेण गुण्यं चलकर्णक
भागे यल्लब्धं तत् चतुर्थकर्णे त्रिज्याधिके सति मंदस्फुटीकृत भुक्तौ धनं कार्यं त्रिज्यातो हीने कृणं
कार्यं एवं सति स्पष्टा गतिः स्यात्। अत्रोपपत्तिः। अथ घृतनभ्वस्त्तन शीघ्रफलयोरंतरं गतेः शीघ्रफलं त
घदि मंदगति फलानयनप्रकारेण क्रियते तदा त्रिज्यया गुणिते कर्णभक्ते फलं सांतरमेव स्यात् तस्मा
त् शीघ्रफलानयनेप्रकारांतरं कृते च चस्फुटकेंद्रगति प्रदर्शनार्थं क्षेपकोक्त विधिना कक्षावृत्तं प्रतिमंड
लं च विलिख्य तयोरघृतनग्रहस्थाने चिन्हं यित्वा भूमध्यात्प्रतिमंडलग्रहचिन्हगामिनी कर्णरेखा कार्या
। रेखाकक्षावृत्तयोः संपाते घृतनः स्फुटोग्रहः यथा मध्यग्रहोच्चचिन्हयोर्मध्ये मध्यमकेंद्रं एवं स्फुटोच्च
योर्मध्ये स्फुटकेंद्रगतिरित्यात्र वगंतव्यं स्फुटशीघ्रात् घृतशोधिते स्फुटो वापि ध्यत इति अथ कक्षावृत्ते प्रति
वृत्ते च मध्यचिन्हात्केंद्रगति विलोमाद्देया तदग्रेभ्वस्तनं केंद्रं अत्रापि भ्यां कर्णे रेखाकार्या कक्षावृत्ते रेखा ४१
वृत्तयोर्मध्ये भ्वस्तनं स्फुटकेंद्ररेखयोर्मध्ये स्फुटकेंद्रगतिः घृतस्फुटग्रहस्थानयोरंतरत्वात्केंद्रगमितया प=
रेव स्फुटग्रहगतिर्न स्यादिति नाशंकनीयं यतो घृतनकर्णरेखाकेंद्रगति ज्ञानार्थमेव रचितो अन्य

था स्वल्पनग्रहेऽप्युच्चमेवादौ रन्तुलोमं चालिते सति अथ तन स्फुटग्रहात् स्वल्पनःस्फुटोऽग्रत एव भ
वति यद्य वक्रः वक्रग्रहस्तु पश्चतः यत्तयोरंतरं सा ग्रहगतिः स्पष्टा इयं तु केंद्रगतिरेव अथ पातक
क्षानुपातः मंदस्फुटोग्रहः प्रतिवृत्ते कर्णाग्रे भ्रमति तथा च मंदस्फुटा गतिः प्रतिवृत्त एव स्पष्टो
ग्रहोस्य कक्षावृत्ते त्रिज्याग्रे दृश्यते त्रिज्योत्पन्नत्वात् कक्षावृत्त एव त्रिज्याकर्णयोरंतरं गुणकः क
तः कर्णो हरः अत एव वृत्तयोः संपाते त्रिज्याकर्णांतराभावान्मंदगतिरेव स्पष्टगतिरिति सर्व
मुपपन्नं अथोदाहरणानि लिख्यंते देशांतरभुक्तो मध्यमः ०।२५।३४।१७ मंदोच्चं २।१७।१६।
४ तः ७ ५६ ग्रहं संशोध्य मंदोच्चादित्यंजातं केंद्रं ११।२१।४२।३९ अत्र त्रिभिर्भास्त्रिभिर्भैः पदं तथा चतुर्थ
पदं केंद्रस्य समपदस्यत्वोत्क्रम्यात् [illegible] भुजः ००।०८।१७।२१ अस्य कलाः ४९७।२१ तत्त्वयमैः
२२५ भक्ता लब्धं ज्यापिंडं २ द्वितीयं ४७९ शेषं ७२।२९ गत ४४९।१ गम्य ६७१ योरंतरं [illegible]२२ गुणि
तं २०५४८।७२ तत्त्वलोचनै २२५ भक्तं ९६ शेषं २९८।४२ विकला ६० गुणितं १७६२२ तत्त्वलोचनै २२५
भक्तं ५२ लब्धं ४६५२ गतपिंडे ४४९ योजितं ४९५।४५ जाता भुजक्रमज्या अथोत्क्रमज्या भुजः
दिना सम्यक् दिगंकितं च कृत्वा दिङ्मध्ये ऋजुं सूक्ष्मं कीलकं निवेश्य ततः पश्चिमभागस्थो दृष्टकर कलितावन्तं कवस्त्रेण तेन की
१२८ लकेन प्रत्यग्गतोदितमादित्यं विध्वा वृत्तांक प्राग्विभागे तत्र चिह्नानि कुर्यात् । एवं विध्यतो यस्मिन् दिने सम्यक् प्राच्यां रविरुदितो दृष्टः तद्वि
षुवद्दिनं । तस्मिन् दिने नरविः स्फुटः कार्यः तस्य रवेर्मेषादेरयं तदंतरं तदयनांशा ज्ञेयाः एवमुत्तरगमने सति । दक्षिणे तु तस्यार्कस्य तुलादेरंत
134 रमयनांशाः एवं प्रतिदिनं वेधेनोत्तरां परमां काष्ठां प्राप्नोति यस्मिन् दिने दक्षिणत उदगतः दृष्टः तदयनदिनं । ततः प्रभृति दक्षिणगमनं तस्मिंश्च
दिने गणितेन रविः स्फुटः कार्यः तस्य चिह्नेन सहांतरे पि तावंत एवायनांशा भवंति । एवं यस्मिन् दिने दक्षिणां परमकाष्ठां प्राप्य निवृत्तो दृष्टः तदुत्त
रायनदिनं ततः प्रभृत्युत्तरगमनमित्यर्थः एवं चंद्रस्यापि गोलायनसंधयो वेधे ज्ञेयाः । अथ क्रांत्योर्ज्यैक्यस्योपपत्तिः क्रांत्योरयनं दक्षि
णोत्तरमेव । परं तु क्रांतिसाम्यार्थं कल्पनया क्रांतिद्वयतो ज्यैक्यचापो समानीयचांतरमानीतं । तच्च पूर्वापरमेव तत्र परमक्रांतिज्याहारः
फलं भुजज्यातश्चापानयनोत्पत्तिर्दर्शितैव माविनिपाते । यावच्चापांतरं तेनांतरेण घट्यात्मकेन चंद्रो याति तेनैवांतरेण सूर्योपि
किंचिच्चलतीति कृत्वा अंतरं सूर्यगत्या संगुण्य चंद्रगत्या विभज्यते तेन सूर्ये संस्कृत्य सूर्यचंद्रे परिणतः कृतः । परं तत्सकृत्कर्मणा क्रां
तिसाम्यं भवतीति सिद्धं ॥ ॥ ॥ क्रांत्योः समत्वे पातोथ प्रक्षिप्तो शोनिते विधौ । कृत्वार्द्धरात्रिकाद्यातो भावी तत्कालिके ॥२२॥ स्थि
रीकृतार्द्धरात्रेंद्वोर्द्वयोर्विवरलिप्तिकाः । षष्टिघ्नाश्चंद्रभुक्त्याप्ता पातकालस्य नाडिकाः ॥२३॥ । पूर्वोक्त ~~कर्मस्य~~ प्रकारेण सकृत्क १२८
मेण स्थिरीकृतयोरर्केंद्वोः क्रांतिसाम्यपातस्य मध्यकालः स्यात् । तत्र यदि स्थिरीकृतः क्रांतिसाम्यकालिकश्चंद्र अर्द्धरात्रिकचंद्राद्
नो भवति तदा मध्यार्द्धरात्रात् आगे व पातमध्यकालो गतः स्यात् । स्थिरीकृतश्चंद्रोर्द्धरात्रिकचंद्रादधिकश्चेत्तदा पातमध्यकालोर्द्धरा

आत्परतो भविष्यति। तत्र स्थिरीकृतचंद्रार्द्धरात्रिकचंद्रयोः कलाः षष्ट्या गुणनीया चंद्रभुक्त्या भाज्याः लब्धं घटिकादिफलं स्यात्
तच्चागतपाते मिश्रं [illegible] ध्यंतः सूर्योदयादारभ्य पुनगतासु पातमध्यकालः स्यात् तस्मिन्निपाते तत् घटिकादिफलं मिश्रे योज्यं
तद्यदि षष्टेरूनं स्यात् तदा सूर्योदयादिपातमध्यकाल घटिकाः स्युः यदि षष्टेरधिकं तदा तस्मात् षष्टिमपनीय शेषघटिकाः स्युः
~~यदि षष्टेरधिकं तदा तस्मात् षष्टिमपनीय शेषघटिकाः स्युः~~ यदि षष्टेरधिकं तदा तस्मात् षष्टिमपनीय शेषघटिकाः परदिने सूर्योद
यादिपातमध्यकालः स्यात् अत्रोदाहरणं। स्थिरीकृतार्कः ४।२८।५२।५९ आर्द्धरात्रिकचंद्रः ४।२८।४६।४० अत्र स्थिरीकृतचंद्र
स्याधिकत्वात्पातकालो भावी चंद्रयोरंतरं ०।०।२३।०९ षष्टिघ्नं गुणितं ७९९। [illegible] भक्तं १५ एताः पातनाडिकाः मिश्रे ४४।२६ योजिताः
५९।४१ जातः पातस्य मध्यकालः। अत्र वासना। यदि षष्टिसावनघटीषु चंद्रस्पष्टगतिः सूर्येते तदा विलोमगणिते न ऊनविंशतिप
लाधिक [illegible] त्रयोदश [illegible] भुक्ति सावनघटः इति। षष्टिर्गुणकः चंद्रस्फुटगति भाजकः। सूर्ये सावनघटः फलं। अथ स्थित्य
र्धानयनं॥ ॥रवींदुमानयोगार्धं षष्ट्या संगुण्य भाजयेत्। तयोर्भुक्त्यंतरेणाप्तं स्थित्यर्धं नाडिकादितत्॥१४॥ पातकालः
स्फुटो मध्यः सोऽपि स्थित्यर्धवर्जितः। तस्य संभवकालः स्यात्तत्संयुक्तोंत्यसंज्ञितः॥१५॥ ॥पूर्वोक्तप्रकारेण रवींद्वोर्मानक
ले आनीय तयोर्योग [illegible] षष्ट्या गुणनीयाः ततः पातस्य मध्यकालिकस्थिरीभूतार्केन्द्वोः स्वकीयस्फुटभुक्त्यंशोध्य
चंद्रपाते योज्यं तत्स्पष्टयोः क्रांती आनेये वैधृतसंभवे एकदिक्कयोः क्रांत्योर्योगः कार्यः योग एव भागहारः स्यात्। वैधृतसंभ
वे भिन्नदिक्कयोः क्रांत्योरंतरं भागहारः स्यात्। तेन भागहारेण षष्टिघ्नमानैक्यार्द्धकला विभजेत्। लब्धं घटिकादिकं प्रवेश
स्थित्यर्धं [illegible] मध्यस्थिरीकृतार्केन्द्वोः स्वकीयभुक्तिं संयोज्य चंद्रपातं विशोध्य स्फुटक्रांति संसाध्य पूर्वोक्तप्रकारेण तयोर्यो

गेतांतरे लं[illegible]पातमैध्य। तयोर्निर्गमकालनिरूपणे [illegible]गहारः स्यात् तेन [illegible]ष्टिघ्नमानैक्यं
दकलाविभज्य लब्धं घटिकादि मोक्षस्थित्यर्धं स्यात् एवं साधितमध्यकालः प्रवेशस्थित्यर्धेनोनितः पातसंप्रवेश
कालः स्यात् स एव मध्यकालो निर्गमस्थित्यर्धेन युक्तो निर्गमकालः स्यात् प्रवेशनिर्गमयोरंतरं पुण्यकालः स्यात् २
१३९ अत्रोपपत्तिदाहरणं स्थिरीकृतोऽर्कः ६।३।५९।३५ स्फुटभुक्तिः ५९।५९ अनेन योजितोऽर्कः ६।२।५९।३६ सायनः ६।१९।१२।
३० अस्य ज्या [illegible] २२३०।४० क्रांतिज्या ७५९।३६ क्रांतिर्याम्या ४६०।३४ स्थिरीकृतेंदुः ४।२२।८।५९
स्फुटभुक्त्या ७२८।८ ऊनः ४।६।५१ सायनः ४।२३।४।४५ ज्या २०६४।४४ क्रांतिज्या ८२३८।५९
क्रांतिः सौम्या ८४७।३५ चंद्रपातः ९।२६।५१।३१ भुक्त्या ३।११ युतः ९।२६।२८।४२ चंद्रः ४।६।५१।
५१ विक्षेपकेंद्रं ६।१०।३२।९ भुजः ०।१०।३२।९ ज्या ६२२।४२ मध्यविक्षेपकेंद्रं ~~६।[illegible]~~
~~भुजः ०।[illegible]~~ २७०।२१।० त्रिज्या ३४३८ भक्तं ४९।३७ जातो याम्यः शरः चंद्रक्रांतिः
४६०।४० याम्या २ वैधृतसंभवे भिन्नदिक्कत्वे क्रांत्योरंतरं ३३।११२८ भागहारः सूर्यमानकलाः ~~[illegible]~~
~~[illegible]~~ ३२।५८ चंद्रमानकलाः २९।३१ योगः ६२ योगार्धं ३१।१४ षष्टिघ्नं १८७४ भागहारः ३३।१२८
भक्तं ५।३२ जातं स्थित्यर्धं अनेन सूर्यगतिः ५९।५९ गुणिता ३३२।५४ क्रांतिसाम्यकालिकोऽर्कः १३९
६।३।५९।३५ कलादिः ५।३३ हीनः ६।३।५४।३ चंद्रगतिः ७२८।८ स्थित्यर्धं ५।३३ गुणिता ४०४१।८

षष्ट्या कला: ६१।२२ क्रांतिसाम्यकालीनश्चंद्र: ४।१८।५२।५८ कला ६१ हीन: ४।१७।५२।५७ सायनोऽर्क: ६।२०।६ साय
नश्चंद्र: ५।४।५।३२ स्थित्यर्द्धकालीन: पात: ५।२६।१२।४८ सूर्यभुज ०।२०।६।५० ज्या ११८७।२९ क्रांतिज्या ४८०।५
श्री क्रांति: ४८१।३० पात: ५।२६।१२।५।४८ विक्षेपकेंद्र ६।२२।३६।५० ज्या १२६५।२२ मध्यविक्षेप २७०गु लि० ३४।६ ४२।०
त्रिज्या ३४३८ भक्तो जात: शरो याम्य: ९९।२२ चंद्रक्रांति: सौम्या ६१।३।११ शर: ९९।२२ क्रांत्यो ६१।३।११ रंतरं ५१।३।४
९ जाता स्पष्टा क्रांति: सूर्यक्रांति: ४८१।३० चंद्रक्रांत्यो ५१।३।४९ रंतरं ३३।१९ अंतरकला मानैक्यार्द्धतुल्या अंतरा
सात्तास्यवेश काल: स्यात् अत्र मानैक्यार्द्धकलाभ्यो ३१।२४ तरकला ३३।१९ अधिका: २५ ततो मानैक्यार्द्धांतर
कलानामंतरं १।५ षष्टिघ्नं १५ पत्रवेशभागहारा ३३।२८ प्तं ०।११।३३ अनेन सूर्यगति ५९।५ गुणिता ११।३२ षष्ट्याप्ता
०।११।३२ स्थित्यर्द्धकालीनोऽर्क: ६।३।५४।३ लब्धे ०।११।३२ युत: ६।३।५४।२४ चंद्रगति: ७२०।० अनेन ०।११।३३ गु
णिता १३३।२९ षष्ट्याप्ता २।१३ स्थित्यर्द्धकालीनश्चंद्र: ४।७।५२।३८ लब्ध ४।२।१३ युत: ४।७।५४।५२ चंद्रपात: ९।२६।१२।५
१४८ सायनोऽर्क: ६।२०।१७।१८ भुज ०।२०।१७।१८ ज्या ११८१।३९ क्रांतिज्या ४८०।९ क्रांति: ४८१।३४ सायनश्चंद्र: ५।४।१७।४५
श्री भुज ०।२५।५।५२।२५ ज्या १४९१।२६ क्रांतिज्या ६०९।१२ चाप: ६।२।२१ चंद्र: ४।७।५४।५२ चंद्रपात: ९।६।१२।५।४८ केंद्र
६।२२।१३९ भुज ०।२२।३९।३ ज्या १२६९।२ ६।२६ शर: ९९।३२ स्पष्टा चंद्रक्रांति: सौम्या ५१।२।४९ सूर्यक्रांति: ४८१।३४
क्रांत्यो रंतरं ३१।१५ मानकला: ३१।२४ अंतरं ०।१ स्पर्शभागहारा प्तं ०।०।१२ अनेन गुणितार्कगति: षष्ट्या भक्ता से व स्थि

ता अत: संवार्क: ६।२०।१।१८ क्रांति: ४८।१३।२४ चंद्रगति: ११८०।०८ तेन ०।०।२० भुक्तिता ०।०।२।२४ षष्ट्या प्ता ०।२ चंद्र: ४।७।५४।५१ लब्ध
०।२ युत: ४।७।५४।५३ सायनचंद्र: ५।४।१।४७ भुज ०।२५।५२।२२ ज्या २४९९।२४ क्रांतिज्या ६०९।१९ क्रांति: ६।२२।२० चंद्र:
४।७।५४।५३ पात: ९।२६।२५।४८ विक्षेपकेंद्र ६।२१।२१।५ भुजज्या १२६७।२८ शर: ९९।३२ सष्ट क्रांति: ५१।२।४८ सूर्यक्रां
140 ति: ४८।१३।२४ अंतरं ३।२।२४ जात: साम्य स्पर्शकाल: ५।२२।१०७ प्रथमो ह्य स्थित्यर्द्धमानीयते। स्थिरीकृतोऽर्क: ६।३।५९
।२५ स्वभुक्ति ५९।५८ युत: ६।४।५९।२३ चंद्र: ४।२८।५९।५९ स्वभुक्ति ११८०।८ युत: ५।१।८।७ चंद्रपात: ९।२६।२२।२०
सायनोऽर्क: ६।२२।१२।२८ ज्या १२४२।३८ क्रांतिज्या ५०४।५५ क्रांति: ५०६।५० सायनचंद्र: ५।७।२१।२ भुज ०।२२।३८।
५९ ज्या ७५२।४४ क्रांतिज्या ३०५।५१ चापं क्रांति: ३०६।१२ चंद्र: ५।१।८।७ चंद्रपात: ९।२६।२२।२० विक्षेपकेंद्रं ७।४।५५।
४७ भुज: २।४।५५।४७ भुजज्या २९७१।२४ शरो याम्य: २५४।३२ चंद्रक्रांति: सौम्या ३०६।१२ जातास्पष्टा २८।१४।२२ विक्षे
पक्रांति: ५०६।५० क्रांत्योरंतरं ३६४।५९ जातो मोक्ष भागहार: मान योगार्द्धं ३२।२४ वष्टिगुण: १८७४ मो दो हार ३६४।५९
नं ५।०८ जातौ मोक्षस्थित्यर्द्धं। अनेन सूर्यगति: ५९।५८ गुणिता ३०२ षष्ट्या ६० प्ता ५।२।५८ जाता: कला: स्थिरीकृतस्
र्य: ६।३।५९।३५ युत: ६।४।४।३८ चंद्रभुक्ति: ११८०।८ मोक्षस्थित्यर्द्धेन ५।०८ गुणिता ३७१९।४५ षष्ट्या ६० प्ता ६२।७
जाता: कला: स्थिरीकृतचंद्र: ४।२८।५९।५८ युत: ४।२०।२।१६ चंद्रपात: ९।२६।२५।० सायन: सूर्य: ६।२५।७।३२ भुज: १४०
०।२०।७।३२। भुजज्या ११९।२९ क्रांतिज्या ४८४।०५ क्रांति: ४८५।२९ सायनचंद्र: ५।६।२५।१७ भुज ०।२३।४४।५० भुजज्या२

१३८५।१० क्रांतिज्या ५६२।२ क्रांतिः ५६४।३३ चंद्रः ४।१०।२।२।२६ चंद्रपातः ९।२६।२५।२५ विक्षेपकेंद्रं ६।२३।४७।१ भुजं ०।२३।४७।
१ भुजज्या १३८५।१० एते याम्यः १०८।४६ चंद्रस्पष्टक्रांतिः ४५५।४७ सौम्या सूर्यक्रांतिः ४८५।२९ याम्या अनयोरंतरं २४।४२
मानयोरंतरं ११।३२ षष्टिगुणं ६९२ मोक्षहार २३६।४।४।३८ ऽनेन २४।५२ युतः ६।४।४।५३ एवं सायनः ६।२०।७।४७ भुजं ०।२०
७।४७ भुजं ०।२०।७।४७ ज्या ११९१।३५ क्रांतिज्या ४८४।११ क्रांति – १३९ चंद्रभुक्ति ७२०।८ मोक्षहारांतरेन ०।१५ गुणिता १८२।०
षष्ट्याप्तेन ३।२।० स्पष्टार्द्धसंस्कृते स्थिरीकृतेंदो ४।२०।२।२६ युतः ४।२०।५।२८ सायनः ५।६।२८।२२ भुजं ०।२३।४७।४८ ज्या
१३८।२७ क्रांतिज्या ५६०।५४ क्रांतिः ५६३।२७ चंद्रः ४।२०।५।२८ चंद्रपात ९।२६।१५ विक्षेपकेन्द्रं ६।२३।५०।३ भुजं ०।२३।२०।
३ ज्या १३८७।५६ याम्यशरः २०९।० स्पष्टक्रांतिः ४५४।२४ रविक्रांतिः ४८५।३९ अंतरं ३१।१५ अस्पयोगपातयोगार्द्धस्य ३।११६
अंतरं ० मोक्षहारभक्तं ०।९ एतच्चंद्रभुक्त्या ७२०।८ गुणितं १४९ अनेनार्द्धाधिककालात्मलब्ध्यात्मकेनेंदु ४।२०।५।२८ ऊनः ४।
२०।५।७ सायनः ५।६।२८।१० भुजं ०।२३।४२।४९ ज्या १३८०।२५ क्रांतिज्या ५६०।५५ क्रांतिः ५६३।२५ चंद्र ४।२०।५।७ पातः ९।
२६।२५।२५ विक्षेपकेंद्रं ६।२३।५०।२ भुजं ०।२३।५०।२ ज्या १३८७।५५ शरः २०९।० स्पष्टक्रांतिः ४५४।२५ रविक्रांतिः ४८५।३९
अंतरं ३१।१४ जातः साक्षान्मोक्षकालः ५।२२।५१ एवं साधिते वेध्यतस्य मध्यकालः ४५।३९ एवं प्रवेशस्थित्यर्द्धेन ५।२२ ऊनः ४०।
१७ जातः प्रवेशकालः मध्यकाल एवं ४५।३९ मोक्षस्थित्यर्द्ध ५।२२ युतो ५०।५३ जातो निर्गमकालः प्रवेशकाल ४०।१७ निर्गम

कालयोरं ५०।५३ तरं २०।४४ पुण्यकालः अत्र भुक्त्यंतरेण तं स्थित्यर्द्धमित्युक्तं भुक्त्यंतरं चाद्वि विधं आगगतिवक्रगत्यागाव
१५१ शाच्च । आग्यायिनोरवीन्द्वोर्भुक्त्यंतरं ग्रहणस्थित्यर्द्धानयनार्थे ग्रहणद्वये भागहारः प्रोक्तः तत्र ग्राहकयोरुदगपागयनोपयोगिग्रहाणां विषुवत्कं
द्रावक्रात्साकूत्रस्यग्याय्यिनां क्रांतिकक्षावक्रादुदगपाग्यायिनोऽप्रतिदिनमेतदुभयं ज्ञातव्यं तस्मादत्र पूर्वापरदिनक्रांत्योरुदगपायनांतरं स्यात् त
त्कथमित्युक्ते चंद्रार्कयोर्मध्ये ओजपादस्थितस्य पूर्वदिनक्रांतेः परदिनक्रांतिरधिकैव तयोरंतरमेकदिनभुक्तिः स्यात् युग्मपादस्थितस्य पूर्वदिनक्रां
तेः परदिनक्रांतिरल्पैव स्यात् तयोरंतरं तस्य ग्रहस्य दिनभुक्तिः स्यात् एकदिग्याय्यिनोरेव भुक्त्यंतरं भागहारः अत्र पुनश्चंद्रार्कयोरेकदिग्या
यित्वं नास्ति एकदिग्यायित्वे त्वनुगम एव स्यात् तदा तयोः परस्परं दृष्टिसंपर्को न स्यात् तस्मादुदगपाग्यायित्वं ज्ञातव्यं अथ प्राहूतस्तु च्यते ॥
आद्यंतकालयोर्मध्ये कालो ज्ञेयोतिदारुणः। प्रज्वलज्ज्वलनाकारः सर्वकर्मसुगर्हितः॥ २६॥ एककाष्ठागतयावद्यर्केन्द्वोर्मंडलांतरां संभवस्ताव
देवास्य सर्वकर्मविनाशकृत् ॥ २७॥ ॥ पूर्वं निरूपितयोः प्रवेशनिर्गमकालयोरंतराल घटिकाः पातवेध तयोः कृत्स्नकालोतिदारु
णः तस्मिन्काले यात्राविवाहादिशुभकार्य्यं मनसापि न चिंतनीयं अयं कालः प्रज्वलाग्निरिव विनाशकृत् अत्र काष्ठाशब्देन क्रांतिकक्षाया उ
पर्य्यधोभावेन साधा स्वकीयक्रांतिमानस्थानमुच्यते पातप्रवेशकाले रवींद्वोर्मंडलांतयोरेककाष्ठा स्पर्शो भवति मध्यकाले रवींदुमंडलयोः
साक्षादेककाष्ठागतयोरुपर्य्यधोभावेनैककाष्ठायामेव स्थितिः अयनद्वयमध्यस्थितयाम्योत्तररेखोभयपार्श्वस्थितक्रांतिकक्षान्तः पूर्वापरसूचीरे
खोभयाग्रगतौ परस्परं संकलनदृष्ट्या पश्यतः इत्थं व्यतीपातयोगे वैधृते तु विषुवल्कोभयपार्श्वस्थितक्रांतिकक्षायां मध्यकाले साक्षादृष्टिलोत्तर २५१
सूचीरेखोभयाग्रगतौ परस्परं पश्यतः निर्गमकाले रवींदुमंडलयोरेककाष्ठागतयोः स्थितिकाल एव पातस्य — कालः स्यात् तस्मिन्नेवकाले त

योर्दृष्टिसंपर्कः स्यात्.॥ ॥स्नानदानजपश्राद्धव्रतहोमादिकर्मभिः। प्राप्यते सुमहच्छ्रेयस्तत्कालज्ञानतस्तथा।१८॥ ॥तस्मिन्का
ले स्नानदानादिना महत्पुण्यं भवति. तं च कालं गणयित्वा सम्यग्ज्ञात्वा नितस्य स्नानदानादिकृते तुल्यं पुण्यं भवति.॥ ॥रवीन्द्वोस्तुल्यताक्रा
न्त्योर्विषुवत्संनिधौ यथा. द्विर्भवेद्धि तदा पातः स्यादभावो विपर्ययात्.।१९॥ ॥यथा प्रतिसंवत्सरं विषुवद्द्वयेऽर्कचक्रे चक्रार्द्धतुल्ये रवी
न्द्वोः क्रान्त्योस्तुल्यत्वे पातोस्ति. उक्तलक्षणाभावे च चक्रार्द्धतुल्येपि कदाचित्पाताभावः स्यात्.॥ ॥शशांकार्कयुते लिप्ताभभोगेन विभाजि
ताः। लब्धं सप्तदशाप्तस्तत्र व्यतीपातस्तृतीयकः।२०॥ ॥रवीन्द्वोर्योगे सप्तदशयोगा भागाः षोडशकलिप्ताश्चत्वारिंशद्भवंति. १।१६।४०। तल्लि
प्ताराशिरष्टशता ८००प्तः लब्धं सप्तदश भवति. तदन्ते सप्तदशो विष्कंभादियोगपावतो व्यतीपातसंज्ञकः सोपि सार्जूरिकचक्रे एकरेखाग्रस्थ
योरनुलोमविलोमयोश्चंद्रार्कयोर्दृष्टुर्भवो वह्निरेव रुद्रः पुरुषो लोके शुभकार्यं विना शार्थमुत्पद्यते. असो व्यतीपातः सकलोपि शुभकार्ये
विनाशकृत्.॥ ॥सार्पेंद्रपौष्णधिष्ण्यान्ताः सन्धयः पादभसंधयः। तदग्रभेष्वाद्यपादो गंडान्तमिति कीर्त्यते।२१। व्यतीपातत्रयं घोरं गंडा
न्तत्रितयं तथा। एतद्भसंधित्रितयं सर्वकर्मसु गर्हितम्.।२२॥ ॥अश्लेषान्ते मघादौ च स्वकीयप्रमाणघटिका षोडशान्त उभयतस्तद्दे
कर्यंत संधौ याममात्रं नक्षत्रगंडान्तमित्युच्यते. तथैव ज्येष्ठामूलयोः संध्योर्द्वितीयं तावदेव. तथा रेवत्यश्विन्योः संधौ तृतीयं तावदेव. एतत्त्रित
यं चंद्रनक्षत्रेष्वेव नाक्षत्रदिनक्षत्रेषु. लक्ष्मः। आद्यः पितृमूले श्विपुष्यौ सेन्द्र भुजंगमे चान्त्यभावः षोडशभागो नेष्टः तदैक्यकालः सगंडान्तः.
॥ ॥इत्येतत्परमं पुण्यं ज्योतिषां चरितं महत्. रहस्यं महदाख्यातं किमन्यच्छ्रोतुमिच्छसि।२३॥ सुगमं.॥ ॥इति ज्योतिर्वि
द्भूधरकृते सूर्यसिद्धान्तविवरणे पाताध्याय एकादशोध्यायः॥११॥ ॥ ॥अथ गोलाध्यायो व्याख्यायते. ॥अथार्कांशसमुद्भूतं
प्रणिपत्य कृतांजलिः॥ [redacted] परमया [redacted] भ पप्रच्छेदं मयासुरः॥१॥ ॥अथानंतरं मयोसुरः कृतांजलिपुटः सन्नर्कांशसमुद्भूतमा
भक्त्या

कीदृशं पुरुषं क्षेत्रे ह्याभतत्त्वा प्रणिपत्याभ्यर्च्य चेदं पृच्छमाणेऽपृच्छत् कृतवान्· तदेवाह·॥ ॥भगवन् किंप्रमाणा भूः किमाकारा किमाश्र
१५२ या· किंविभागा कथं चात्र सप्त पातालभूमयः।२। अहोरात्रव्यवस्थां च विदधाति कथं रविः। कथं पर्येति वसुधां भवनानि विभासयन्।३। सु
रासुराणामन्योन्यमहोरात्रं विपर्ययात्· किमर्थं तत्कथं वा स्यात् ज्ञानो भगणस्य रणं।४। पित्र्यं मासेन भवति नाडीषष्ट्या तु मानुषं· तदेव किमु
सर्वत्र न भवेत्केन हेतुना।५। दिनाब्दमासहोराणामधिपा न समाः कुतः। कथं पर्येति भगणः सग्रहोऽयं किमाश्रयः।६। भूमेरुपर्युपर्यूर्ध्वाः
किमुत्सेधाः किमन्तराः। ग्रहर्क्षकक्ष्याः किंमात्राः स्थिताः केन क्रमेण ताः।७। ग्रीष्मे तीव्राः कथं भानोर्न हेमन्ते यथाविधाः। कियती तत्करव्याप्ति
मानानि कति किं च ते।८॥ ॥भूः किंप्रमाणा भूमेः परिधियोजनानि कियन्तीत्यर्थः किमाकारा आकारोऽस्याः कीदृशः तथा
स्या आश्रय आधारः कः विभागो देवासुरादिस्थानविभागः अस्याः सप्त पातालभूमयः कथं तिष्ठन्ति· रविरहोदिनं रात्रिं च कथं करोति·
भुवनानि लोकान् विभासयन् प्रकाशयन्नर्कः वसुधां कथं तिष्ठति· रविरहोदिनं रात्रिश्च विपर्ययाद्वैपरीत्येन यदा देवानामहस्तदाऽ
सुराणां रात्रिर्यदा देवानां रात्रिस्तदाऽसुराणामह इति किमर्थं भवति सूर्यस्य भगणस्य वृत्तौ सत्यां वर्षस्पर्शे सति तद्देवासुराणामहोरात्रं क
थं भवति सूर्यस्य भगणस्य वृत्तिं च· मासेन स्यादहोरात्रः पित्र्यो वर्षेण दैवत इति· नाडीषष्ट्या यन्मानुषमहोरात्रं तदेव सर्वत्र कथं भवति न
दिनाब्दादीनामधिपानां साम्यं कुतो न भवति· ग्रहसहितो भगणः ज्योतिश्चक्रं कथं भ्रमति· भगणस्याश्रयश्च कः भूमेरुपर्युपरिगतानां
ग्रहकक्ष्याणां पृथक् क्रिया उत्सेध उच्छ्रायः कक्ष्यान्तरालप्रमाणं च कियत्· केन क्रमेण ताः कक्ष्याः स्थिताः ग्रीष्मे ऋतौ रश्मयस्तीव्राश्च १५२
तुल्या भवन्ति हेमन्तेऽपि· तथाविधास्तीव्राः कथं न स्युः भानोः करः समन्ततः कियद्देशं व्याप्नुवन्ति मानानि संख्याकानि तेषां किं भवति॥ ॥

एतन्मे संशयं छिंधि भगवन्भूतभावन· अन्यो न त्वामृते छेत्ता विद्यते सर्वदर्शिवान्।१८इति भक्त्योदितं श्रुत्वा मयेनेदं स पूरुषः।रहस्यतर
माध्यायततः प्राह पुनः स ततः।२०॥ ॥एवं प्रश्नान् कृत्वा मयः प्रार्थयति· एतन्मे इति· भो भगवन् सर्वज्ञ त्वां विनान्यो मम संशयछेत्ता
सर्वदर्शी च कोपि नास्ति· इति भक्त्या मयेनोक्तमिदं वाक्यं सूर्यांशपुरुषः श्रुत्वा तद्वाक्यमतिरहस्यार्थं संहत्य तदनंतरं पुनस्तं प्राह· ।
पुरुषः कथयति·॥ ॥शृणुष्वैकमना भूत्वा गुह्यमध्यात्मसंज्ञितं· प्रवक्ष्यामि त्वभक्तानां नादेयं विद्यते मम।२१॥ ॥एकम
ना एकचित्तो भूत्वा एतत्सर्वं शृणु· एतत्गुह्यं गुप्तं स्वतो ज्ञातुमशक्यत्वात्· अत एवाध्यात्मसंसंज्ञितं· यथात्मज्ञानमतिकठिनं तथेदमित्यर्थः
उपदेशमात्रगम्यमिदमिति भावः· एतच्चातिभक्ताय तुभ्यं दातव्यमेव·॥ ॥वासुदेवः परं ब्रह्म तन्मूर्त्तिः पुरुषः परः।अव्यक्तो निर्गुणः
शांतः पंचविंशात्परोव्ययः।२२।प्रकृत्यंतर्गतो देवो बहिरंतश्च सर्वगः।संकर्षणोऽयः सृष्ट्वादौ अप्सु वीजमथासृजत्।२३।तदंडमभवद्धै
मं सर्वतस्तत्तमोवृतं· तत्रानिरुद्धः प्रथमं व्यक्तीभूतः सनातनः।२४।हिरण्यगर्भो भगवानिष छंदसि पठ्यते।आदित्यो ह्यादिभूतत्वात्प्रसू
त्या सूर्य उच्यते·।२५।परंज्योतिस्तमः पारे सूर्योयं सवितेति च· पर्येति भुवनान्येष भावयन्भूतभावनः।२६।प्रकाशात्मा तमोहंता महानित्येष वि
श्रुतः।ऋचोस्य मंडलं सामान्यस्य मूर्त्तिर्यजूंषि च·।२७।त्रयीमयोयं भगवान् कालात्मा कालकृद्विभुः।सर्वात्मा सर्वगः सूक्ष्मः सर्वमस्मि
न्प्रतिष्ठितं।२८।रथे विश्वमये चक्रं कृत्वा संवत्सरात्मकं।छंदांस्यश्वास्तत्र युक्ताः पर्येत्येष वशी सदा·।२९।त्रिपादममृतं गुह्यं पादोयं प्रकटो
भवेत्· सोहंकारं जगत्सृष्ट्यै ब्रह्माणमसृजत्प्रभुः।३०।तस्मै वेदान्वरान्दत्वा सर्वलोकपितामहः।प्रतिष्ठाप्यांडमध्यस्थः स्वयं पर्येति भावयन्।
३१॥ ॥वासुदेव पदेन परं ब्रह्म प्रोच्यते· प्रकृतेः परः पुरुषो परब्रह्मण एव स्वरूपं तेन रसपुरुषो अव्यक्तो प्रकटः निर्गता गुणाः सत्वर

जस्तमो स्तियस्मात्सः प्रकृतेरेव गुणसंबंधात् शांतः रागद्वेषादिरहितः तथा पंचविंशात्परः । पंचविंशतितत्वातिरिक्तः । उक्तं च मूलप्रकृतिरविकृति
143 महदाद्याः प्रकृतिविकृतयः सप्त षोडशकश्च विकारो न प्रकृतिः पुरुष इति । अव्ययः क्षयरहितः नित्य इत्यर्थः प्रकृतिरंतरिता प्रवर्त्तनीयस्य पुरुषाधि
ष्ठिताया एव तस्याः सृष्ट्यादौ प्रवर्त्तनायतः प्रकृतिरचेतना पुरुषश्चेतन देवः दीव्यतीति देवः सर्वगः सर्वव्यापकः यतो बहिर्गतोत्तेजस्स वर्त्तुलमंडम
भवत् तदंडं सर्वमंतर्मध्ये तमसांधकारेणावृतमभूत् तत्र तदंडमध्ये प्रथमं सनातनः शाश्वतोऽनिरुद्धाख्यः पुरुषो जातः स एव हिरण्यगर्भेति नाम्ना
भिधीयते । एवमेव वेदेषु पठ्यते स एव भगवान्प्रकाशात्मा सूर्यादिनामभिः कीर्त्यते सर्वेषामादिनामभिः कीर्त्यते सर्वेषामादिभूतत्वादादित्य उच्यते स
र्वेषां प्रसवस्थानत्वात्सूर्य इत्युच्यते । यथा । अयं सर्वस्मात्परमुत्कृष्टं ज्योतिस्तेजोभाः सूर्यशब्दवाच्यः । तमसांधकारस्य पारे वर्त्तमानत्वात्सवितृत्वश्च इत्वा
च्यो भवति । ए[redacted]स्यादिगाहिरेवार्च्यनेति भमांतरे त्रिज्याहृतेन पलांशांशिनिः हृते तमेव त्रिज्याहृते सं[redacted]न
सूत्रं वक्षितिजेऽकगेवसंस ऋमनस्तयोरंतराभावादतो वलनाभावः परमनतेंशाः क्षितिजे स्वमेयविनतं स्यात् अहाभारितोनयंवतिभमांतरेष्टे
न्यस्तेसमवृत्ते विषुवद्वृत्तयोर्मध्यभागमेत्रिज्याहृते तेलगति तत्र स्वस्तिकाद्वक्षिणतो भागे भैरिति विषुवद्वृत्तेनालसमवृत्तान्तर समदोर्लग्नां तरवंश
वति । अंतरानुपातात् अयनवलनेन विषुवत्क्रांतिवृत्तांतरस्ले नदर्थं सार्धोन्नतत्रिज्याहृतं क्षितिजस्वभमवंतितरोमपस्थे प्रहे ऽयनवलनस्यम
नत्वाद्धनुषोंतेक्रांतिवृत्तविषुवद्वृत्तांतरस्ले जिनांशमितमयनवलनं परमं भवति वृषस्थे प्रहे मकरे क्रांतिवृत्तविषुवद्वृत्तांतराले ऽयनवलनं भवतीस
वम्यं सं । अयस्फुटवलनेन समवृत्ते किलप्राचीविज्ञातमेषादिराशिभिरंकितेः तस्माद्वृत्तेते मध्यलग्नत्वात् मेषविके सर्वक्षितिजे त्रिज्याहृतेलगति ।
नतो दिगादिक्षेत्र वलनाभावाद्यनवलनमेव क्रांतिसमवृत्तांतरे स्फुटं क्षितिजे विषुवद्वृत्तसमवृत्तयोरैक्यात् अथ परमवलने मेषादिस्थो ग्रहो मध्य
लग्नत्वाद्धनुरंते क्रांतिवृत्तस्योग्रहः कल्पितो भवति । तस्माद्वृत्रिज्याहृते लगति । तत्र धनुरंते क्रांतिवृत्तविषुवद्वृत्तांतरे जिनांशमितं परमम य 143

नवमंडलं नविषुवत्समंडलं तां तारे परमाद्रौय नवेलनेलक्ष्यं भवतीति नयोः समन्तात् एवमन्तमास्त्वसे अथ शरसंस्थाने तत्र शरसंस्थाने प
ममंडले नाधितदुत्तरतो दक्षिण तत्र प्रसरति इति तस्मात्कलामात्र्यकेमैः सरः क्षिप्तः से समम दृष्टेः एवं ज्ञानवं संस्थाप्य कोमंज्याद्दष्टिके
रसे सफलं कं एवं श्रमण्यापोतरे इति एनः यतो नक्रान्तिः सोमण्यमयनं तनं श्रायवनवलनं सोभमति तत्रकरदेवी ज्ञुदृक् सत्तं तत्र
सार्थते मत्तोमण्कर्दं गंमुद्रति आतः समयाणां नरमाते उयवनवलनमा भवः एवं [redacted] वमुवनानिलोकानिभावयन्नेकाशन्नहोरा
त्रं पर्यंदति एवं तेजोमयत्वात्वंकाशात्मा तमोहंता च महाश्चोच्यते अस्य मंडलं ऋङ्मयं सामान्येवास्योस्त्राः किरणाः यजूंष्येवास्य मूर्
र्तिः एवं वेदत्रयात्मकः कालात्मा कालरूपस्तदुदयादिनैव कालपरिगणनात् अत एव कालः कालस्याहो आदेः कर्त्ता विभुरीश्वरो व्यापकेः
इति यावत् अत एव सर्वात्मा सर्वस्वरूपी अत एव सर्वगः सर्वगोपि स्वदेहत्वान्नोपलभ्यते अस्मिन्सर्वं प्रतिष्ठितं सर्वधारकः समर्थः विश्वमयेसं
सारात्मरथे संवत्सरात्मकं कीले चक्रं कृत्वा तत्र रथे छंदांसि वेदान्नश्वान्संयोज्याधिरूढो भ्रमति सवेदाः यद्वा गायत्र्युष्णिगनुष्टुब्बृहती
पंक्तिस्त्रिष्टुब्जगत्यः सप्त छंदांस्यश्वास्तस्मिन्रथे युक्ताः इत्यंतस्य वेदात्मनश्चतुर्थोंशः स्थावरजंगमात्मकः सर्वजगद्रूपः श्रकटो भवेत् अप
रं पादत्रयमस्तं तदिवि विद्धिज्ञेयं अत एवाहंकारात्मकं ब्रह्माणमस्त्रक्षोभ्य सृष्टर्थमुत्पादितवान् तस्मै ब्रह्मणे वेदान्दत्वा वेदानन्तसृष्टिकरणसा
मर्थ्यरूपां श्रद्धत्वा तत्र ब्रह्मांडमध्ये स्वात्पप्रतिष्ठाप्य च स्वयं तदनुमध्यगतो जगत्प्रकाश [illegible] यन्भ्रमति ॥ ॥ अथ सृष्टिमाम
नश्चके ब्रह्माहंकाररूपधृक् मनसश्चंद्रमा जज्ञे सूर्यो दृष्णस्तेजसां निधिः ॥ २२ ॥ मनसः खं ततो वायुरग्निरापो धरा क्रमात् गुणैकैकवृद्ध्या पं
चैवं महाभूतानि जज्ञिरे ॥ २३ ॥ अग्नीषोमौ भानुचंद्रौ ततस्त्वंगारकादयः तेजोभूखांबुवातेभ्यः क्रमशः पंच जज्ञिरे ॥ २४ ॥ पुनर्द्वादशधात्मानं वि

मेदराशिसंज्ञकं । नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वपुः ॥२५॥ ॥ततोऽहंकारात्मको ब्रह्मा सृष्टौ मनश्चकार ततो मनसश्चंद्रोऽयं तेन र
सृष्ट्या यावद् सलिलात्मकोऽजातः तेजोनिधिः सूर्यस्तस्य नेत्राज्जज्ञे ततस्त्वाकाशादीनि पंचमहाभूतानि गुणोर्ध्वजातानि । तत्र प्रथमं मनसः र
144 खमाकाशं शब्दैकगुणमुत्पन्नं । तयोः वायुः शब्दस्पर्शगुणवान् जातः ततः शब्दस्पर्शरूपगुणं तेज उत्पन्नं । ततः शब्दस्पर्शरूपरसगंधगुणा र
पृथिवी जाता ततश्चाग्नीषोमात्मकौ भौमो पूर्वजो भानुचंद्रौ जातौ ततः पंचमहाभूतेभ्यो भौमादयो जाताः ततस्तेजसो भौमः पृथिव्या बुधः आका
शात् गुरुः अप्सु शुक्रः वायोः शनिः ततो ब्रह्माद्यादश धामेषादिराशिरूपा जातः सप्तात्मानं अश्विन्यादि सप्तविंशतिरूपं चकार ॥ ॥
ततश्चराचरं विश्वं निर्ममे देवपूर्वकं । ऊर्ध्वमध्याधरेभ्योऽथ स्रोतेभ्यः प्रकृतिं श्रितः ॥२६॥ गुणकर्मविभागेन सृष्ट्वा प्राग्वदनुक्रमात् । विभा
गं कल्पयामास यथा स्वं वेददर्शनात् ॥२७॥ ग्रहनक्षत्रताराणां भूमेर्विश्वस्य वा प्रभुः । देवासुरमनुष्याणां सिद्धानां च यथाक्रमं ॥२८॥ ॥
ततो ब्रह्मा प्रकृतिमाश्रित्य स्थावरजंगमात्मकं देवपूर्वकं जगत्ससर्ज । तत्रोर्ध्वस्रोतसो देवगंधर्वादीन् । मध्यस्रोतसः पशुपक्ष्यादीन् । अधःस्रो
तसः मनुष्यजातीः सृष्ट्वा स्थावरात्मकं गिरिवृक्षादिकं सर्वं ससर्ज । एषां सृष्टिर्गुणकर्मकृतयस्य यादृशगुणादनुसारेणैव तस्य सृष्टिः । एव
मेतान् सृष्ट्वा तेषां देवादीनां ग्रहादीनां च भूमेश्च विश्वस्य विभागं वेदोक्तं यथा स्वस्वकीयकर्माद्यनुरूपं कल्पितवान् ॥ ब्रह्मांडमंतः सुषिरं य
त्रेदं भूर्भुवादिकं । कटाहद्वितयस्येव संपुटं गोलकाकृति ॥२९॥ ॥ अंतर्मध्ये सुषिरं छिद्रं यस्य तदिदं ब्रह्मांडं कटाहद्वयसंपुटरू
पं गोलेकारेण स्थितं । यत्र ब्रह्मांडे इदं भूर्भुवादिकं सर्वं लोकजातं तिष्ठति ॥ ॥ब्रह्मांडमध्ये परिधिर्व्योमकक्षाभिधीयते । तन्म १४४
ध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा ॥३०॥ मन्दामरेज्यभूपुत्रसूर्यशुक्रेंदुजेंदवः । परिभ्रमंत्यधोऽधस्थाः सिद्धविद्याधरा घनाः ॥३१॥ मध्ये स
मंताद् अंडस्य भूगोलो व्योम्नि तिष्ठति । बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकां ॥३२॥ ॥ब्रह्मांडमध्ये यः परिधिः सम्यगाकाशकक्षा

भिधीयते. तस्याः प्रमाणं योजनानि वक्ष्यति. तस्मिन्नाकाशमध्ये भानां नक्षत्राणां भ्रमणं तदभ्यंतरे नक्षत्रकक्षेत्यर्थः। तस्या नक्षत्रकक्षा
या अधोधो मंदादयः क्रमेण भ्रमंति. तत्र नक्षत्रकक्षाभ्यंतरे शनिकक्षा. तदभ्यंतरे गुरुकक्षा. तदभ्यंतरे भौमकक्षा. तदभ्यंतरेऽर्ककक्षा. तदभ्यं
तरे शुक्रकक्षा. तदभ्यंतरे बुधकक्षा. तदभ्यंतरेऽधोधः सिद्धविद्याधरमेघाश्च क्रमेण भ्रमंति.॥ ॥तदनंतरपुटाः सप्तनागासुरस
ता माश्रयाः। दिव्यौषधिरसोपेता दिव्याः पातालभूमयः।३३॥ ॥तस्या भूमेरभ्यंतरतः दिव्यरमणीया दिव्यौषधिभिर्दिव्यरसैश्चान्वि
ताः सप्तपातालभूमयस्तिष्ठंति. तासु नागा असुराश्च तिष्ठंति.॥ ॥अनेकरत्ननिचयो गिरिः भूगोलमध्यगः। - - - - - - मेरु
रूभयत्र विनिर्गतः।३४। उपरिष्टात्स्थितास्तस्य सेंद्रा देवा महर्षयः। अधस्तादसुरास्तद्वत् द्विषंतोन्योन्यमाश्रिताः।३५। ततः समंतात्परि
धिः क्रमेणायं महार्णवः। मेखलेव स्थितो धात्र्या देवासुरविभागकृत्।३६। वऊविधारत्नहरितः स्वर्णमयो मेरुपर्वतो भूगोलमध्ये भूगो
लस्योभयत्र विनिर्गतस्तिष्ठति. तस्य मेरोरधोभागे. असुरा निवसंति ते देवा दैत्याश्च परस्परं द्विषंतः शत्रवो भवंति समंतात् भूमिं परिवेष्ट्य
भुवो मेखले समुद्रस्तिष्ठति. असौ देवासुरविभागयोः संधिभूतः॥ ॥समंतान्मेरुमध्यात्तु तुल्यभागेषु वारिधेः। द्वीपेषु दिक्षु पूर्वादिनग
र्यो देवनिर्मिताः।३७। भूवृत्तपादे पूर्वस्यां यमकोटीति विश्रुता। भद्राश्ववर्षे नगरी स्वर्णप्राकारतोरणा।३८। याम्यायां भारतवर्षे लंका तद्वन्म
हापुरी। पश्चिमे केतुमालाख्ये रोमकं परिकीर्तितं।३९। उदक् सिद्धपुरी नाम कुरुवर्षे प्रतिष्ठिता. तस्यां सिद्धा महात्मानो निवसंति गतव्यथाः
।४०। भूवृत्तपादविवरास्ताश्चान्योन्यं प्रतिष्ठिताः। ताभ्यश्चोत्तरयोर्मेरुः स तु देवासुराश्रयः।४१। मेरुमध्यात्समंतान्मेखलाकारेण स्थितजल
धेः पूर्वादिदिक्षु तुल्यस्थानेषु द्वीपेषु देवनिर्मितं पुरीचतुष्टयं तिष्ठति. तत्र पूर्वस्यां दिशि भूपरिधिचतुर्भागे भद्राश्ववर्षे यमकोटीति विख्या
ता पुरी तिष्ठति. स्वर्णप्राकारतोरणेति पुरीचतुष्टये योज्यं. तथा दक्षिणस्यां दिशि भारतवर्षे भूवृत्तचतुर्थभागे रोमकाख्या तिष्ठति. एवमुत्तर

स्यां दिशि भूवृत्तचतुर्थभागे कुरुवर्षे सिद्धपुरी तिष्ठति. तस्यां महात्मानो देवसदृशाः सिद्धा निवसंति. तत्र यमकोटी रोमकाख्येभ्याचांचैकस्य
145 ग्रयोः स्थिते दक्षिणोत्तरयोर्लंकासिद्धपुरी च तथैव स्थिते. तासामुभयपार्श्वयोर्देवासुरविभागः तासामुत्तरतो देवविभागः यतः पुरीचतुष्टया
दुत्तरतो मेरुः स्थितः. तासां दक्षिणतोऽसुरभागः सूर्यो विषुवद्दिनद्वये तासां पुरीणां सदा तदुपरि भ्रमति. अतस्तासु तद्दिने मध्याह्ने छायाभावाद्विषु
वच्छाया नास्ति. तस्मिन्दिने ध्रुवसूर्ययोरंतरं नवतिभागा एव. अतस्तासु अक्षोन्नतिर्नास्ति. मेरोरुभयतो मध्ये ध्रुवतारे व्यवस्थिते. निरक्ष
देशसंस्थानामुभयक्षितिजाश्रिते ।४३। अतो नाक्षोच्छ्रयस्तासु ध्रुवयोः क्षितिजस्थयोः । नवतिर्लंबकांशास्तु मेरावक्षांशकास्तथा ।४४। मेषादौ
देवभागस्थो देवानां याति दर्शनं असुराणां तुला-- -सूर्यस्तद्भागसंचरः ।४५। अत्यासन्नतया तेन ग्रीष्मे तीव्रकरा रवेः । देवभागे सुराणां तु हे
मंते मंदतान्यथा ।४६। देवासुरा विषुवति क्षितिजस्थं दिवाकरं । पश्यंत्यन्योन्यमेतेषां वामसव्ये दिनक्षये ।४७। ।मेरोरुभयपार्श्व
योरुपरि नभसि ध्रुवताराद्वयं तिष्ठति. एकं देवस्थानं मेरोरग्रोपरि. अपरमसुरस्थानं मेरोरपराग्रोपरि नभसि तिष्ठति. तत्तीरकाद्वयं नि
रक्षदेशे पुरीचतुष्टयस्थितानां जनानामुभयतः क्षितिजकक्षामाश्रित्य तिष्ठति. अतस्तासु पुरीषु अक्षोन्नतिर्नास्ति. ध्रुवयोः क्षितिजस्थ
त्वात्. अत एव तासु पुरीषु लंबकांशा नवतिरेव मेरोरुपरिस्थितत्वात्. ध्रुवस्याक्षांशा अपि नवतिरेव निरक्षपुरीणां क्षितिजस्थत्वात्. मेषादि
षट्के संचरन्सूर्यः स्वस्थानस्थितानां देवानां दर्शनं याति. तुलादिषट्के स्थितोऽर्को दैत्यानां स्वस्थानगतानां दर्शनं याति. देवभागे मेषादौ स्थितस्या
र्कस्य निकटस्थत्वात्. ग्रीष्मे तीव्रा रश्मयो भवंति. दैत्यानां भागे तुलादौ स्थितस्यार्कस्य दूरवर्तित्वाद्धेमंते रश्मीनां मंदता भवति. मेषादौ विषुव २४५
ति देवाः क्षितिजस्थमुद्यंतं पश्यंति दैत्या अस्तं गच्छंतं पश्यंति. तुलादिविषुवति वा अस्तं यातमर्कं पश्यंति. असुरा उद्यंतं पश्यंति. तस्माद्देवासु

राणामन्योन्यं दिनरात्रिव्यत्ययो ज्ञातव्यः मेषादावुदितः सूर्यस्त्रीन्राशीनुदगुत्तरं संचरन्प्रागहर्मध्यं पूरयेन्मेरुवासिनां ।४८। कर्कादीन्संचरं
स्तद्वदह्नः पश्चार्धमेव सः । तुलादींस्त्रीन्मृगादींश्च तद्वदेव सुरद्विषां ।४९। अतो दिनक्षपे तेषामन्योन्यं हि विपर्ययात् । अहोरात्रप्रमाणं च भानोर्भ
गणपूरणात् ।५०॥ ॥दिनक्षपार्धमेतेषामयनान्तविपर्ययात्॥ मेषान्तं क्रांतिदिरेव प्राकक्षितिजे उदितोऽर्कः उदगुत्तरस्थेषु मेष
वृषमिथुनस्थेषु संचरन्परिभ्रमन्सन् मिथुनान्ते देवानां मध्याह्नं पूरयति । ततः कर्कटसिंहकन्यासु प्रतिभ्रमन्दक्षिणं संचरन्कन्यान्ते प्र
त्यक्क्षितिजे दिनान्ते पूरयित्वास्तमुपयाति । ततस्तुलासंक्रांतिदिने प्राकक्षितिजे देवद्विषामुदितो मुदितः सूर्यः तुलावृश्चिकधनुः परिभ्रमन्
दक्षिणस्यां संचरन् धनुरन्ते देवद्विषां प्रत्यक्क्षितिजेऽर्कोऽस्तगः स्यात् । तस्माद्देवासुराणां दिनरात्रिव्यत्ययः सिद्धः तथाप्युभयेषां रविभ्रमणादे
वाहोरात्रं स्यात् । मिथुनान्ते देवानां दिनार्धमसुराणां रात्र्यर्धं स्यात् । धनुरन्ते देवानां निशार्धमसुराणां दिनार्धं स्यात् । ।उपर्यात्मानम
न्योन्यं कल्पयन्ति सुरासुराः ।५१। अन्येऽपि समसूत्रस्था मन्यन्ते धः परस्परं । भद्राश्वकेतुमालस्था लंकासिद्धपुराश्रिताः ।५२। सर्वत्रैवं महीगोले
स्वस्थानमुपरिस्थितं । मन्यन्ते ये यतो गोलस्तस्य क्वोर्ध्वं क्व वाप्यधः ।५३। अल्पकायतया लोकाः स्वस्थानात्सर्वतो दिशं । पश्यन्ति वृत्तामप्येतां चक्
राकारां वसुंधरां ।५४॥ ॥सुरासुरा देवदानवाः परस्परं स्वयमेवोपरिस्थिता इति मन्यन्ते । तथैव निरक्षदेशे समसूत्रस्था भद्राश्वकेतुमा
लस्थाः परस्परं लंकासिद्धपुरीस्थिताः परस्परं मदीयमेव स्थानमुपरिस्थितमिति मन्यन्ते । यतो भूगोलस्य व्योम्नि स्थितत्वादूर्ध्वाधोभाव एव
नास्ति । अत एव सर्वेऽप्यल्पशरीरत्वाद्गोलाकारामपि भूमिं स्वस्थानात्परितश्चक्राकारमेव पश्यन्ति न गोलकाकारं ॥ ॥सव्यं भ्रमति
देवानामपसव्यं सुरद्विषां । उपरिष्टाद्भगोलोऽयं व्यक्षे पश्चान्मुखः सदा ।५५। एवमत्र दिनं त्रिंशन्नाडिकाः शर्वरी तथा । हानिवृद्धी तथा वामं देवा
सुरविभागयोः ।५६। मेषादौ प्रत्यहं वृद्धिरुदगुत्तरतो दिवा । देवभागे क्षपाहानिर्विपरीतं तथासुरे ।५७। तुलादौ द्युनिशोर्वामं क्षयवृद्धी तयोः

समे देशे क्रांतिवशान्निरक्षतद्दिशाने पुरोदिते ॥५८॥ ॥मेषचक्रं देवानां प्रदक्षिणं भ्रमति । असुराणां प्रदक्षिणं भ्रमति । निरक्षदेशे उभयक्षि
146 तिजांतराले साक्षान्मेषचक्रमेव सदा दृश्यते तस्मात्तत्र दिनं त्रिंशद्घटिका रात्रिरपि त्रिंशदेव । निरक्षदेशाद्देवासुराणां विभागयोर्विषुवद्द्वयव्यतिरि
क्तेषु दिनेषु उभयक्षितिजांतरालक्षेत्रे मेषचक्रार्द्धादधिकं न्यूनं च स्वदेशाक्षांशवशात् भवति । यदार्द्धादधिकं दृश्यते तदा दिनमधिकं भवति । रा
त्रिरल्पा स्यात् यदार्द्धान्न्यूनं दृश्यते । तदा दिनं त्रिंशतोपि न्यूनं रात्रिरधिका स्यात् । तत्र रवौ देवभागे मेषादिषट्कस्थे रविक्रांतिरुत्तरा भवति ॥
अतः सूर्यः विषुवत्संपातस्थानादुदगेव याति । अतः स्वदेशक्षितिजं निरक्षक्षितिजादगतं भवति । तत्राहोरात्रवृत्तखंडं ऊर्ध्वं अर्द्धादधिकं भव
ति । अतो महान् दिवसः क्षितिजादधोगतं अहोरात्रवृत्तखंडमर्द्धान्न्यूनमतोऽल्पा रात्रिः । तुलादिषट्कस्थेऽर्के निरक्षक्षितिजात्स्वक्षितिज
मूर्ध्वं भवतीत्यहोरात्रवृत्तस्योर्ध्वखंडमर्द्धान्न्यूनमिति दिवसोऽल्पः अधःखंडमर्द्धादधिकमिति दीर्घरात्रिः । उभे हानिवृद्धी दक्षवशात्क्रांतिवशा
च्च भवतः । तद्विज्ञानं पुरमग्नेउदितकथितं तदेवाह ॥ ॥भूवृत्तं क्रांतिभागघ्नं भगणांशविभाजितं । अवाप्तयोजनैरर्को व्यक्षाद्यात्युपरि
स्थितः ॥५९॥ ॥भूवृत्तं ~~भूमध्य क्रांतिभागघ्नं भगणांशविभाजितं अवा~~ भूमध्यपरिधियोजनानि दृष्टदिनक्रांतिभागैः संगुण्य भग
णांशैर्विभजेत् । लब्धं योजनानि सूर्यः तैर्योजनैरुत्तरक्रांतिश्चेत्तदा निरक्षदेशादुत्तरतः सूर्य उपरिष्टाद्गच्छति । दक्षिणक्रांतौ निरक्षदे
शाद्दक्षिणतस्तैर्योजनैरुपरिष्टादर्को व्रजति । उदाहरणं । भूमध्यपरिधियोजनानि ५०५९ परमक्रांतिभागैः २४ गुणितानि १२९४ भग
३६ णांशैर्भक्तानि ३३७ लब्धयोजनानि । अतः परमुत्तरतो रवेर्गमनमेव नास्ति । अनेनैव प्रकारेण स्वदेशनिरक्षदेशयोरंतरयोजनानि सा १४६
ध्यानि । यथा कांपिल्येऽक्षांशाः २७ भूमध्यपरिधियोजनैः ५०५९ गुणिताः १३६५९३ भगणांशैः ३६० राप्तानि ३७९ ।१ — — — — — —
योजनानि विशोधयेत् । भूवृत्तपादे षष्ठाशीत्यानि स्युर्योजनानि तैः ।६०। अयनांते विलोमेन देवासुरविभागयोः ॥ नाडीषष्ट्या सकृदहर्निशा

न्यस्मिन्स्फुटं तथा ॥६१॥ ॥एवं मिथुनान्तगे रवौ परमोत्तरक्रान्तिभागाश्चतुर्विंशतिः २४ एभ्यः समानीतयोजनानि ३३१०७ परिधि
चतुर्थांशयोजनेभ्यः १२६५ शोधितानि ९२० निरक्षदेशादुत्तरतो देवभागेऽष्टाविंशत्यधिकनवशतयोजनान्तरिते स्थाने मिथुनान्तगे र्के
तस्मिन्नेव दिने षष्टिघटिकादिप्रमाणं तदा रात्रेरभाव एव । तस्मिन्नेव देशे धन्वन्तगे रवौ षष्टिघटिकात्मिका रात्रिः स्यात् । तदा दिनाभाव ए
व तत्रांशाः षट्षष्टिः ६६ किंचिदधिकाः नवकलाश्च ६६।९ तत्र विषुवन्मण्डलं उत्तरक्षितिजादधो दक्षिणक्षितिजादुपरि चतुर्विंशत्यंशैर्भ
वति । तत्र दृग्गोले परमक्रान्त्यंशैर्नाडीवृत्तादुत्तरतोऽहोरात्रवृत्ते कृते उत्तरक्षितिजे रविबिंबमर्द्धोदितं भवेत्तदा दक्षिणक्षितिजादुपर्यष्टचत्वा
रिंशदंशैर्मध्यार्कः उन्नतं भवति । तदाक्षज्या ३२२४।३६ लंबज्या १३९९ विषुवत्प्रभा ३७ क्षितिज्या ३२४३।३६ द्युज्या ३१४३ चरज्या ३१३८
चर २५४०० दिनार्द्धं ३०।० एवं दक्षिणायने निशार्द्धं ३० षष्टि[illegible] घट्यात्मकं दिने रात्रेरभावः । ।तदंते पि च षण्मासान्ते दृत्यहर्निशो:
। परतो विपरीतोयं भगोलः परिवर्त्तते ॥६२॥ ॥तदन्तरे निरक्षदेशान्नल्पतायां क्षितिजादहोरात्रवृत्तस्याधोगतत्वाद्दिने षष्टिघटी
भ्यः किंचिन्न्यूनं जाते ततस्तत्र रात्रेः संभवः ततोर्कोयथा यथा दक्षिणतो याति तथा तथा रात्रिवृद्धिः तत्रापि विषुवद्दिने दिनरात्र्योः
साम्यमेव । याम्यायां परमक्रान्तौ दिनाभावः परतो निरक्षतो देशाद्दक्षिणोत्तरयोरष्टाविंशत्यधिकनवशतयोजनेभ्यः परतो भचक्र
मुपरिष्टान्नभ्रमति । तत्राहोरात्रमपि घट्यात्मकं न भवति । किन्त्वन्यदेव दिन[illegible] निशाप्रमाणं भवति । तदेवं निरूपयति ॥ ॥
ऊने भूवृत्तपादे तु द्विज्यापक्रमयोजनैः । धनुर्मृगस्थः सविता देवभागे न दृश्यते ॥६३॥ तथासुरविभागेपि मिथुने कर्कटे स्थितः । नष्टच्छा
यं महीवृत्तपादे दर्शनमादिशेत् ॥६४॥ ॥अत्रोदाहरणमेव व्याख्या । राशिद्वयं क्रान्तिभागा विंशतिरष्टत्रिंशत्कलाश्च । तज्जो
नितयोजनानि नवत्यधिकशतद्वयमितानि २९०९ तैर्भूवृत्तपादयोजनानि १२६५ हीनानि निरक्षेषु पंचसप्तत्यधिकनवशतयोजनानि ९७५

तत्रात्तांशा एकोनसप्ततिस्त्रयो विंशत्कलाश्च ६९।२३ निरक्षदेशादुत्तरत एतावद्योजनांतरित ८७५ स्थाने धनुर्मकरयोः स्थितोऽर्को देव
147 भागे न दृश्यते एवं निरक्षादेतावद्योजनां ८७५ तरितस्थाने मिथुनकर्कटयोः स्थितोऽर्को देवभागे न दृश्यते यत्रैतावतः पलांशाः ६९।२३ तत्र
विंशतिभागाः सत्रिंशत्कलाश्च लंबः तत्र देशे विषुववृत्तं विंशतिभागे दक्षिणक्षितिजादुपरि उत्तरक्षितिजात्तावद्भिरंशैरधश्च भव
ति यदा रवेर्विंशतिभागोत्तरक्रांतिर्भवति तदुत्तरक्षितिजे रविबिंबमर्द्धोदितं मूलान्मध्याह्ने दक्षिणक्षितिजादुपरि चत्वारिंश
द्भागे ४० रुन्नतं भवति तत्र दिनं षष्टिघटिकाः रात्रिः शून्यं ततो द्वितीयदिने उत्तरक्रांतेराधिक्याद्रविरुत्तरक्षितिजं न स्पृशति ततोन्येषु
दिनेषु परमक्रांतियावदुपर्युपरि भ्रमति तथा मिथुनांते उत्तरक्षितिजादुपरि भागचतुष्टयं याति पुनस्तेनैव क्रमेणावरोहति त
था च कर्कटांते पुनः क्षितिजं स्पृशति अत एव मासद्वयं देवभागे सततं दृश्यः असुरभागे एवं मासद्वयमदृश्यः अनयैव युक्त्या धनुर्मृग
स्थोऽर्को देवभागेऽदृश्योऽसुरभागे च दृश्यो भवति एतावद्योजनां ८७५ तरितदेशस्थाः गिरिवृक्षादिव्यवधायकसद्भावात् स्थिति
जासक्तमकात्यंपश्यंपति। ।एकज्यापक्रमानीतैर्योजनैः परिवर्जितैः। भूमिकक्षाचतुर्थांशैर्व्यक्षाच्छेषैस्तु योजनैः। ६५। ध
नुर्मृगालिकुंभेषु संस्थितोऽर्को न दृश्यते। देवभागेऽसुराणां तु वृषाद्ये भचतुष्टये। ६६। ।धनुरेकराशिक्रांतिभागा एकादश त्रिच
त्वारिंशत्कलाश्च ११।४३ तज्जनितयोजनानि पंचषष्ठ्यधिकशतं १६५ एतैर्भूक्षापादयोजनानि १२६६ हीनानि ११०१ शेषमेकादश
शतयोजनानि अत्रात्तांशाः ७८।१७ निरक्षदेशादेतावद्योजनां ११०० तरितस्थाने वृश्चिकादिराशिचतुष्टयगतोऽर्को देवभागे न दृश्य
ते वृषादिराशिचतुष्टयगोऽर्कोऽसुरभागे न दृश्यते अत्र देशे विषुववृत्तं त्रिचत्वारिंशत्कलाधिकैकादशभागे दक्षिणक्षितिजादुप १८७
रि उत्तरक्षितिजात्तावद्भिरंशैरधो भवति यदा रवेरुत्तरक्रांतिरेकादश ११।४३ भागा भवति तदोत्तरक्षितिजे रविबिंबमर्द्धोदितं मूला

मध्याह्नेदक्षिणक्षितिजादुपरितयोर्विशालत्वेशेषन्यूनंभवति· तत्रदिनंषष्टिघटिकाः रात्रिःशून्यं· ततोपरदिनेशूत्तरक्रांतेराधिक्या
द्रविःपरमक्रांतिंयावत्क्षितिजमस्पृशन्नेवोपर्युपरिगच्छति· तथाचवृषमिथुनयोरुत्तरक्षितिजादुपरित्रयोदशभागानधिरोहति· पुन
स्तेनैवक्रमेणावरोहति· तथाचसिंहांतेपुरःक्षितिजंस्पृशति· अतएवार्कोमासचतुष्टयंसततंदृश्यते· असुरभागेतन्मासचतुष्टयम
दृश्योभवति· अनयैवयुक्त्यावृश्चिकादिमासचतुष्टयस्थितोर्कोदेवभागेऽदृश्योऽसुरभागेचसततंदृश्योभवति।   ।मेरौमेषादिच
क्रार्द्धंदेवाःपश्यन्तिभास्करं· सकृदेवोदितंतद्वदसुराश्चतुलादिगं।६७।   ।मेषादौप्राच्यांसकृदेवोदितंमेषादिराशिषट्केपरि
भ्रमंतंसूर्यंदेवाःपश्यन्ति· कन्यांतेऽस्तंयांतंपश्यन्ति· तथातुलादौसकृदेवोदितमसुराःपश्यन्ति· मीनांतेस्तमपिनपश्यन्ति· तत्रनवति
रस्तांशाः९० ध्रुवद्वयस्योर्ध्वाधःस्थितिः तत्रविषुवन्मंडलक्रांतिवृत्तसंपातस्थानेमेषाद्यावुदितेविषुवद्वृत्तेभ्रमन्नर्कोदेवैर्दृष्टः
ततोग्रिमदिनेसुविषुवद्वृत्तमस्पृशन्नेवक्रांतेरुपचीयमानत्वादुपर्युपरिगच्छति· तथाचमासत्रयेणचतुर्विंशतिभागपर्यंतमधि
रोहति· तत्रमिथुनांतेदेवानांमध्यदिनंभवति· पुनस्तेनैवक्रमेणराशित्रयंयावदवरुह्यकन्यांतेपुनर्विषुवद्वृत्तंस्पृशति· तत्रकन्यांते
देवाअस्तंयांतमसुराउदयंतमर्कंपश्यन्ति· अनयैवयुक्त्याऽसुराणांपारव्यासिकंदिनंरात्रिश्च·।   ।इंदोर्मंडलतलस्थोर्द्ध्वस्थितास्ते
पितरोरविं· उदितंकृष्णपक्षार्द्धेपश्यन्त्यस्तंसितार्द्धके।६८।पितरश्चंद्रमंडलादूर्द्ध्वस्थिताःकृष्णपक्षाष्टम्यांउदितमर्कंपश्यन्तिपितृ
णाममावास्यायांमध्यदिनंभवति· अतएवदर्शेमध्याह्नस्पर्शाद्द्विनिष्ठकालत्वमुक्तं· पितरःशुक्लाष्टम्यामस्तगामिनमर्कंपश्यन्तिपू
र्णिमायांपितृणांनिशीथोभवति।   ।मंडलात्पंचदशमेभागेदेवेतथासुरे· उपरिष्टाद्व्रजत्यर्कःसौम्ययाम्यायनांतगः।६९।तदंत
रालयो[illegible]योर्याम्योदिनंभविष्यति· मेरोरभिमुखंयातिपरतःस्वविभागयोः।७०।   ।भूमंडलात्पंचदशेभागेसप्तत्रिंशदधिकपात

त्रययोजनस्थाने ३३७ मिथुनांतगोऽर्को मध्याह्ने साक्षादुपरि भ्रमति· तस्मात्तत्र मध्याह्ने छाया नास्तीत्यर्थः तत्र चतुर्विंशतिभागाः क्रांतिः
148 यत्र देशेऽंशाश्चतुर्विंशतेरूनास्तत्रस्थानां मेरोरवेरुत्तरक्रांतिभागाः अधिकाश्चेत्तदा शंकोर्मध्याह्नछाया दक्षिणदिक्स्था भवति· स्वाक्षांशे
भ्योरवेरुत्तरक्रांतिभागा न्यूनाश्चेत्तदा मध्याह्नछाया शंकोरुदक्स्थैव स्यात्· असुरभागेपि निरक्षदेशात् सप्तत्रिंशदधिकशतत्रययो
जनांतरितस्थाने धनुरंतगोऽर्को मध्याह्ने साक्षादुपर्येव भ्रमति· तत्रापि तदा छायाभावः ततो न्यूनाधिकाक्षांशदेशेषु मध्याह्नछाया
याम्या सौम्या च पूर्ववज्ज्ञातव्या· एवमेवासुरभागे मेरोरभिमुखी सदैव याम्या स्यात्। ॥भद्राश्वोपरिगः कुर्याद्भारते भ्युदयं रविः।
रात्र्यर्द्धं केतुमालाख्ये कुरुष्वस्तमयं तथा· ७१ भारतादिषु वर्षेषु तद्वदेव परिभ्रमन्· मध्योदयार्द्धरात्र्यारंभकालान्क्रमात् प्रदक्षिणं·
॥७१॥ भद्राश्वोपरिगो यमकोट्यां मध्याह्नगोर्को भारते लंकायामुदयं करोति· केतुमालाख्ये रोमकाख्यायामर्द्धरात्रं कुरुषु सिद्धपुरेस्त
मनं करोति· एवं लंकायां मध्याह्नगोर्को रोमके उदयं सिद्धपुरेर्द्धरात्रं यमकोट्यामस्तं करोति· रोमके मध्याह्नगोर्कः सिद्धपुरे उदयं य
मकोट्यामर्द्धरात्रं· लंकायामस्तं करोति· सिद्धपुरे मध्यगोर्को यमकोट्यामुदयं· लंकायामर्द्धरात्रं रोमकेस्तं करोति· इत्थमेवान्येष्वं
तरालदेशेषु सर्वत्र मध्योदयार्द्धरात्र्यस्तमयाश्चैवं ज्ञातव्याः॥ ॥ध्रुवोन्नतिर्भचक्रस्य नतिर्मेरुं प्रयास्यतः॥ निरक्षाभि
मुखं यातुर्विपरीते नतोन्नती· ७२॥ ॥सर्वत्रोन्नतिज्ञानं क्षितिजादेव नतिज्ञानं तु खमध्यात् मेरौ ध्रुवस्योन्नतिः पूर्णनवतिभागाः
भचक्रस्य नतिः संपूर्णनवतिरेव भागाः मेरुं गच्छतो नरस्य निरक्षदेशादुत्तरतः सप्तत्रिंशदधिकशतत्रययोजनस्थाने उत्तरक्षितिजा १४८
त् ध्रुवस्योन्नतिश्चतुर्विंशतिभागाः तस्मिन्नेव देशे खमध्यादुत्तरतो ध्रुवस्य नतिः षट्षष्टिभागाः तस्मिन्नेव देशे दक्षिणक्षितिजतो भ
चक्रस्य नतिः स्यात्· उत्तरक्षितिजात् ध्रुवस्योन्नतिरिति· सर्वत्र स्वदेशाक्षांशपूर्णनवतिभागाः खमध्यादुत्तरतो ध्रुवस्य नतिः ने

न्यर नतो

वद्दक्षिणक्षितिजादूर्ध्वं चक्रस्योन्नतिरिति ज्ञातव्यं एवं निरक्षाभिमुखं गच्छतोऽन्नतीवैपरीत्येन भवतः॥ ॥भचक्रं ध्रुवयोर्बद्धमाक्षिप्तं प्र
वहानिलैः। पर्येत्यजस्रं तन्नद्धा ग्रहकक्षा यथाक्रमं॥७४॥ उपरिस्थस्य महती कक्षाल्पाधःस्थितस्य च। महत्या कक्षया भागा महान्तोल्पास्तथा
ल्पया॥७५॥ कालेनाल्पेन भगणं भुंक्तेल्पभ्रमणाश्रितः। ग्रहः कालेन महता मंडले महति भ्रमन्॥७६॥ ॥ऊर्ध्वाधःस्थितमेरोर
ग्रध्रुवयोः पर्यधःस्थितयोर्ध्रुवे तापकयोर्बद्धं भचक्रं प्रवहाख्यमरुद्भिर्युमानं निरंतरं भ्रमति तन्नद्धा नक्षत्रकक्षायां बद्धाः सर्वे ग्रहकक्षा
स्तिष्ठंति। कक्षागता ग्रहाः प्रवहमारुतप्रेरिता भचक्रेण सह नित्यं भ्रमंतीत्यर्थः। प्राग्व्याख्यातं च ग्रहाणां सर्वं निरूपितं। सर्वग्रहकक्षाभ्यो नक्ष
त्रकक्षा महती सर्वग्रहकक्षोपरि तिष्ठति। ततोल्पा शनिकक्षा तदधःस्था। ततो धोधोल्पाः क्रमेण भौमसूर्यशुक्रबुधचंद्राणां कक्षाः अत्र ३रु
भागा अपि महत्या कक्षया महाप्रमाणा भवंति। अंतरस्य महत्वात् अल्पकक्षाया भागा अप्यल्पप्रमाणा अंतरस्याल्पत्वात्। अत एव महाक
क्षागतो ग्रहो महता कालेन भगणं भुंक्ते। अल्पकक्षागामी ग्रहोल्पकालेन भगणं भुंक्ते॥ ॥स्वल्पपातो वहन्भुंक्ते भगणान् शीतदीधि
तिः महत्या कक्षया गच्छंस्ततः स्वल्पान् शनैश्चरः॥७७॥ ॥चंद्रकक्षा सर्वकक्षाभ्योल्पा तस्मात्तया कक्षया भ्रमंश्चंद्रः सर्वेभ्योऽल्पकाले
नैव भगणं भुंक्ते शनिकक्षा सर्वकक्षाभ्यो महती तस्मात्तया कक्षया भ्रमन् शनिर्महता कालेन भगणं भुंक्ते॥ ॥मंदादधः क्रमेण स्युश्चतु
र्था दिवसाधिपाः। वर्षाधिपतयस्तद्वत्तृतीयाः परिकीर्तिताः॥७८॥ ऊर्ध्वक्रमेण शशिनो मासानामधिपाः स्मृताः। होरेशाः सूर्यतनयादधो
धः क्रमशस्तथा॥७९॥ ॥अत्र मंदादधः क्रमं कक्षाक्रमः पूर्वोक्त एव ज्ञातव्यः॥ मंदा ॥मंदामरेज्यभूपुत्रसूर्यशुक्रेंदुजेन्दवः॥ ।
इति। तथा चाधोधःक्रमेणैव चतुर्था दिवसाधिपो भवति। यथा मंदाच्चतुर्थः रविः रवेश्चतुर्थः चंद्रः चंद्राच्चतुर्थो भौमः भौमाच्चतुर्थो बुधः बु
धाच्चतुर्थो गुरुः गुरोश्चतुर्थः शुक्रः शुक्राच्चतुर्थः शनिरेवेति सावनदिवसाधिपाः। तथा मंदात्तृतीयस्तृतीयो वर्षाधिपः स्यात्। यथा शनेस्तृती

योभौमो भौमात्तृतीयः शुक्रः शुक्रात्तृतीयश्चंद्रश्चंद्रात्तृतीयो गुरुर्गुरोस्तृतीयः सूर्यः सूर्यात्तृतीयो बुधः बुधात्तृतीयः शनिरिति क्रमेण सू
१५९ र्य्यादितो वर्षाधिपा भवंति। तथा चंद्रादूर्ध्वक्रमेण चंद्रबुधशुक्रसूर्यभौमगुरुमंदाः सूर्यादितस्तृतीयस्तृतीयक्रमेण सावनमासाधि
पा भवंति। तथा शनेरधोधः क्रमेण कक्षक्रमात् होराधिपास्तातव्याः। अत्र यो दिनाधिपतिः स एव प्रथमहोरेशः स्यात्। तत्र रविवारे द्वि
तीयहोरेशः ततः शुक्रबुधचंद्रशनिजीवभौमाः स्युः एवं पुनः पुनः प्रतिवारमहोरात्रे चतुर्विंशति होरा भवंति। तदधिपाश्च स्ववारादारभ्य
चतुर्विंशतिरेव। षष्टः षष्ठश्च होराधिपो भवति॥ ॥भवेद्भकक्षा तिग्मांशोर्भ्रमितयोष्टिताडितजनैस्त्रे भमंडलं।८०॥ ॥ति
ग्मांशोरर्कस्य भ्रमणं कक्षा षष्टिगुणं भकक्षा योजनानि भवेयुः। तैर्योजनैर्नक्षत्रमंडलं सर्वोपरिष्टात् भ्रमति। उदाहरणं। सूर्यकक्षा ४३३१५
००१२ षष्टि ६० गुणं २५९८९००७२ जाता भकक्षा। ।कल्पोक्तचंद्रभगणा गुणिताः शशिकक्षया। आकाशकक्षा विज्ञेया करव्याप्ति
स्तथा रवेः॥८१॥ ।कल्पोक्तचंद्रभगणाः ५७७५३३३३६००० शशिकक्षया ३२४००० गुणिताः १८७१२०८०८६०००००० जाता आका
शकक्षा। ।तथा रवेः करव्याप्तिः रश्मिप्रचारव्याप्तिर्वास्याः।८२॥ ॥सा आकाशकक्षा यस्य कल्पभगणैर्विभज्यते तस्यैव भ्रमणं भवेत्
सैवाकाशकक्षा भूदिनैर्भक्ता सर्वग्रहाणां पूर्वदिशं प्रति योजनरूपा दिनगतिः स्यात्। उदाहरणं। आकाशकक्षा १८७१२०८०८६००००००
सूर्यकल्पभगणैः ४३२००००००० भक्ता ४३३१५००१२ जाता सूर्यकक्षा आकाशकक्षा १८७१२०८०८६००००००० चंद्रस्य कल्पभगणैः
५७७५३३३३६००० भक्ता ३२४००० जाता चंद्रकक्षा भौमकल्पभगणै २२९६८३२००० भक्ता जाता भौमकक्षा ८१४६९०८१४८ बुधोच्चकल्प १५९
भगणैः १७९३७०६०००० भागे लब्धा बुधोच्चकक्षा १०४३२०७१४७ गुरुकल्पभगणै ३६४२२०००० भागे लब्धा गुरुकक्षा ५१३७६६४।
१६ शुक्रोच्चकल्पभगणै ७०२२३९६००० भागे लब्धा शुक्रोच्चकक्षा २६६६४६३६।४२ शनिकल्पभगणै १४६५६८००० भागे लब्धा शनिक
क्षा १२७६६८२५५।२६। चंद्रोच्चकल्पभगणै ४८८२०१००० भागे लब्धा चंद्रोच्चकक्षा ३८३२९४८३१५९ पातकल्पभगणै २३२२३८००० भा

गेलब्धा पातकक्षा ८०५१२८६६।१९२२ रविमंदोच्चभगणे ३८७ भागेलब्धार्कमंदोच्चकक्षा ५०८४८०४५२६०८६।५१ भौममंदोच्चभगणाः
२०४ भागेलब्धा भौममंदोच्चकक्षा १९७२५८०६५८८२३५।१३ बुधमंदोच्चभगणे भागेलब्धा बुधमंदोच्चकक्षा ५०८४८०४८०००
००० गुरुमंदोच्चभगणे ९०० भागेलब्धा गुरुमंदोच्चकक्षा २०७९१२००९ ५५५५५ शुक्रभगणे ५३५ भागेलब्धा शुक्रमंदोच्चकक्षा ३४९७५८
५२०८२२४२।५९ शनिमंदोच्चभगणे ३९ भागेलब्धा शनिकक्षा ४१९७९६९४५२३०७६२।१३ भौमपातभगणे २१४ भागेलब्धा भौमपातकक्षा
६७४३४६३०२०५६०७।२८ बुधपातभगणे ४८८ भागेलब्धा बुधपातकक्षा ३८३४४४२८०००००० गुरुपातभगणे ७४ भागेलब्धा गुरुपा
तकक्षा १०७५४०६९४६२०६८।३९ शुक्रपातभगणे ९०३ भागेलब्धा शुक्रपातकक्षा २०७२२१३७२०२६५७।४२ शनिपातभगणे ६६२ भागे
लब्धा शनिपातकक्षा २८२६५९८३७८२४७।४४ आकाशकक्षा १८७१२०८०८६४०००००० कल्पभूदिने १५७९१७८२८००० भक्ता ११
८५८। जातानि सर्वग्रहाणां दिनगतियोजनानि॥ ॥भुक्तियोजनसंख्येंदोः सैव भ्रमणसंगुणा। स्वकक्षाप्ता तु सा तस्य तिथ्याप्ता गतिलिप्तिकाः
।८३॥ ॥पूर्वानीता भुक्तियोजनसंख्या चंद्रभ्रमणेश्चंद्रकक्षया गुणनीया स्वस्वकक्षया भाज्या। ततो लब्धा तिथ्या भागे लिप्तात्मिका ग
तिर्भवति। उदाहरणं। भुक्तियोजनानि ११८५८ चंद्रकक्षया ३२४००० गुणितानि ३८४२२२४२०० एभ्यः सूर्यकक्षया ४३३१५००० भागेल
ब्धा ८८७।२।३० तिथि १५ भक्ता लब्धाः सूर्यगतिलिप्ताः ५९।८।१० एभ्य एव ३८४२२२४२ चंद्रकक्षया ४३२४००० भागेलब्धं ११८५८
अस्मात्तिथ्या १५ भागेलब्धा चंद्रगतिलिप्ताः ७९०।३४।५२ एवं भौमस्य गतिः ३१।२६ बुधशीघ्रोच्चस्य २४५।३२ गुरोः ४।५९ शुक्रशीघ्रोच्च
स्य ९६।८ शनेः २।०० चंद्रोच्चस्य ६।४१ पातस्य ३।११ अत्रोपपत्तिः यदि कल्पभूदिनेराकाशकक्षामितानि योजनानि ग्रहागच्छंति। तदैके
न भूदिनेन किमिति। फलं दिनगतियोजनानि ११८५८ तथा च स्वस्वकक्षायामेतावंति योजनानि कतिभिर्गच्छंतीति गतीनां घदात्मकता
कृता॥ ॥कक्षाभूकर्णगुणिता महीमंडलभाजिता। तत्कर्णा भूमिकर्णेनो ग्रहाच्चैस्स्वदलीकृतः।८४॥ ॥कक्षाभूकर्णेन षोडशगुणिता

मकेन गुणनीया महीमंडलेन भाज्या लब्धं यस्य कक्षा तस्य कर्णः स्यात् स कर्णो भूकर्णेनो नः कार्यः अवशिष्टग्रहस्योच्चैस्त्वं भवति भूमेरुपरि
150 ष्टादेतावत्सु योजनेषु ग्रहः स्वकक्षायां भ्रमतीत्यर्थः उदाहरणं चंद्रकक्षा ३२४००० भूकर्णेन १६०० गुणिता ५१८४००००० भूपरिधि ५०५९
भक्ता लब्धं १०२४७१५० जातः चंद्रकर्णः एवं भूकर्णो १६०० नः १००८७०।५० अर्द्धीकृतः ५०४३५ जातानि चंद्रोच्छ्राययोजनानि बुधकक्षा १०
४३२०९ भूकर्णेन १६०० गुणिता १६६९१३४४०० भूपरिधि ५०५९ भक्ता ३२९९३३।३९ जातो बुधकर्णः एवं भूकर्णो १६०० नः ३२८३३३।३९ अर्द्धी
कृतः १६४१६६।५० जातानि बुधोच्छ्राययोजनानि शुक्रकक्षा २६६४६३७ भूकर्ण १६०० गुणिता ४२६३४१९२०० परिधि ५०५९ भक्ता ८४
२७३९ जातः शुक्रकर्णः भूकर्णो १६०० नो ८४११३९ अर्द्धीकृतः ४२०५६९ जातानि शुक्रोच्छ्राययोजनानि एवं सूर्यकर्णः १३६९९२५।० सू
र्योच्छ्राययोजनानि ३८४१५७।३० भूमध्यकर्णः २५७६२१२।४५ भौमोच्छ्राययोजनानि १२८७५०२ चंद्रोच्चकर्णः १२२२२०७४।२१ चं
द्रोच्चोच्छ्राययोजनानि ६०६०२३७ गुरुकर्णः १६२४८५१२।१२ गुरोरुच्छ्राययोजनानि ८१२३४५६ राऊकर्णः २५४८२६२१।३० राहो
रुच्छ्राययोजनानि ७८४१७५।२० शनिकर्णः ३८१६२५१२।१५ शनेरुच्छ्राययोजनानि १९०८०९५६ नक्षत्रकर्णः ८२१९४९०३।५० नक्षत्रो
च्छ्राययोजनानि ४१०९६६५१।५९ अथांतरयोजनानि तत्र चंद्रबुधांतरयोजनानि ११३७३१ एवमन्येषामपि कार्याणि अथानीताः
कक्षाः स्वयमुदाहरति ॥ ॥खत्रयाब्धिद्विदहनाः कक्षा तु हिमदीधितेः ।३२४००० ज्ञशीघ्रस्य पुष्टखाद्वित्रिकृतभून्येंदवः १०४३२०८ स्तर
था ॥८५॥ शुक्रशीघ्रस्य सप्ताग्निरसाब्धिरसषट्यमाः ।२६६४६३७ ततोऽर्कबुधशुक्राणां खखार्थकसुरार्णवाः ४३३१५०० ॥८६॥ कुजस्या
पंकृष्टन्नाकषट्वेदैकभुजंगमाः ८१४६९०९ ।चंद्रोच्चस्य कृताष्टाब्धिवसुद्वित्र्यष्टवह्नयः ।३८३२८४ ॥८७॥ कृतर्त्तुमुनिपंचाद्रिगुणेंदुवि २५०
षयाः गुरोः ५१३७५७६४ खखभूनो वेदनक्षत्रद्विशैलार्थखकुंजराः ।८०५७२८६४ ॥८८॥ पंचबाणाग्निनागर्त्तुरसाब्धयोऽर्काः शनेरतः ।१२७६६८२
५५ भानां [illegible] खपृष्ठन्नाकवसुरध्रशराश्विनः २५९८८९००१२ ॥८९॥ खव्योमखत्रयखसागरषट्कनागव्योमाष्टषट्पयमरूपनगाष्टचंद्राः ॥

१८७१२०८०८६४००००००ब्रह्मांडसंपुटपरिभ्रमणं समंतात् अंतराद्दिनकरस्य करसंचारः ॥२०॥ अत्रांककलनमेव व्याख्या श्लोकाना
मर्थस्य सुगमत्वात्. खव्योमेत्यादीन्याकाशकक्षायोजनानि. ब्रह्मांडकटाहाभ्यंतरपरिधिप्रमाणं. तावत्पर्यंतं समंततः सूर्यरश्म
यः प्रसरंति. ॥ इति श्रीज्योतिर्विद्देवदत्तात्मजमथुराकृते सूर्यसिद्धान्तविवरणे कक्षाध्यायो द्वादशः ॥१२॥ ॥ ॥ ॥ ॥ ॥
अथ गोलरचनाध्यायो व्याख्यायते। ।अथ गुप्ते शुचौ देशे स्नातः शुचिरलंकृतः। संपूज्य भास्करं भक्त्या ग्रहान्भान्यथ गुह्यकान् ॥१॥ पा
रंपर्योपदेशेन यथाज्ञातं गुरोर्मुखात्. आचार्यः शिष्यबोधार्थं सर्वं प्रत्यक्षदर्शिवान् ॥२॥ भूभगोलस्य रचनां कुर्यादाश्चर्यकारिणीं ॥ ॥
कृतस्नानो मलवर्जितः शुद्धो लंकारैः सितवस्त्रादिभिरलंकृतः आचार्यः परीक्षितशिष्यज्ञानार्थं गुप्ते सत्राभामीये शुद्धे स्थाने भा
स्करं ग्रहान् भास्करेतरान् भान्यश्विन्यादीनि तदनु गुह्यकान् संपूज्य गुरोर्मुखात् यथा यथा स्वयं ज्ञातं तथा स्वशिष्यज्ञानार्थं भूभ
गोलरचनां कुर्यात्. ॥ ॥अभीष्टपृथिवीगोलं कारयित्वा तु दारवं. दंडं तन्मध्यगं मेरोरुभयत्र विनिर्गतं ॥३॥ ॥अभीष्टम
ल्पवृहत्प्रमाणेच्छया पृथिवीगोलं गोलकाकारां पृथ्वीं दारुमयीं मसृणां मध्यछिद्रां कृत्वा ततः सारदारुमयं दंडं पृथ्वीमध्यछिद्रेव
स्थाप्य पृथ्व्या उभयत्र साम्येन विनिर्गतं सम्यक्संस्थाप्य पृथ्वीगोलं दंडमध्ये स्थिरं कृत्वेत्यर्थः तमेवोभयत्र विनिर्गतं मेरुं परिकल्प
येत्. ततो धाराया आधाराया अध ऊर्ध्वं चाविनिर्गते मेर्वात्मके दंडे चक्राकारं मध्ये छिद्रितं नलिकाद्वयमूर्ध्वमधश्च तथाविधं न
लिकायंत्रत्रयं प्रोतं कुर्यात्. तत्र मध्यनलिके खगोलसंबंधिन्यो कादिनाऽचलं कुर्यात्. यथा भ्रामणेपि न भ्रमतः तन्नलिकयोः परि
धिः षष्टिकृष्टांकसाम्येनाष्टधा विभज्य षष्टकृष्टांक अष्टाष्टछिद्राणि दिग्भिधानि विदलप्रवेशार्थं कुर्यात्. ततो नलिकाद्वयस्य

पूर्वापरसंज्ञकछिद्रचतुष्टये सुसरलवंशशलाकाद्वयस्याग्रद्वयमूर्ध्वाधः तथा प्रवेशयेत्. यथा तच्छलाकाद्वयं मंडलाकारं स्यात्. तन्मंडलं पूर्वापरसंज्ञं पूर्वमं
डलं परमंडलसंज्ञं च तदेव मेरोरुन्मंडलं. मेरोरुपरितनाद्वृत्तस्यास्थिते तदेव लंकायां क्षितिजसंज्ञं च. ततस्तस्मिन्नेव नलिकाधारस्योर्ध्वाधोगतदक्षिणोत्तर
151 छिद्रचतुष्टये प्रोतवंशशलाकाद्वयोद्भूतमंडलस्य दक्षिणोत्तरवृत्तसंज्ञा. एवमाग्नेयवायव्याख्याछिद्रचतुष्टये. ईशाननैरृत्याख्याछिद्रचतुष्टये च
शलाकायुग्मयोः प्रवेशनाद्वृत्तद्वयं भवतीति वृत्तचतुष्टयं निष्पन्नं. तद्वृत्तचतुष्टयसंलग्नं उपरितिर्यग्वृत्तं बद्धं तत् विषुववृत्तं मेरौ क्षितिजं च तद्वृत्ते
कामस्तकोपरि भ्रमतीति लंकायां सममंडलं च. एतद्वृत्तपंचकं साम्येन विभज्य भगणांशांगुलै रंकयेत्. तदेतत्सर्वमुक्तं सिद्धांतशिरोमणौ. पूर्वाप
रं विरचयेत्सममंडलाख्यं याम्योत्तरं च विदिशोर्वलयद्वयं च. ऊर्ध्वाध एवमिह वृत्तचतुष्कमेतत्तद्वेष्टितिर्यक्परं क्षितिजं तदर्धे इति. ततः खगोलनलि
काद्वयस्य परिधौ शलाकाद्वयमुभयपार्श्वयोः समेनांतरेण प्रोतं कुर्यात्. तद्वृत्तस्य दृग्मंडलसंज्ञा. तद्वृत्तं च यत्र यत्र क्रांतिविमंडलादौ ग्रहो गच्छति तत्र
तत्र भ्रामयित्वा नेयं. तत्र दृग्ज्याशंकोर्दिक् दर्शनीयं. अथ यथावद्दृक्क्षेपदृग्गतिदृग्मंडलानि विरचयेत्. तत्राष्टमं मध्यलग्नस्य. तदेव दृक्क्षेपवृत्ताख्यं. उक्तं
च सिद्धांतशिरोमणौ. ऊर्ध्वाधरस्वस्तिककीलयुग्मे प्रोतं प्रलंबं दृग्वलयं तदंतः. क्षेत्रोपरि भ्राम्यं च तत्र तत्र नेयं ग्रहो गच्छति यत्र यत्र. ज्ञेयं तदेवाखिलखे
चराणां दृक्क्षेपदृग्गत्यधिकारचये तथाष्टौ. दृग्मंडलं वित्रिभलग्नकस्य दृक्क्षेपवृत्ताख्यमिदं वदंति. अथ भगोलबंधः॥ आधारकक्षाद्वितयं कृता
वे ध्रुवतीतथा भगणांशांगुलैः कार्याश्चांकितास्तिस्र एव ताः॥४॥ खगोलनलिकाद्वयस्योर्ध्वाधोंगुलत्रयांतरेण स्थितभगोलसंबंधिनानलिकाद्वय
स्य परिधिद्वयं साम्येन चतुर्धा विभज्य पूर्वापरयोश्छिद्रचतुष्कं दक्षिणोत्तरयोश्च छिद्रचतुष्कं कुर्यात्. तन्नलिकाद्वयं शिथिलं कार्यं. यथा भ्राम्यमाणं भ्र
मति. तत ऊर्ध्वाधःस्थितनलिकाद्वयस्य पूर्वापरसंज्ञकछिद्रचतुष्के वंशशलाकाद्वयप्रवेशनोद्भूतवृत्तस्य पूर्वापरस्य सममंडलसंज्ञा तदेव लंकायां क्षिति १५२
जं च. तथा तन्नलिकाद्वयस्य दक्षिणोत्तरसंज्ञके छिद्रचतुष्के वंशशलाकाद्वयप्रवेशनोत्पन्नवृत्तांतरे आसेव वृत्तद्वयस्याधारकक्षेति संज्ञा. तद्वृत्तद्वयस्य ब
हिर्वृत्तद्वयसंलग्नं यद्वृत्तं तिर्यक् स्थापितं सा विषुवत्क्रांतिरुच्यते. तदेव मेरोः क्षितिजं लंकायां सममंडलं च. तदेतत्कक्षात्रयं भगणांशांगुलैः षष्ट्यधिकशत

ज्य संख्येः समविभागेनांकितं कार्यं॰ एतेन लंकायाः क्षितिजसममंडलोन्मंडलानि स्युः मेरोः क्षितिजसममंडलानि तिर्यग्वृत्तानि॰ यथा लंकास्वक्षितिजयोरंत
रं न वलनेन परिमितं भवति॰ तथान्यदेशेष्वपि स्वस्वक्षितिजस्वतः स्वतो न वलयांशांतरे लैव तिष्ठति॰ अतः पूर्वापरयोर्विषुवत्सममंडलयोर्यौ संपातौ स्वस्तिकाख्यौ तयोः
संलग्नं याम्योत्तरवृत्ते च स्वस्वस्तिकाद्दक्षिणतः अतः पूर्वापरयोर्विषुवद्वृत्तसममंडलयोर्यौ संपातौ स्वस्तिकाख्यौ तयोः संलग्नं याम्योत्तरवृत्ते च स्वस्वस्तिका
द्दक्षिणतः अतः स्वस्तिकादुत्तरतो यद्देशस्याक्षांशांतरेण यद्वृत्तं निबध्यते तद्देशस्य क्षितिजं भवति॰ तत्रापि तद्देशज क्षितिजयोरंतरं न तिर्यग्वलनैः यथा कांपिल्ये
सप्तविंशतिरक्षांशाः दक्षिणोत्तरवृत्ते स्वस्वस्तिकाद्दक्षिणतः सप्तविंशत्यक्षांशांतरे चिह्नं कृतं॰ तथाधः स्वस्तिकादुत्तरस्तदक्षांशांतरे चिह्नं कृतं॰ तयोर्यद्वृत्तं पूर्वा
परस्वस्तिकयोः संलग्नं निबद्धं तत्कांपिल्यस्य क्षितिजं जातं॰ एतदुक्तं सिद्धांतशिरोमणौ पूर्वापरस्वस्तिकयोर्विलग्नं खस्वस्तिकाद्दक्षिणतोक्षभागैः॥ अथ धन्वनेरुत्तरतोंऽकि
तं च मध्यात्खनाडीवलयं विदध्यादिति॰ अथ स्वदेशोन्मंडलं॰ तत्र याम्योत्तरवृत्ते सौम्ये विषुवद्वृत्तादुपरि पलांशांतरे एकं ध्रुवचिह्नं कार्यं॰ दक्षिणे तु विषुवद्वृत्ता
दधस्तेनैवांतरेण स्यात्॰ सौम्याध्रुवचिह्नं निरक्षादुत्तरतो ज्ञेयं॰ समवृत्तक्षितिजयोर्यौ पूर्वापरसंपातौ तथा ध्रुवचिह्नयोश्च संसक्तं यद्वृत्तं निबध्यते तदु
न्मंडलसंज्ञं॰ उक्तं च सिद्धांतशिरोमणौ॰ पूर्वापरक्षितिजसंगमयोर्विलग्नं याम्ये ध्रुवे पललवैः क्षितिजादधःस्थे॰ सौम्ये कुजादुपरि चाक्षलवैर्ध्रुवे तदुन्मंडलं निगद
ति निरक्षोः क्षयवृद्धिकारीति॥ ॥स्वाहोरात्रार्धकर्णैरथ तत्प्रमाणानुपाततः॥४॥ क्रांतिविक्षेपभागेषु दलितेषु दक्षिणोत्तरं॥ पार्श्वे खेचरपक्षे मेस्त्र मेषादीना
मुदक्कर्कमात्॰ कक्षाः प्रकल्पयेत्ताः कर्कादीनां विपर्ययात्॥ तद्वत्तिस्रस्तुलादीनां मृगादीनां विलोमतः॥ याम्यगोलाश्रिताः कार्याः कक्षाधारद्वयोरपि॥६॥
॥ ॥भपंजरमध्यादूर्ध्वमधश्च परितो विषुवत्कक्षापर्यंतांतरालस्य त्रिज्यैव सा त्रिज्या ३४३८ षष्टिहृता भक्तो लब्धं ५७।१८ व्यासार्धांगुलानि तान्येव ५७।
१८ द्विगुणानि भपंजरव्यासः स्यात्॰ ११४।३६ अंगुलात्मकः॥ मेषादीनां स्वाहोरात्रार्धकर्णैर्दलितैर्द्विकृतेस्तैस्तैः कक्षा उदग्भागे कल्पनीया॰ स्वाहोरात्रा
र्धकर्णैः कथमित्यपेक्षायामाह॰ तत्प्रमाणानुपाततः इति॰ तत्प्रमाणं स्वाहोरात्रार्धप्रमाणं तयोरनुपातस्तस्मात्॰ खेः खेचरपक्रमस्थाने कक्षाः कल्प्याः यथा विषुव
त्कक्षा उत्तरतः स्वक्रांत्यंशांगुलानि एकादश च त्वारिंशाद्यंगुलानि प्रसार्य सर्वत्र विषुवत्कक्षातस्तुल्यांतरे यद्वृत्तं बध्यते॰ सा मेषकक्षा॰ मेषांते तद्वाहोरा
त्रवृत्तं विषुवत्कक्षा मेषकक्षयोरंतराले दैनंदिनक्रांतिवशात्॰ विषुवद्वृत्तमेषवृत्तयोर्मध्ये सह त्रिंशदहोरात्रवृत्तानि भवंति॰ यदि विषुवत्कक्षायां चतुर्दशाधि
केकशतांगुलात्मको व्यासः तदा विषुवत्कक्षात एकादशभागे रुद्रकस्थितमेषकक्षायां किं स्यादिति॰ एकराशिज्या १७१९ परमापक्रमः १३९७ गुणः २४०।१४४३ त्रि

ज्या ३४३८ भक्ता ६९८३० जातौ कराग्निक्रांतिज्या। अस्या धनुः १०३ २४ क्रांतिः॥ अस्या उत्क्रमज्या १२२४ त्रिज्यायां ३४३८ शोधिता जातमेर
52 कराग्रदिनव्यासदलं ३३६५३६ एतत् त्रिभिर्भक्तं ५६।·६ जातानि द्विगुणान्येतानि व्यासांगुलानि ११२।१२ व्यासवर्गः १२५८८।५० दशगुणः
१२५८८८२० अस्य मूलं ३५४।४८ जातानि परिध्यंगुलानि। परिधिरेव कक्षा। विषुवत्कक्षायां अष्टत्रिंशदंगुलाधिकविंशत्यंगुलांतरित
स्थाने वृषकक्षा। तत्र दिनव्यासः ३२१६।३९ अहोरात्रार्द्धकर्णः ५३।३६ व्यासः १०० परिधिः ३२८ विषुवत्कक्षायाश्चतुर्विंशतिभागांतरित
स्थाने मिथुनकक्षा। तत्र दिनव्यासः ३१२९४८ अहोरात्रार्द्धकर्णांगुलानि ५२।१९ व्यासः १०४।२८ परिधि ३३०।० यथा विषुवन्मेषकक्ष
योरंतराले त्रिंशदहोरात्रवृत्तानि। तथा मेषवृषकक्षयोरंतराले त्रिंशात्त्रिंशदहोरात्रवृत्तानि भवंति। ता एव तिस्रः कक्षा वैपरीत्येन क
र्कादीनां भवंति। मिथुनकक्षैव कर्कटकक्षा। वृषकक्षैव सिंहकक्षा। मेषकक्षैव कन्याकक्षाधारद्वयोरपि तद्वद्विषुवत्कक्षातो दक्षिणभागे
तुलादिकक्षात्रयं कल्पनीयं। तत्र विषुवत्कक्षातो दक्षिणत एकादशांगुलत्रिचत्वारिंशदंगुलांतरित ११।४३ स्थाने यद्वृत्तं बध्यते सा तु
लाकक्षा। तत्रस्थाहोरात्रार्द्धकर्णांगुलानि ५६ व्यासांगुलानि ११२ परिध्यंगुलानि ३५४ तथा विषुवत्कक्षातो दक्षिणतो विंशत्यंगुलाष्टत्रिं
शदंगुलांतरितस्थाने २०।३८ यद्वृत्तं सा वृश्चिककक्षा। तत्राहोरात्रार्द्धकर्णांगुलानि ५३।३० व्यासांगुलानि १०७ परिध्यंगुलानि ३३८ तथा
विषुवत्कक्षातो दक्षिणभागे चतुर्विंशत्यंगुलांतरित २४ स्थाने यद्वृत्तं सा धनुकक्षा। तत्राहोरात्रार्द्धकर्णांगुलानि ५२।२० व्यासांगुला
नि १०४।३८ परिध्यंगुलानि ३३० पुनरुत्क्रमेण धनुःकक्षैव मकरकक्षा कक्षैव कुंभकक्षा तुलकक्षैव मीनकक्षा। ततो मेषादि १५२
कक्षात्रये च षट् षट् षड् दक्षिणोत्तरं दक्षिणोत्तरपार्श्वयोः यस्य ग्रहस्य परमविक्षेपांगुलतुल्यांतरितस्थाने यद्वृत्तं बध्यते तद्वृत्तं तस्य ग्र
हस्य विमंडलवृत्तं भवति। एतद्वृत्ते राश्यंकं कृत्वा तत्र मेषादेर्व्यस्तं स्फुटं क्षेपपातं दत्वा दग्ने चिन्हं कर्त्तव्यं। अथ क्रांतिवृत्तस्य विमंडल

सविक्षेपपातयोः संपातं कृत्वा· तस्माच्च षड्भांतरे ऽन्यच्च संपातं कृत्वा क्षेपपाताग्रतस्त्रिभेंतरं क्रांतिवृत्ते च दुत्तरतः स्फुटैः पभागैः
दृष्ट्वतश्च त्रिभेंतरे तैरेव भागैर्दक्षिणतः स्थिरं कृत्वा विमंडलं निवेशनीयं· अथ ये पाठिता विक्षेपभागास्ते त्रिज्यागुणाः शीघ्रकर्णेन
भक्ताः स्फुटास्ते स्युः अत्रानुपातः यदि कर्णाग्रे एतावतस्त्रिज्याग्रे एते शीघ्रकर्णेन किं यत इति· यतो भगोले त्रिज्यैव व्यासार्द्धं· एवं
चंद्रादीनां षड्विमंडलानि कार्याणि यतः स्वस्वविमंडले· ग्रहगोले ग्रहा भ्रमंतीति विषुवद्वृत्तात् क्रांतिवृत्तपर्यंतं यत्तिर्यगंतरं सा
क्रांतिः क्रांतिवृत्ताद्विमंडलवृत्तपर्यंतं यत्तिर्यगंतरं स विक्षेपः विषुवद्वृत्ताद्विमंडलग्रहपर्यंतं यत्तिर्यगंतरं सा स्फुटा क्रांतिः उक्तं च सिद्धां
तशिरोमणौ· नाडिकामंडलात्तिर्यग्गत्या ऽपमः क्रांतिवृत्तावधिः क्रांतिवृत्ताच्छरः क्षेपवृत्तावधिस्तिर्यगेवं स्फुटो नाडिकाखेटांतराले
ऽपम इति· अथाश्विन्यादीनां कक्षाः॥ ॥याम्यदृग्गोलसंस्थानां भानामभिजितस्तथा· सप्तर्षीणामगस्त्यस्य ब्रह्मादीनां च क
ल्पयेत्॥ ८॥ ।कानिचिन्नक्षत्राणि याम्यगोलाश्रितानि· तेषामश्विन्यादिनक्षत्राणामभिजित्सप्तर्षीनां च क्रांतिविक्षेपभागैः क
क्षाः परिकल्प्याः। तत्राश्विनी ध्रुवः ०।८।०।० उत्तरक्रांतिभागाः ९।३३।४३ जाता स्पष्टा क्रांतिः। सौम्या· तथा च विषुवत्कक्षाया उ
दग्भागे कृत्तविंशत्यंगुलं चतुस्त्रिंशद्धांगुलस्थाने ऽश्विनी कक्षेति सिद्धं· तत्र दिनव्यासार्द्धं ३२३८ षष्टिमितकं ५३।५८ ध्रुवांगुला
लकमश्विनीकक्षाव्यासः १०८ अश्विनीकक्षापरिधिः ३४१ भरण्या ध्रुवः ०।२०।०।० उत्तरक्रांतिभागाः २३।५२।५७ विक्षेपभागाः सौ
म्या १२ योगः २५।५२।५७ जाता स्फुटा क्रांतिः। विषुवत्कक्षातउदग्भागे पंचाशद्धांगुलस्थाने भरणीकक्षा दिनव्यासदलं ३०८३।३२
कर्णांगुलानि ५२।३३ व्यासः १०३।६ परिधिः ३२३।५१ कृत्तिका ध्रुवः ३७।३०।०।० क्रांतिः सौम्या १८।१६।२८ विक्षेपः सौम्यः ५ स्फुटक्रांतिः सौ

म्या २४।६।१८ दिनव्यासदलं ३१५।१२ कर्णांगुलानि ५२।१७ व्यासः १०४।३४ परिधिः ३२८।४० रोहिणी ध्रुवः १।१९।३०।०० स्फु
१५३ टक्रांतिसौम्याः १६।४४।१७ दिनव्यासदलं ३२९ कर्णांगुलानि ५४।५० व्यासः १०९।४० परिधि ३४६।४८ मृगशिरो ध्रुवः २।
३।०।० स्फुटक्रांतिः सौम्या १३।३२।२ दिनव्यासदलं ३३४०।५३ कर्णांगुलानि ५५।४१ व्यासः १११।२२ परिधिः ३२५ आर्द्रा ध्रुवः २।३।
०।० सौम्या स्फुटक्रांतिः २४।५९।२५।३१।५० पुनर्वसो ध्रुवकः ३।३।०।० स्फुटक्रांतिः सौम्या २८।३५।० दिनव्यासदलं ३०१८।३ अ
श्लेषाया ध्रुवकः ३।१९।००।०० स्फुटक्रांतिः सौम्या १२।२४।२४ दिनव्यासदलं ३३५६।१७ कर्णांगुलानि ५५।५६ व्यासः १११।५२
परिधिः ३५३।४४ मघा ध्रुवः ४।९।००।०० स्फुटक्रांतिः सौम्या १३।२५।१७ दिनव्यासदलं ३३४२।२९ कर्णांगुलानि ५५।४२ व्यासः
१११।२४ परिधिः ३५२।१३ पूर्वाफाल्गुण्या ध्रुवः ४।२४।०।० स्फुटक्रांतिः सौम्या १९।५५।११ दिनव्यासदलं ~~[illegible] कर्णां~~
~~गुलानि~~ ३२३१।२१ कर्णांगुलानि ५३।५१ व्यासः १०७।४२ परिधिः ३४०।३४ उत्तराफाल्गुण्या ध्रुवः ५।५।०।० स्फुटक्रांतिः सौम्या १६।
३४ उत्तराफाल्गुण्या ध्रुवः ५।५।०।० स्फुटक्रांतिः सौम्या १६।३४।४७ दिनव्यासदलं ३२९३।३८ कर्णांगुलानि ५४।५३ व्यासः १०९।४७
परिधि ३४७।६ हस्तस्य ध्रुवः ५।२०।०।० स्फुटक्रांतिर्याम्या १३।२९।४८ दिनव्यासदलं ३२४७।२७ कर्णांगुलानि ५५।४१ व्यासः १११।२२ प
रिधि ३५२।९ चित्राया ध्रुवः ६।०।०।० स्फुटक्रांतिर्याम्या ४०।४४।३४ दिनव्यासदलं ३३२९।१९ कर्णांगुलानि ५६।३९ व्यासः ११३।१८ परि १५३
धिः ३५८।१७ स्वात्या ध्रुवः ६।१९।०।० स्फुटक्रांतिः सौम्या २३।२८।२४ दिनव्यासदलं ३१५२ कर्णांगुलानि ५२।३२ व्यासः १०५।४ परिधिः ३३१।
७ विशाखा ध्रुवः ७।०।२।०।० स्फुटक्रांतिर्याम्या १९।२४ दिनव्यासदलं ३२४२।२० कर्णांगुलानि ५४।०२ व्यासः १०८।४ परिधिः ३४२।४७
अनुराधाया ध्रुवः ७।१८।०।०० स्फुटक्रांतिर्याम्या २३।३९।२८ दिनव्यासदलं ३१४८।१८ कर्णांगु ~~लानि ५२।[illegible]~~

लानि ५१।२८ व्यासः २०४।५८ परिधिः ३३२२७८ अभिजितो ध्रुवः ७।२८।०।० स्फुटक्रांतिर्दिनव्यासः २।८
१२ कलांगुलानि ३५।०८ व्यासः ७०।१८ परिधिः २२१५८ अथ सप्तर्षीणां ध्रुवानयनं तत्रादौ नक्षत्रानयने
ललाचार्यपद्यं चतुर्दशाब्जभक्ते कलेः समागणे धृतिमितानि भानि कलेर्जगुर्बुधाः मरीचिपूर्वैर्मुनिभि
र्विरिंचि भाज्यैर्वंति भुक्तानि नभोविमध्ये इति उदाहरणम् गतकलिः ४८८८ चतुर्दशाब्जैः ४८ हृत्वा
तेन ९० भागे लब्धानि भुक्तनक्षत्राणि ४८ शुभं भोग्यनक्षत्रवर्षाणि ६८ तत्र मरीचिभादभिजितो गुण
नाकार्या तथा च सर्वाः कालगुप्ता भुक्तनक्षत्रं भोग्यमुक्तं शताकालगुनी तेन भुक्तानि वर्षाणि ६८ तथा नयति
वर्षशतेनैकनक्षत्रभोगः तदा कति वर्षैरेकांशभोग इति त्रिंशन्नक्षत्रभोगस्य दशांशस्त्रिंशतिकलाः
एव तथा च सर्वाणि तेन नक्षत्रभोगेन सर्वाणि तवर्षशतात् धृतो शभागाः सर्वसप्तवर्षाणि १८ अनेन
७।८ भुक्तानि लब्धमंशाः २२ जातः सप्तर्षि ध्रुवः ५।८।२०।० उत्तरक्रांतिः ५०७ स्पष्टाः २६।२१ अ
होरात्रार्धकर्णः २८६२ कर्णांगुलानि ३७।२८ व्यासः ६८।५८ परिधिः २४१३८ अत्र क्रांतिरेव विक्षेपः परिक
ल्पनीयः एतत्सर्वं ध्रुवादिकमार्यभट्टलल्लाचार्योक्तप्रकारेणानीतं मरीचेरेवं शालाया यथोगस्थानं तं
ता विषुवत्स्थानं तथा दक्षिणोत्तराधारके ते विषुवत्कक्षयोर्युतिद्वये षड्राश्यंतरिते अयनस्था
ने तत्रांतरपतिस्थाने कर्कटायनं दक्षिणयुतिस्थाने मकरायनं॥ ॥विषुवत्स्थानतो
भागैः स्फुटभगणसंचरणात् हैत्रा त्वेव मजादीनां तिर्यग्ज्याभिः प्रकल्पयेत॥१०॥ यस्मिन् देशे गो
लरचना कर्तुमिष्यते तद्देशानुसारेण विषुवत्कक्षा कर्तव्या तत्प्रकारः स्वदेशमध्याह्नच्छायासर्वः पद्दि
भक्ताः स्वदेशमेषस्फुटप्रमाणकालांशा भवंति ते लंबांगुलत्वेन परिकल्प्याः तान्यंगुलानि मेषविषुवत्स्थानादि

षुवत्कर्णाग्रां प्राक् प्रसार्य तदंते मेषराशिपरिच्छेदः परिकल्प्यः तस्मात्स्थानात् सौम्यात् दक्षिणतो मेषकर्णाग्रां मे
षादितआरभ्य मेषज्या तत्स्थाने पर्यंता भवति मेषपरिच्छेदादारभ्य स्वदेशीयवृषस्फुटकालांशप्राणगुलानि विषु
२५४ वत्कर्णाग्रां मेव प्रसार्य तदंते वृषस्यात्र परिच्छेदः कल्प्यः तस्मादुत्तरतो वृषकर्णाग्रां मेव मेषादितआरभ्य मेष
वृषकालांशज्या तत्स्थाने संलग्ना भवति वृषपरिच्छेदादारभ्य मिथुनस्फुटकालांशप्राणगुलानि विषुवत्कर्णा
१५ ग्रां प्रसार्य तदंते मिथुनपरिच्छेदः कार्यः तस्मादुत्तरतो मिथुनकर्णाग्रां मेषादितआरभ्य मेषवृषमिथुन
कालांशज्या तत्स्थाने संलग्ना भवति ततो मिथुनपरिच्छेदादारभ्य कर्कटकालांशप्राणगुलानि विषुवत्कर्णा
ग्रां प्रत्यक् प्रसार्य तदंते कर्कटस्यात्र परिच्छेदः कार्यः तस्मात्स्थानादुत्तरतो मिथुनकर्णाग्रामेव तुलादितआ
रभ्य कर्कटसिंहकन्यानां कालांशज्या तु कर्कटादि संलग्ना भवति कर्कटपरिच्छेदादारभ्य सिंहकालांशप्राणतुल्यां
गुलानि विषुवत्कर्णाग्रां प्रत्यक् प्रसार्य तदंते सिंहस्यात्र परिच्छेदः तस्मात्स्थानादुत्तरतो वृषकर्णाग्रा कार्यः ।
मेव तुलादितआरभ्य सिंहकन्ययोः कालांशज्या तत्स्थाने संलग्ना भवति सिंहपरिच्छेदादारभ्य कन्या
कालांशप्राणतुल्यांगुलानि विषुवत्कर्णाग्रां प्रत्यक् प्रसार्य प्रत्यक्पर्यंत तदंते तुलादि विषुवत्स्थाने स्यात् तत्रै
व कन्यायाः अत्र परिच्छेदः तस्मात्स्थानादुत्तरतो मेषकर्णाग्रामेव तुलादितआरभ्य कन्याकालांशज्या सं
लग्ना भवति तुलादि विषुवत्स्थानादारभ्य तुलस्फुटकालांशतुल्यांगुलानि विषुवत्कर्णाग्रां प्रत्यक् प्रसा
र्य तदंते तुलस्यात्र परिच्छेदः परिकल्प्यः ततः स्थानात् सौम्यात् दक्षिणतः तुलादितः आरभ्य २५४
तुलकालांशज्या तिर्यग्रूपिणी संलग्ना भवति । तुलपरिच्छेदादारभ्य विषुवत्कर्णाग्रां वृश्चिककालांशतु
ल्यांगुलानि प्रसार्य तदंते वृश्चिकच्छेदः कार्यः ततः स्थानाद्दक्षिणतो वृश्चिककर्णाग्रां तुलादितआरभ्य तु

ल वृश्चिककालांशज्यासंलग्ना स्यात् वृश्चिकक्षेत्रपरिच्छेदादारभ्य विषुवत्कक्षायां धनुःकालांशतुल्यांगु
लानि प्रसार्य तदन्ते धनुःक्षेत्रपरिच्छेदः कर्तव्यः तस्माद्दक्षिणतो धनुःकक्षायां तुलादितस्मादारभ्य तुलावृश्चि
कधनुःकालांशज्यासंलग्ना भवति तस्मिन्नेव स्थाने ऽन्यजलांशध्यानतिर्यक्प्रसार्य मेषविषुवत्स्थानेव धी
यात् सा मकरकुंभमीनानां कालांशज्या स्यात् धनुःपरिच्छेदादारभ्य विषुवत्कक्षायां मकरकालांशतुल्यानि
प्रसार्य तदन्ते मकरक्षेत्रपरिच्छेदः कार्यः ततः स्थानाद्दक्षिणतो मेषादितस्मादारभ्य धनुःकक्षायां मकरकुंभका
लांशज्यासंलग्ना भवति मकरक्षेत्रपरिच्छेदादारभ्य विषुवत्कक्षायां कुंभकालांशतुल्यांगुलानि प्रसार्य त
दन्ते कुंभक्षेत्रपरिच्छेदः कार्यः ततः स्थानाद्दक्षिणतो मेषादितस्मादारभ्य मकरकक्षायां कालांशज्यासंलग्ना भव
ति कुंभपरिच्छेदादारभ्य मीनकालांशतुल्यांगुलानि प्रसार्य मेषविषुवत्स्थाने संस्थापयेत् तानि न स्युर्यता
न्मा व भवंति तत्रैव मीनक्षेत्रपरिच्छेदः कार्यः अथ प्रकारांतरेण मेषादीनां क्षेत्रपरिच्छेदः क्रियते तत्र मेषक
क्षाक्रांतिकर्णयोः संपातस्थानादधोलंबितसूत्रं विषुवत्कक्षायां यत्र संलग्नं भवति तत्स्थानपर्यंतं मेषा
दितस्मादारभ्य मेषक्षेत्रपरिच्छेदः तथा वृषकक्षाक्रांतिकर्णयोः संपातस्थानादधोलंबितसूत्रं यत्र विषुवत्क
क्षासंलग्नं ततः आरभ्य मेषक्षेत्रपरिच्छेदांतं वृषक्षेत्रं मिथुनकक्षाक्रांतिकर्णयोः संपातादधोलंबितसूत्रं य
त्र विषुवत्कक्षालग्नं ततो वृषक्षेत्रपरिच्छेदांतं मिथुनपरिच्छेदः तस्मात् ककर्कटक्रांतिकर्णयोः
संपातादधोगतसूत्रं विषुववृत्तसंपातात् मिथुनपरिच्छेदांतं कर्कटपरिच्छेदः अस्मात् सिंहक्रांतिक
र्णसंपातादधोलंबितसूत्रं विषुववृत्तसंपातात् कर्कटपरिच्छेदादारभ्य सिंहपरिच्छेदः अस्मात् कन्याक्रां
तिकर्णसंपातादधोलंबितसूत्रं विषुववृत्तसंपातांतं सिंहपरिच्छेदादारभ्य कन्यापरिच्छेदः अस्माद्दक्षिणतो विषु
ववृत्तादधोगतसूत्रे तुलकक्षाक्रांतिकर्णसंपाताद्विषुवत्कक्षामामिलितसूत्रं यत्र विषुवत्कक्षासंलग्नं ततः तस्मादारभ्य

कन्यापरिछेदपर्यंतं तुलक्षेत्रपरिछेदः अस्माद्दक्षिणतो वृश्चिककक्षासंपातात्प्रसारितसूत्रविषुवद्वृत्त
संपातात्तुलपरिछेदपर्यंतं वृश्चिकक्षेत्रे परिछेदः अस्माद्दक्षिणतो धनुःकक्षाक्रांतिकक्षासंपातात्प्रसारि
तविषुवद्वृत्तसंपाताद्धनुःपरिछेदपर्यंतं धनुःक्षेत्रे परिछेदः अस्मात्प्राक् मकरक्रांतिकक्षासं
पातात्प्रसारितसूत्रविषुवद्वृत्तसंपाताद्धनुःपरिछेदपर्यंतं मकरपरिछेदः अस्मात्प्राक् कुंभकक्षा
२५५ क्रांतिकक्षासंपातात्प्रसारितसूत्रविषुवद्वृत्तयोगस्थानान्मकरपरिछेदपर्यंतं कुंभक्षेत्रपरिछेदः
155 अस्मात्प्राक् मीनकक्षाक्रांतिकक्षयोः संपातोत्प्रसारितसूत्र प्राकविषुवद्वृत्तसंपातस्थानात्कुंभ
परिछेदपर्यंतं मीनक्षेत्रे परिछेदः कार्यः अथाश्विन्यादिक्षेत्रपरिछेदस्य रीतिकेन क्रियते मेषेऽश्वि
नीध्रुवे षष्ठो भागाः तेस्वदेशमेषकालांशेर्गुणनीयाः त्रिंशता भाज्या लब्धा मश्विनीध्रुवकालांशा भ
वंति तान्येवांगुलानि परिकल्प मेषविषुवत्स्थानाद्विषुवत्कक्षायां प्रसार्य तदंते विद्धं दत्त्वा तत्त्वात
स्मात्स्थानाद्विषुवत्कक्षायां प्रसार्य तदंते विद्धं दत्त्वा तस्मात्स्थानादुत्तरतो मेषभागस्वक्रां
त्यंशांगुलानि ऊनविंशतिश्च त्रिंशद्वांगुलानि प्रसार्य तदंते स्वकक्षायामश्विनीनक्षत्रं तिष्ठति
एवमेव भरणीध्रुवभागा विंशति मेषकालांशैर्गुण्या त्रिंशता भाज्याः लब्धं स्वदेशे भरणीध्रु
वकालांशा भवंति तत्तुल्यं मेषादितोंगुलं तत्सूत्रेण विषुवत्कक्षायां प्रसारणीयाः तदंते स्वकक्षायां प्रसार्य
तदंते भरणीध्रुवपरिछेदः कार्यः तस्मात्स्थानादुत्तरतो मेषभागे स्वक्रांत्यंशांगुलानि पंचविंशति द्वे
पंचाशद्वांगुलानि प्रसार्य तदंते स्वकक्षायां भरणी तिष्ठति तथा द्वे कृत्तिका ध्रुवः सार्द्धसप्तभागाः २५५

तान् वृषकालांशाङ्गुलान् तान् त्रिंशता विभज्य लब्धं कृत्तिकाध्रुवकालांशाः स्युः तान्येवाङ्गुलानि वृ-
षादितो विषुवत्कक्षायां कृत्तिका तिष्ठति तथा वृषे सार्द्धैकोनविंशतिभागा रोहिणीध्रुवः तं वृषकालां-
शेगुणितं त्रिंशता विभक्तं लब्धं रोहिणी तिष्ठति अथ मिथुने मृगशिरोध्रुवस्त्रयोंशाः मिथुनकालां-
शेगुणनीयाः त्रिंशता भाज्याः लब्धं मृगशिरोध्रुवकालांशा भवंति तान्येवांगुलानि मिथुनादिनीयात्रिं-
शता भाज्या लब्धं मृगशिरोध्रुवकालांशा भवंति तान्येवांगुलानि मिथुनादितो विषुवत्कक्षायां प्रसार्य
तदंतादुत्तरतः स्वकांसंख्यांगुलानि प्रसार्य तदंते स्वकक्षायामार्द्रा तिष्ठति अथार्द्राध्रुवो मिथुने रूपघटि-
काधिकत्रयोदशभागास्ते मिथुनांशेगुणनीया त्रिंशता भाज्या लब्धान् पुनर्वसुध्रुवकालांशान् मिथुना-
दितो विषुवत्कक्षायां प्रसार्य तदंतादुत्तरतः स्वकांसंख्यांगुलानि प्रसार्य तदंते स्वकक्षायामार्द्रा तिष्ठति अ-
थ पुनर्वसुध्रुवः कर्कटे भागत्रयात्मकास्तत् कर्कटांशगुणितान् त्रिंशता भक्ता लब्धे पुनर्वसुध्रुवकालांशे
कर्कटादितो विषुवत्कक्षायां प्रसारिते तदंतादुत्तरतः स्वकांसंख्यांगुलानि प्रसार्य तदंते स्वकक्षायां पुनर्वसु-
स्तिष्ठति अथ पुष्यध्रुवः कर्कटे षोडशभागात्मकात् कर्कटकालांशघ्नात् त्रिंशता लब्धान् पुष्यध्रुवका-
लांशान् विषुवत्कक्षायां कर्कटादितः प्रसार्य तदंतादुत्तरतः स्वकांसंख्यांगुलानि प्रसार्य तदंते स्वकक्षा-
यां पुष्यस्तिष्ठति अथाश्लेषाध्रुवः कर्कटे एकोनविंशतिभागाः ते कर्कटकालांशेगुणिताः त्रिंशता भा-
ज्याः लब्धमश्लेषाध्रुवकालांशाः तान् कर्कटादितो विषुवत्कक्षायां प्रसार्य तदंतादुत्तरतः स्वकांसंख्यांगु-
लानि प्रसार्य तदंते स्वकक्षायामश्लेषा तिष्ठति अथ मघाध्रुवः सिंहे नवभागाः सिंहकालांशेगुणनीयाः
त्रिंशता भाज्या लब्धं मघाध्रुवकालांशान् सिंहादितो विषुवत्कक्षायां प्रसार्य तदंतादुत्तरतः स्वकांसंख्यां-

गुलानि प्रसार्य तदंते स्वकक्षायां मघा तिष्ठति अथ सिंहे पूर्वाफाल्गुनी तत्र तु विंशति भागास्ते सिंहकालां
शे गुणनीयाः त्रिंशता भाज्या लब्धं पूर्वाफाल्गुनी ध्रुवकालांशास्तान् सिंहादितो विषुवत्कक्षायां प्रसार्य तदं
तादुत्तरतः स्वकीयांगुलानि ध्रुवकालांशान् प्रसार्य तदंते स्वकक्षायां पूर्वाफाल्गुनी ध्रुवः कन्यायां पंचभा
१५६ गाः कन्याकालांशे गुणनीयास्त्रिंशता भाज्या लब्धमुत्तराफाल्गुनी कालांशा भवंति तान् कन्यादितो विषुव
त: त्कक्षायां प्रसार्य तदंतादुत्तरतः स्वकीयांगुलानि प्रसार्य तदंते स्वकक्षायां [illegible] कालांशे गुणनीयास्त्रिं
156 शता भाज्या लब्धं हस्तस्तिष्ठति अथ चित्राध्रुवः कन्यांते तिष्ठति तं कन्यादितो विषुवत्कक्षायां प्रसार्य क
न्याप्रमाणे कालांशांतरस्यादृक्षिणतः स्वकीयांगुलानि प्रसारयेत् तदंते स्वकक्षायां चित्रा तिष्ठति
अथ तुलायां स्वाति ध्रुवभागा एकोनविंशतिः तुलाकालांशे गुणनीयाः त्रिंशता भाज्या लब्धं स्वातिध्रु
वकालांशास्तांस्तुलादितो विषुवत्कक्षायां प्रसार्य तदंतादुत्तरतः स्वकीयांगुलानि प्रसार्य तदंते स्व
कक्षायां स्वातिस्तिष्ठति अथ वृश्चिकेति विशाखाध्रुवस्त्रयोभागाः ते वृश्चिककालांशे गुणनीयाः त्रिं
शता भाज्या लब्धं विशाखाध्रुवकालांशास्तान् वृश्चिकादितो विषुवत्कक्षायां प्रसार्य तदंतादृक्षिणतः
स्वकीयांगुलानि प्रसार्य तदंते स्वकक्षायां विशाखा तिष्ठति अथ वृश्चिके अनुराधाध्रुव त्रयोदश
भागास्तान् वृश्चिककालांशे गुणनीयास्त्रिंशता [illegible] विभज्य लब्धमनुराधाध्रुवकालांशास्तान् वृश्चिकादि
तो विषुवत्कक्षायां प्रसार्य तदंतादृक्षिणतः स्वकीयांगुलानि प्रसार्य तदंते स्वकक्षायां अनुराधाति १५६
ष्ठति अथ वृश्चिके ज्येष्ठाध्रुव एकोनविंशतिभागास्ते वृश्चिककालांशे गुणनीयास्त्रिंशता भाज्या लब्धं
ज्येष्ठाध्रुवकालांशाः स्युः तान् वृश्चिकादितो विषुवत्कक्षायां प्रसार्य तदंतादृक्षिणतः स्वकीयांगुलानि प्र

सार्य तदंते स्वकक्षायां ज्येष्ठा तिष्ठति अथ धनुषि मूलध्रुव एकभागं ताः स धनुकालांशे गुणनीया स्त्रिं
शताभाज्यो लब्धं मूलांशास्थान धनुरादितो विषुवत्कक्षायां प्रसार्य तदंते ताद्दक्षिणे ततः स्वकीयं स्वांगु
लानि प्रसार्य तदंते स्वकक्षायां मूलो तिष्ठति अथ धनुषि पूर्वाषाढाध्रुवश्चतुर्दश भागास्ते धनुःकालां
शे गुणनीयाः त्रिंशताभाज्याः लब्धं पूर्वाषाढाध्रुवकालांशास्थानं धनुरादितो विषुवत्कक्षायां
प्रसार्य तदंते ताद्दक्षिणे ततः स्वकीयं स्वांगुलानि प्रसार्य तदंते स्वकक्षायां पूर्वाषाढा तिष्ठति अथ धनु
षः उत्तराषाढाध्रुवो विंशति भागास्ते धनुःकालांशे गुणनीयास्त्रिंशताभाज्या लब्धं पूर्वाषाढाध्रुव
कालांशस्थान धनुरादितो विषुवत्कक्षायां प्रसार्य तदंते ताद्दक्षिणे ततः स्वकीयं स्वांगुलानि प्रसार्य त
दंते स्वकक्षायां पूर्वाषाढा तिष्ठति अथ धनुषि उत्तराषाढाध्रुवो विंशति भागास्ते धनुःकालांशे गु
णनीयास्त्रिंशताभाज्या लब्धमुत्तराषाढाध्रुवकालांशास्थान धनुरादितो विषुवत्कक्षायां प्रसार्य त
दंताद्दक्षिणे ततः स्वकीयं स्वांगुलानि प्रसार्य तदंते स्वकक्षायां उत्तराषाढा तिष्ठति अथ धनुष्यभि
जित ध्रुवः षड्विंशति भागास्ते धनुःकालांशे गुणनीयास्त्रिंशताभाज्या लब्धमभिजितध्रुवकालां
शास्थान धनुरादितो विषुवत्कक्षायां प्रसार्य तदंते तादुत्तरे ततः स्वकीयं स्वांगुलानि प्रसार्य तदंते स्वकक्षा
यामभिजित्तिष्ठति अथ श्रवणकालांशा भवंति ता मकरादितो विषुवत्कक्षायां प्रसार्य मकरे धनि
ष्ठाध्रुवो विंशति भागाः ते मकरकालांशे गुणनीयाः त्रिंशताभाज्या लब्धं धनिष्ठाध्रुवकालांशास्थान
मकरादितो विषुवत्कक्षायां प्रसार्य तदुत्तरे ततः स्वकीयं स्वांगुलानि प्रसार्य तदंते धनिष्ठा तिष्ठति अ
थ कुंभे शततारा ध्रुवो विंशति भागास्ते कुंभकालांशे गुणनीयास्त्रिंशताभाज्या लब्धं शतभिष

कलांशाः तान् कुंभादितो विषुवत्कक्षायां प्रसार्य तदंताद्दक्षिणतः स्वकक्षांतं प्रांशगुलानि प्रसार्य तदंते स्व
कक्षायां शतभिषक् तिष्ठति अथ पूर्वभाद्रपदाध्रुवः कुंभे षड्विंशति भागाः ते कुंभकालांशैर्गुणनीयाः
त्रिंशता भाज्याः लब्धं पूर्वभाद्रपदाध्रुवकालांशा भवंति तान् कुंभादितो विषुवत्कक्षायां प्रसार्य तदंता
१५७ दुत्तरतः स्वकक्षांतं प्रांशगुलानि प्रसार्य तदंते स्वकक्षायां पूर्वभाद्रपदा तिष्ठति अथोत्तराभाद्रपदा ध्रुवो
मीने सप्त भागास्ते मीनकालांशैर्गुणनीयाः त्रिंशता भाज्या लब्धमुत्तराभाद्रपदाकालांशास्तान् मीना
१५७ दितो विषुवत्कक्षायां प्रसार्य तदंतादुत्तरतः स्वकक्षांतं प्रांशगुलानि प्रसार्य तदंते कक्षायामुत्तरभाद्रपदा
नक्षत्रं तिष्ठति अथ रेवती ध्रुवो मीने एकोनत्रिंशद्भागाः ये चाप्येते त्रिंशता च मीनकालांशैर्गुणनीयाः
त्रिंशता भाज्याः लब्धं रेवतीकालांशा भवंति तान् मीनादितो विषुवत्कक्षायां प्रसार्य तदंताद्दक्षि
णतः स्वकक्षांतं प्रांशगुलानि प्रसार्य तदंते स्वकक्षायां रेवतीनक्षत्रं तिष्ठति एतन्नक्षत्राणां दक्षिणो
त्तरचलनमयनांशवशाद्भवंति यथा रेवतीनक्षत्रं तिष्ठति एतन्नक्षत्राणामुत्तरचलनमयनां
शानक्षत्रा[illegible]णां स्पष्टकांत्या उत्तरचलनं असकृद्भागस्थानां नक्षत्राणां स्पष्टकांतिवशाद्दक्षि
णगमनं अयनांशाभावे दक्षिणोत्तरचलनं नास्ति किंतु तदा अश्विनीध्रुवकालांशांगुलानि र
वौ नीतानि मेषविषुवत्कक्षायां दुत्तरतो ध्रुवभागे स्वकक्षांतं प्रांशगुलानि त्रयोदश पंचदश पलानि प्र १५७
सार्य तदंते स्वकक्षायामश्विनीनक्षत्रं तिष्ठति एवं भरण्यादीनां [illegible] स्वस्वकक्षायां स्वस्वकांति
वशात् स्थितिर्ज्ञातव्या अथ सप्तर्षीणां स्वकक्षायां प्राक्चलनं स्वल्पमस्ति न दक्षिणोत्तरचल

नेष्ट्रा कृच्चलनमपि विषुवत्कक्षायां पंचदशभिर्विंशैरंगुलद्वयमंगुलद्वयं भवति तस्मात्सप्तविंश
तिविंशैर्भागैर्लक्षितैर्भवति अथागस्त्यध्रुवो मिथुनांते नियतस्तस्माद्विषुवत्कक्षायां मिथुनांत
स्थानाद्दक्षिणतः स्वकीं संख्यांगुलानि प्रसार्य तद्देते स्वकक्षायामगस्त्यस्तिष्ठति लुब्धकस्यापि
मिथुने विंशतिर्भागा ध्रुवो मिथुनकालांशैर्गुणनीयास्त्रिंशताभाज्या लब्धं लुब्धकध्रुवकालो
ऽशास्तान् मिथुनेदेत्वाद्दत्ता विषुवत्कक्षायां लुब्धकस्तिष्ठति ॥ ॥अयनाख्यनंचे
वकक्षात्तिर्यग्[illegible]गपथापरं ॥ क्रांतिसंज्ञा तया सूर्यः सदा पर्येति भासयन् ॥२७॥ ॥विषुवत्
स्थानात्त्रिभेंतरे यदुत्तरतो दक्षिणतोयत्स्थानं तद्द्वितीयायनस्थानं तत्स्थानाद्यथा सूर्यस्यगम
नं तथा क्रांतिकक्षा तिर्यक्कल्प्या सैव क्रांतिकक्षा सूर्यमार्गः स्यात् तेनैव मार्गेण लोकान्प्रकाशय
न् सदा सूर्यो भ्रमति एतदुक्तं भवति एवं स्वस्तिकाद्दशमित्रिभेंतरे विषुवद्वृत्ताद्भागचतुर्विंशत्या
उत्तरतो यथा भवति एवं ततः त्रिभेंतरे विषुवद्वृत्ताद्भागचतुर्विंशत्या दक्षिणतश्च तथा भवति त
था पूर्वापरविषुवत्स्थानयोः संलग्नमाधारकक्षायद्वृत्तं निबध्यते तत्क्रांतिवृत्तं तद्गुणपूर्वकं तत्कर्त
व्यं उक्तं च शिरोमणौ क्रांतिपाताद्भबद्धेंतरे नाडिकावृत्तलग्नं विदध्याद्द्वितीयं पाततः प्राक्त्रिभेलि
प्तभागैस्तदग्रदक्षिणे तेष्वभागे विभागे परे स्यादिति तत्र विषुवद्वृत्तक्रांतिवृत्तांतरे दैनं क्रांतितुल्यंत
रेनवतिकला भवंति तावन्ति तावत्स्वरूपानि तानि पलकैर्घटिकाभिरंकानि क्रांतिकलाभिः स्वक
लासंपात एव सदेति ॥ ॥चंद्राद्याश्च स्वकैः पातैरपमंडलमाश्रितैः ॥ ततोपकृष्य दृश्यं

वे विक्षेपांतेष्व ऽपक्रमात् ॥ २२ ॥ ॥ चंद्राद्या ग्रहपातैः यद्रूपमंडलमाश्रितैः स्वस्वपातैरूपकक्ष्यंते त
तोऽपमंडलाद्विक्षेपांतेषु दृश्यंते एतदुक्तं भवति मंदस्फुटो ग्रहो यदा पाततुल्यो भवति तदा स्वकीयक्रांति
कक्षायां भ्रमति यदा मंदस्फुटो ग्रहः पातान्न्यूनोऽधिको भवति तदा स्वपातापकक्षः स्वक्रांतिकक्षाविक्षे
२५८ पवशादुत्तरतो दक्षिणतश्च विक्षेपांते भ्रमति स्वपातग्रहा अपि क्रांतिकक्षातो विक्षेपवशादुत्तरतो द
क्षिणतश्च विक्षेपांते भ्रमति स्वपातग्रहा अपि क्रांतिकक्षामेवाश्रित्य तदा तिष्ठंति विषुववृत्तक्रांति
वृत्तयोस्तिर्यग्गतरं क्रांतिः क्रांतिवृत्तमंडलवृत्तयोरंतरं शरः विषुववृत्तयोरंतरं स्पष्टाक्रांतिः ॥
॥ ॥ उदये क्षितिजे लग्नमस्तंगच्छति तद्वशात् ॥ लंकोदयैर्यथासिद्धं खमध्योपरि मध्य
गं ॥ २३ ॥ ॥ उदयं गच्छन्नर्कः क्षितिजे यदुदयलग्नं भवति यदस्तं गच्छन् सषड्भो रविरस्तकालिकः
स्वकीयास्तकालिके लग्नं भवति स्वकीयोदयास्तलग्नयोरंतकाले घटिकादिकं स्वदिनमानं भव
ति स्वाहनाईघटिकादिः लंकोदयैः स्वकवल्लाद्यैर्लग्नं साध्यमुभयक्षितिजयोर्मध्ये खमध्यलग्नं भ
वति तन्मध्यलग्नार्कांतराल घटिकादिनार्द्धं भवति अत्र त्रिप्रश्नवासना मध्यक्षितिजयोर्मध्येप
ज्यासाधनादि धीयते त्रैयाचरदलज्यातु विषुवत्क्षितिजांतरं ॥ २४ ॥ स्वदेशमध्यस्वक्षितिजयोर्मध्ये
अंतरं तद्धृद्रूपैर्याज्याभवति सैवांतेऽप्युच्यते तद्धनुर्लिप्ताः कालकला भवंति ययोर्मध्ये कालभागा भव. २५८
ति तद्धत्तरगोलके स्वक्षितिजाद्धो विषुववृत्त संपातस्थलात् ऊर्ध्वं खंडऽशीत्याधिकशतादधिका भवं
ति उन्मंडलात्क्षितिजस्याधोगतत्वात् दक्षिणगोलेऽर्के स्वक्षितिजादधो विषुववृत्तसंपातस्थलाद
धः खंडऽशीत्यधिकशतादल्पा भवंति क्षितिजादुन्मंडलस्याधोगतत्वात् विषुवद्दिनदैर्घ्ये देशांतरे

शीत्यधिकप्रातमेव स्वदेशक्षितिजाहोरात्रवृत्तसंपातस्थानयोर्यदंतरं साचरदलज्या भवति धनुरस्य
नं घटिका उत्तरगोले पंचदशघटिकायुता सदि लग्नगोले रहिता दिनार्द्धं स्यात् अथाग्राग्रयोर्बद्धं सूत्र
मुदयास्तसूत्रं एवमहोरात्रवृत्तोन्मंडलसंपातयोर्बद्धं सूत्रमहोरात्रव्याससूत्रं अनयोः सूत्रयोरंत
रं क्षितिज्या अथाहोरात्रवृत्तस्य याम्योत्तरोन्मंडलसंपातयोर्बद्धं यत्तन्मितं व्यासार्द्धसूत्रं पूर्वोक्तव्या
स्यसूत्रस्यास्य च यत्र संपातस्तस्मादुपरितनखंडं दिनज्या अथ सममंडलाहोरात्रवृत्तसंपातात्क्षि
तिजवृत्तसंपातमध्यभागज्या क्षितिजेग्रा भवति एकं चास्मिन्हंता त्रिशिरोमतौ स्याजे घुरात्रे सममं
डलमध्यस्थाग्रजीवाग्निका भवति पूर्वपरराशयोः सा ॥ अग्राग्रयोः प्रगुणमत्र निबद्धसूत्रं यत्त
द्वदंति गणका उदयास्तसूत्रमिति अथोदयवासना विषुवदहोरात्रवृत्तानि लंकायां सममपश्चि
मगानि राशिवलये तु मकरादौ परमक्रांत्या विषुवन्मंडलाद्दक्षिणतः मिथुनादावुत्तरतो लग्नं अ
तस्तत्तिरश्चीनं अत्रापि मेषः स्वक्रांत्या महत्या रश्मनी उदेति अतोऽल्पकालोदयः अथ मकराद
यो याम्यनतास्ते याम्याग्रत्वप्राग् अतिनता उत्तिष्ठंति स्वदेशेनोऽल्पकालोदयाः यत्तु मिथुनादयः स्व
स्वक्रांत्या सौम्यनताः ते याम्याग्रत्वप्राग् ऋजुत्वं गताः उत्तिष्ठंति अतश्चिरकालोदयाः लंकादेशा
योरंतरं तरे स्वचरखंडमेव भवति यतस्तत्क्षितिजयोरंतरालेंतरं अथ चरखंडैरूनाधिकलंका
लग्नमलो परियथाप्रतीयते उदयवासना त्रिप्रश्नाध्याये व्याख्यातेव उदयास्तत्क्षितिजयोरंतराले
रंतरं उदयास्ते गृहलग्नत्रिप्रश्नादिकमपि दि[illegible] वासनाः पूर्वमेवोक्ताः ततस्तत आहस्पनाभोलोपरि

विचार्याः॥ ॥कृत्वोपरि स्वयं स्थानं मध्ये क्षितिजमंडलं॥ वस्त्रच्छन्नं वहिश्चादितो का
लोकेन वेष्टितं॥५७॥ ॥स्वदेशो मंडलं यद्वोपरि भवति जमंडलं च यथा मध्ये भवति तथा गोलं
तिर्यक् स्थापयेत् स्वदेशो मंडलं क्षितिजयोः साधनप्रकारश्च पूर्वमेवास्माभिरुक्तः इत्थं भगोल
१५९ रचनां कृत्वा गुप्तभुविप्रदेशे हिमभिकं गृहं कारयेत् तत्र गर्भगृहे चाधः स्थितगृहे छायापि विवु
वेष्टितायां गुलाई तुल्यः कार्यः उपरितनगृहे तन्मध्ये छिद्रोपरि तन्मध्ये रचितगोलगृहाभ्यंतरेप्र
१५९ वेश्यार्थं यथा दृश्यं भवति तथा स्वदेशक्षितिजकक्षांगुलाद्दक्षिणभागे मेरुदंडाग्रमसुरभाग
स्थितदक्षिणध्रुवाश्रितं स्वदेशलंबांशांगुलातुल्याद्दक्षिणक्षितिजादधो न्यसेत् ततः स्वदेशखम
ध्यं कृत्वा तत्तुल्योन्नत स्वध्रुवोपरि यथा दृश्यते तथा मेरुदंडोत्तराग्रं स्थापयेत् इत्थं भचक्रसंस्था
प्यतद्भगोलभ्रमणमात्रसुस्थिरं कृत्वा तदुपरि नतगृहस्योपरितनप्रदेशं च जलेपादिना सम्यगाच्छा
दसमी कुर्यात् तत्स्थापितहिमभिकरगृहस्य समां जाद्दीर्घवेलुभिः सारदारुभिर्नीतुच्छायं गृहं
कारयित्वा तत्स्वं गृहं वस्त्रैराच्छन्नं कार्यं। तदेव ब्रह्मांडमिति कल्पनीयं तद्यंत्रो रात्रिके लोकाय
देन कथ्यते॥ ॥अथ तच्छायवयोगेन कालभ्रमणसाधनं॥ गुलावीजसमाकृष्य गोलयं
त्रं प्रसाधयेत्॥५८॥ ॥इत्थं भगोलरचनां कृत्वा भगोलरचनाविशेषानि पुरातनो कृत्वास्तेभ्यः
ज्ञात्वा ज्ञातयंत्रो लोककलानुरूपभ्रमणार्थं वीजं प्रयत्नेन पुरातनैर्निरूपितं तदत्रापि यज्ञदिशाजैरचितं १५९
पारसलांवुरसनालीसादिना तद्वीजसम्यक्साध्य रचितयंत्रेषु यथा [illegible] तास्मिन्न वीजसम्यक्
प्रयुक्तैरचितयंत्रे कालानुरूपेण स्वयमेव भ्रमति तत्साधितवीजं [illegible] मिश्रं सिद्धं साधितं

अथ तच्छ्रवणादेव नोच्यते ततो मेषादिषड्विषुवत्कच्छायया उत्तरतः तुलादिषड्के विषुवत्कच्छायया दक्षिण
तः स्वकार्ते क्रान्तिकच्छायाभ्युदयकाले रविबिम्बं प्रतिदिनं स्थापयेत् प्रतिदिनं स्वर्योदयो यस्मै तदुक्तं स्वके
लशंकुं स्थमाकृष्य पुनर्विषुवच्छायां सवेष्टालांगुजलसंस्थं जलपूरितायं परकुलग्रोस्थापये
त् तद्विलकलशमध्ये छिद्रकेन द्रव्ये रिति वहन्तं तालकषं भ्रगोलं नाडीवृत्तं प्रतिदिनं भ्रमति रविर
भ्युदयकाले भचक्रस्य उदयक्षितिजे दृश्यते विषुवच्छायामेवास्ति समये प्रसक्तिक्षितिजे ऽ
लमयं तत्र तद्दिनप्रमाणघटिकारात्रिप्रमाणघटिकाश्च तत्कर्काद्युदितजलतुल्या भवन्ति इत्थं
विषुवत्कच्छायामेव क्रान्तिकच्छायया पार्श्वस्थितविक्षेपकच्छायाभिः दिनस्वकीयाक्रान्त्या ग्रहो भु
क्तकालांशांतस्थानादुत्तरदक्षिणे वा रजतमयं चेद्दक्षिणे वा रजतमयं स्वविक्षेपांते स्थापयेत् ग्रहरद्ध
येवं द्वाविंशं भुक्तकालांशानुसारेण किंचिन्न्यूनाधिकांगुलत्रये स्वराशौ प्राकृप्रसार्य स्थापयेत् ए
वं भौमादीनामपि बिंबानि स्वेष्टदिने इष्टराशौ क्रान्तिकच्छायया ततः पार्श्वे स्वविक्षेपांते स्वकीयस्व
यवलानि स्थापयेत् मन्तिमुक्ताप्रवालतुल्यानि उदयक्षितिजे प्रतिदिनं स्वकीयकालभुक्तितुल्यं
प्राक्चलनं कृत्वा स्थापयेत् अन्येषामपि स्व्यादीनां वा स्वाकारवर्णतुल्यानि स्वकक्षासु स्व
स्थानेषु स्थिरं स्थाप्यानि इति गृहनक्षत्रसहितं रचितं भपंजरं रचितं प्रतिदिनं भ्रमयेत् भचक्रस्यापि
साधः स्थितं गृहं मन्यपुरुषं न प्रवेशयेत् आचार्यः स्वयमेव वच्छिष्यस्तत्र दृष्टो वा प्रविशेत् ॥ ॥
॥ ॥गोप्यमेतत्प्रकाश्यं लोके सर्वगम्यं भवेदिह ॥ तस्मान्गुरुपदेशेन रचयेत्कालमुत्तमं ॥

॥८॥ युगे युगे समुच्छिन्ना रचिता येन विवस्वतः ॥ प्रसादात् केवलं सच्चिद्रूपः प्रादुर्भवति कालतः ॥ ९ ॥ श्री
॥ ॥ स्वकार्यमेतत्सयत्नं इदानीं यंत्राध्यायो व्याख्यायते ॥ ॥ कालं संसाधुना
१६० र्यपि तथा यंत्राणि साधयेत् ॥ एकाकी योजयेद् बीजं यंत्रे विस्मयकारकं ॥ १९ ॥ शंकुयष्टिधनु
श्चक्रैः छायायंत्रैरनेकधा ॥ गुरूपदेशाद्विज्ञेयं कालज्ञानमतंद्रितैः ॥ २० ॥ ॥ सूर्योदयात् प्रार
160 भ्य दिवि विमले रवौ दिनस्य गतमम्य[illegible]कालसाधनार्थं छायायंत्राणि शंकुयष्टिधनुश्चक्रा
दीनि ज्ञातव्यानि तान्यपि वयं कथकप्रकारैर्गोलप्रकारस्तु आगमणबीजवशात्त्वकैरेव
ज्ञायते सिद्धान्तो वा यंत्रा सिद्धिपर्यंतं हि मां बीजं वा रचितसयंत्रैः एक एव कुर्यात् कालानुरूपम
सिद्ध यंत्रे प्रदर्शयेत् ॥ ॥ तोययंत्रैः कपालाद्यैर्मयूरनरवानरैः ॥ ससूत्ररेणु
गर्भैश्च सम्यक्कालं प्रसाधयेत् ॥ २१ ॥ पारदारांबुसूत्राणि शुल्वतैलजलानि च ॥ बीजानि
पांशवस्तेषु प्रयोगास्तेऽतिदुर्लभाः ॥ २२ ॥ ॥ कपालयंत्रं घटिका तद्धस्ति स्वयमेव हि तथान्यत् क
पालमयूरशंकुवानरप्रभृतिभिरष्टादशविधैर्जलयंत्रैः ससूत्रेण सह वेणुशलाका यथायोगं पगर्भे येषां तैर्यं
त्रैः कालं सम्यक् साधयेत् पारदप्रभृतिपांशुश्चैवेषां बीजानि वारवादियोगादेव यंत्रेषु तेषां बीजानां प्रयो
गाः स्वतो ज्ञातुमशक्याः केवलं गुरूपदेशगम्यत्वात् यंत्रद्वयं सर्वगम्यत्वाद् यंत्रद्वयं सर्वगम्यमाह ॥ ॥ १६०
॥ ॥ ताम्रपात्रमधःछिद्रं न्यस्तं कुंडे मलांभसि ॥ षष्टिर्मज्जत्यहोरात्रे स्फुटं यंत्रं कपालकं ॥
॥ २३ ॥ दशपलनिर्मितं वृत्तपात्रं चतुर्थांशयुक्तं वर्णनिर्मितशलाकया बांगुलदीर्घया सुवृत्तया अधः
[illegible] ॥ यंत्रांतराणामुपदेशः

छिद्रं कल्पयेत् एतत्कपालयंत्रं घटिकेत्युच्यते तद्यंत्रं निर्मलजलपूर्णे कुंडे ऽहोरात्रं षष्टिवारं मज्जति
उक्तं च वृत्तं ताम्रमयं पात्रं कारयेद्दशभिः पलैः। षडंगुल[illegible]दि तदधो विस्तारे द्वादशांगुलं। तस्याधः
कारये। तच्छिद्रं कर्षैस्त्रिषडंगुलैर्नतं। इत्येतत् घटिकासंज्ञं पलषष्ट्या तु पूरणं। स्वच्छवाप्यदहोरात्रे षष्ट्याभ
सि निमज्जनैः ताम्रपात्रमधः छिद्रमेवं तु यंत्रं कपालकं। तलेऽंगुलविस्तारः पद्दत्तो ह्यादशोर्ध्वतः इति
॥अथ नरयंत्रं॥ ॥नरयंत्रं तथा साधु तथा च विमले रवौ॥ छायासंसाधनैः प्रोक्तैः काल
साधनमुत्तमं॥ यंत्रैरेवादशविधैः सम्यक्कालं प्रसाधयेत्॥ २५॥ ॥दिवा रवौ विमले मेघावरण
रहिते नरयंत्रं प्राकः शोभनः स्वच्छः तत्र शंकुस्त्रिविधः एको मूलाग्रतुल्यपरिधिर्द्वादशांगुलो छाया
द्वांगुलविस्तारः अपरो द्वांगुलविपुलो द्वादशांगुलः सूच्यग्रभागोपरि तयोस्तिर्यकास्य तत्पृविरह
यवृत्तः तत्सुषिरयोस्तिर्यक् शलाका द्व्याग्रलंबितस्सूची नरशंकुः द्वादशांगुलः स्थूलसममूलाग्र
तुल्यपरिधिकल्पित द्वादशांगुलः सर्वत्रैव व्यवहारे योग्यपरः तृतीयो बद्धेः सूक्ष्मसंगामुख
कात्रिज्यांगुल ५७॥ ५८ तुल्यदीर्घः स्यात् तदनु त्रिज्यांगुलकल्पित वृत्तस्य ३६० वेष्टी त्य
धिकपरतांकांकितमर्धवृत्तं सा ज्या सर्पारं ज्ञातव्यं त्वकें त्रिज्यांशांगुलवृत्तं परिधौ भगणांशांकि
तविभुवत्स्यानयोः छिद्रं युक्तं स्यात् छत्रयंत्रमपि चक्रवादेव कृत्वा मध्ये दंडयुक्तं स्यात् तद्दंडं त्रि
ज्यांगुलप्रमाणं स्याच्च एतैश्छायायंत्रैः गुरूपदेशादेव कालो ज्ञातव्यः कालज्ञानप्रकारस्त्वग्रे यंभ
द्यघटी प्रथममेकं स्तंभमंततः सुषिरं सुवृत्तं दीर्घमंततः छिद्रं जलपूर्णं कृत्वा घटिकामात्रे विस्ता
रे वजलं स्त्रावयेत् यावत्यो घटिका भवंति तावतीभिः स्तंभप्रमाणांगुलैर्भागमाहृत्य लब्धांगु

लेरेक घटिकास्तंभोच्छ्राये ज्ञातव्या एवं षष्टिघटिका कल्पितोच्छ्रायं स्तंभं स्थापयेत् तदुपरि मयूरं वानरं
वा स्वरूपाकारं स्थाप्य अन्यत्कर्म पत्र्यादिवा स्वरूपं यंत्रं वेणुशलाकादिभिः कारयित्वा ततः शुषिरं स्तंभे
स्थापयेत् तस्य कुक्षौ तिर्यक्शलाकां स्थापयेत् स्थापशलाका यावद्वेधविता नाविधितं सूत्राग्रे पात्रं
१६१ जलपूर्णमलाबुवद्धाग्रे छिद्राद्धः स्तंभजले निक्षिपेत् तदधः शुषिरे जलं मोचयेत् कुक्षिस्था
161 पितशलाकाग्रे बहिर्नाडीज्ञानाय परं सूत्रं लंबयेत् एकवेधनेनैका घटिका ज्ञातव्या अथवा स्त
भं विना नर एव केवलो यंत्रत्वेन वेणुशलाकादिभिः कल्पनीयः तस्य गदगलात्तरलशुषिरमुद
रमध्यं घटिकास्तंभवत्कल्पनीयं तस्य जलहरितस्य छिद्रमध्य सुखरे तिर्यक्शलाकां कलरं
घयोः संस्थाप्य तेहस्ति सूत्राबुवद्धागलागलादधः स्थले न्यसेत् अधो मोचयेत् घस्तले
सूत्रमछिद्रे तत्कालके बहिरपरं सूत्रं बध्नीयात् नाडीज्ञानाय एतच्च तथा प्रच्छन्नं कर्तव्यं यथा स्तं
भमात्रं नरमात्रं वा दृश्यते ॥ ॥ग्रहनक्षत्रचरितं ज्ञात्वा गोलं च तत्त्वतः ॥ ग्रहलोकान
वाप्नोति पर्यायेण तमवान्नरः ॥२६॥ ॥स्पष्टार्थः॥ इति श्रीज्योतिर्विद्वदत्तात्मज भूधर
विरचिते सूर्यसिद्धांतविवरणे गोलयंत्राध्यायस्त्रयोदशः ॥१३॥ ॥अथ मानाध्यायो व्याख्या
यते ॥ ॥ब्राह्मं दैवं तथा पित्र्यं प्राजापत्यं गुरोस्तथा ॥ सौरं च सावनं चांद्रमार्क्षं मानानि वै न
व ॥१॥ स्पष्टार्थः ॥ ॥अथ व्यवहारोपयोगिमानकथनं ॥ ॥चतुर्भिर्व्यवहारोत्र सौर १६२
चांद्रार्क्षसावनैः ॥ बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः ॥२॥ सौरेण द्युनिशोर्मानं षडशीति
मुखानि च ॥ अयनं विषुवं चैव संक्रांतेः पुण्यकालता ॥३॥ ॥सौरेण मानेन न दिनप्रमाणारः

च तत्र मेषादिषट्केऽर्केऽर्कभोगेन दिनमधिकं रात्रिरल्पा तुलादिषट्के दिनमल्पं रात्रिरधिका षडशी
तिमुखानि दिनानि चत्वारिंशो दिंशो सौरमानेन ज्ञेयानि तान्यत्रैक[illegible] ते तथा सौरमानेनैवोक्त
रायनं दक्षिणायनं च मेषादिराशीनामयनान्यपि षडशीतीनामविषुवत्कालेत्यं सूर्य
कां तव [illegible] ज्ञातव्यं ॥ ॥ भचक्रे परिवर्तेन भानां देवसुरद्विषां ॥ अहोरात्रं कृतादी
नांस्य [illegible] यथोदिता ॥ ४ ॥ ॥ अर्कस्य मेषादिषट्के भ्रमणं देवानां दिनं असुराणां
रात्रिः तुलादिषट्केऽर्कभ्रमणं देवानां रात्रिरसुराणां दिनं इत्येकस्य मेषादिद्वादशराशिभ्रम
णं देवानामसुराणामहोरात्रप्रमाणमिति ज्ञेयं तथा कृतत्रेताद्वापरकलियुगानां पूर्वोक्त
प्रथमाध्यायोक्तं प्रथमाध्यायोक्तं प्रमाणं सूर्यमानेन ज्ञातव्यं तत्र सप्तदशसहस्राणि । लक्षाणि अष्टाविंशति ८
१७२८००० सूर्यवर्षाणि कृतयुगप्रमाणं द्वादशलक्षाणि षण्णवतिसहस्राणि १२९६०००
सूर्यवर्षाणि त्रेताप्रमाणं अष्टौ लक्षाश्चतुःषष्टिसहस्राणि ८६४००० सू
र्यवर्षाणि द्वापरप्रमाणं लक्षचतुष्टयं द्वात्रिंशत्सहस्राणि ४३२ सूर्यवर्षाणि कलि
युगप्रमाणं ॥ ॥ तुलादिषडशीत्यास्यं षडशीतिमुखं दिनं ॥ तच्चतुष्टयमेवं स्याद् द्विःस्वभा
वेषु राशिषु ॥ ५ ॥ षड्विंशे धनुषो भागे द्वाविंशेऽनिमिषस्य च ॥ मिथुनाष्टादशे भागे कन्यायाश्च चतुर्दशे ॥ ६ ॥
ततश्शेषाणि कन्याया यान्यहानि तु षोडश । क्रतुभिस्तानि तुल्यानि पितृणां दत्तमक्षयं ॥ ७ ॥ ॥ क्र
तुभिस्तानि नःसूर्यदिवसाः तस्मात्तुलराशेरर्कविंशदिनानि वृश्चिकस्य त्रिंशद्दिनानि धनुषः षड्वि

शांतिरर्कांशाः इत्यर्कक्रांतषडशीतिभागांते धनुषि षड्विंशे प्रथमं षडशीतिमुखं दिनं धनुषि भाग
चतुष्टयं मकरे त्रिंशत् कुंभे त्रिंशत् मीने द्वाविंशतिरित्यर्कक्रांते द्वितीयषडशीतिभागांते मीने द्वावि
शांशे द्वितीयषडशीतिमुखं दिनं तन्मीनशेषभागाष्टकं मेषे त्रिंशत् वृषे त्रिंशत् मिथुने द्वादश भागा इ
१६२ त्यर्कक्रांते तृतीयषडशीतिभागांते मिथुने द्वादशांशे तृतीयं षडशीतिमुखं दिनं मिथुने शेषभागा अष्टा
162 दश कर्कटे त्रिंशत् सिंहे त्रिंशत् कन्यायां चतुर्दश इत्यर्कक्रांते चतुर्थषडशीतिभागांते चतुर्थं षडशी
तिमुखं दिनं भवति इति धनुर्मीनमिथुनकन्याराशिषु द्विःस्वभावेषु षडशीतिमुखं दिनं चतुष्टयं सौ
रमानेन ज्ञेयं कन्याराशिषु शेषाः सूर्याक्रांताः षोडश भागाः सौरदिनानि तेषु पितृणामाहारादि कर्म
ते चेत्तदा पितृणां मनुष्याणां तृप्तिः आकल्पं प्रतिदिनं यत्तत्तुल्यं फलं स्यात् ॥ ॥भचक्र
नाभौ विषुवद्द्वितयं समसूत्रगं ॥ अयनाद्वितयं चैव चतस्रः प्रथितास्तु ताः ॥८॥ तदंतरेषु संक्रांतिद्वि
तयं द्वितयं पुनः ॥ नैरंतर्यात्तु संक्रांतेर्ज्ञेयं विष्णुपदीद्वयं ॥९॥ भानोर्मकरसंक्रांतेः षण्मासा उत्तराय
णं ॥ कर्क्यादेस्तु तथैव स्यात् षण्मासा दक्षिणायनं ॥१०॥ द्विराशिनाथा ऋतवस्ततोऽपि शिशिरादयः ॥मे
षादयो द्वादशैते मासास्तैरेव वत्सरः ॥११॥ अर्कमानकलाः षष्ट्या गुणिता भुक्तिभाजिताः ॥ तदर्द्धनाड्यः
संक्रांतेरर्वाक् पुण्यं तथा परे ॥१२॥ ॥भचक्रनाभि भचक्रस्य तुण्डिकेत्युच्यते तत्सान्द्रातद्वैपरयोः १६२
समसूत्रस्थं मेषायनं तुलायनं च भचक्रस्य तुण्डिकेत्युच्यते तत्सान्द्रातद्वीपरयोः समसूत्रस्थं मकरकर्का
यनं च एतदयनचतुष्टयं चतुर्दिक्षु स्थितं स्यात् भचक्रस्य धारा परिधिरित्युच्यते तस्मादेतच्चतुष्टयं चतु

ष्टयं चतुर्दिक्षु च चतस्रो भचक्रे परिधयः स्युः इति मेषतुलकर्कटधनुराशिचतुष्टयं चरराशिसंज्ञं चतुर्दि
क्षु सूर्यभ्रमणम् यदास्यात् तं पूर्वैः स्वभावराशिचतुष्टयमुक्तं तस्माद् द्विःस्वभावराशिः धनुश्चरराशिर्मे
षः तद्वयोरन्तरं वृषराशिः स्थिरसंज्ञको विष्णुपदमुच्यते तथा मिथुनकर्कटयोरन्तरं स्थिरराशिः सिंहः
सोपि विष्णुपदं इति द्वौ विष्णुपदद्वयं तथा कन्यातुलयोरन्तरं वृश्चिकः स्थिरराशिः धनुर्मकरयोरन्त
रं कुम्भः स्थिरराशिः एतदस्तु राशौ विष्णुपदद्वयं इति चत्वारः स्थिरराशयः सूर्यक्रान्ता विष्णुपदाः स्युः
तथा भानोः क्रान्तशरणयो मकरसंक्रान्तितो मकरकुम्भमीनमेषवृषमिथुनाः षट् उत्तरायणसंज्ञकाः स्युः
तत्र मकरकुम्भौ शिशिरसंज्ञौ ऋतुः मीनमेषौ वसन्तर्तुः वृषमिथुनौ ग्रीष्मर्तुः तथा कर्कक्रान्ते कर्कटसिं
हकन्यातुलावृश्चिकधनूराशिषट्कं दक्षिणायनसंज्ञं तत्र कर्कटसिंहौ वर्षर्तुः कन्यातुलसंज्ञकौ श
रदृतुः वृश्चिकधनुःसंज्ञकौ हेमन्तुः स्यात् एते पुण्यकर्क्रान्तकालसूक्ष्मो दुर्लभः तथापि स्नानदानादि
षु पुण्यकालादि प्रतिपादनार्थं सूर्यबिम्बकलाः षष्टिगुणिताः स्फुटभुक्तिभक्ता लब्धं घटिकाद्यं एत
त्किञ्चिन्न्यूनाधिकाः स्युः तत्काले भुक्तिवशात् तद्वत् षोडश घटिकाः संक्रान्तिकालात् प्राक् स्नानदाना
दिकर्मसु पुण्यफलदाः परतोपि स्यात् षोडश घटिका संक्रान्तेः पुण्यकालः स्यात् अत्रापि धर्मशास्त्रो
क्तः कालविशेषोपि संक्रान्तिषु तज्ज्ञैर्विज्ञेयः तत्रादौ प्रथमतः संक्रान्तिसूक्ष्मकालः कथ्यते सुस्थे नरे सु
खासीने यावत्स्पन्दति लोचनं । तस्य त्रिंशत्तमो भागस्तत्परः परिकीर्तितः । तत्परस्य शतभागस्त्रुटिरिति
धीयते त्रुटेः सहस्रभागो यः स कालो रविसंक्रमी द्रवीभवति तत्काले त्रैलोक्यं सचराचरं । ब्रह्मापि तन्न

जानाति किं पुनः प्राकृतो जनः। तथा सति संक्रांतौ स्नानदानादिकमित्यादि कुर्यात् अथ वक्ष्ये षोडश नाड्यः पु
नाड्यः पश्चाच्च षोडश। पुण्यकालोऽर्कसंक्रांतेः स्नानदानजपादिषु इति सर्वसंक्रांति साधारण धर्मः विशे
१६२ षः पुनरुच्यते मध्ये विषुवति दानं विष्णुपदे दक्षिणायने चादौ षडशीतिमुखे तीते तथोदगयने विभु
रि फलं इति रविमानं ॥ ॥अर्काद्विनिःसृतः प्राचीं यद्यात्यहरहः शशी ॥ तच्चांद्रमानमंशैस्तु
163 ज्ञेया द्वादशभिस्तिथिः ॥२३॥ तिथिः करणमुद्वाहः क्षौरं सर्वास्तिथौ क्रियाः। व्रतोपवासयात्राणां क्रिया
चांद्रेण गृह्यते ॥२४॥ त्रिंशता तिथिभिर्मासश्चांद्रो मासः पित्र्यमहः स्मृतं ॥ निशा च मासपक्षांते तयोर्मध्ये
विभागतः ॥२५॥ ॥अर्काद्विनिःसृतश्चंद्रः प्राङ्मुखः सन् शुक्लपक्षांतं याति पुनर्व्यपक्षप्राप्तः प्राङ्मुखः
सन् भगणं संपूर्य अमावास्यांतेऽर्कं प्रविशति तस्माद्दिने न चंद्रार्कौ स्फुटौ कृत्वाऽर्कोनचंद्रात् दृष्टी कृता
द्वादशांशभुक्ता प्रतिपदादिगता तिथयो भवंति तस्मात् यदर्केंदुभागो द्वादशभिर्वा ताः तिथिः स्यात् इति मर्कें
दु भगणार्धांते पौर्णमासी संपूर्णस्यात् भगणांतेऽमावास्या स्यात् इत्थं चैत्रशुक्ल प्रतिपदादितिथयश्चै
त्रमासः तथा वैशाखादयो मासा ज्ञेयाः प्रतिपदादि चांद्रतिथ्यर्धं करणं स्यात् तत्र शुक्लप्रतिपदादि ता
यार्धमारभ्य ववादिकं चरास्त्रं शकुन्यादि स्थिरास्त्रं च तिथ्यर्धमानेन भवति तत्र विहिततिथिषु वि
वाहादिकार्यं पौर्णमास्यामावास्यापर्वक्रिया गोत्रवे तत्तत्सर्वं चांद्रमानेनैव स्यात् तत्र यदर्केंदुराशिषट्कां १६२
ते पौर्णमासी तदपि तत्समध्यरात्रिः अमावास्यांते मध्याह्ने हे ... सूर्योदयः स्यात् इति
चांद्रमानं निरूपितं भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते भचक्रस्यादिरश्विनी नेत्रं तत्तत्प्रदेशा
॥ ॥ ॥ ॥

नियतमत्र चक्रस्थं तं स्वस्वदेशोदयात् पुनर्भचक्रस्याश्विनीनक्षत्रोदये नक्षत्रं दिनं इति नाक्षत्रं मानं ॥ ॥
॥ ॥ नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वान्तयोगतः ॥ २४ ॥ कार्तिकादिषु संयोगे कृत्तिकादि द्व
यंं३ यं द्वयं ॥ अन्त्योपान्त्यौ पञ्चमश्च त्रिभिर्मासस्त्रैस्मृतं ॥ २५ ॥ वैशाखादिषु कृष्णेषु योगः पञ्चदशी तिथौ ॥
कार्तिकादीनि वर्षाणि गुरोरस्तोदयात्तथा ॥ २६ ॥ ॥ मासारम्भकनक्षत्रं मारभ्यापि भनक्षत्रभो
गपर्यन्तं नाक्षत्रो मासः तदारम्भकनक्षत्राणि च कृत्तिका रोहिणी च चन्द्रयोगेन कार्तिको मासः मृ
गशिर आर्द्रा च मार्गशीर्षो मासः पुनर्वसुपुष्यश्च पौषो मासः अश्लेषामघा च माघो मासः पूर्वा
फाल्गुनी उत्तराफाल्गुनी हस्तश्च फाल्गुनो मासः चित्रा स्वातिश्च चैत्रो मासः विशाखानुराधा
च वैशाखो मासः ज्येष्ठामूलश्च ज्येष्ठो मासः पूर्वाषाढोत्तराषाढो मासः श्रावणधनिष्ठा
च श्रावणो मासः शतभिषक् पूर्वाभाद्रपदोत्तराभाद्रपदो मासः रेवती अश्विनी भरणी चाश्वयुजो मा
सः एतेषु कार्तिकादिवर्षाणां गुरोर्नक्षत्रयोगो विज्ञेयः तत्कथमित्युक्ते कदा कार्तिकवर्षे वैशा
खमासि सूर्यः प्रायेण [redacted] कृत्तिकानक्षत्रस्थो भवति तदैव गुरुः कृत्तिकानक्षत्रे रोहिण्यां नक्ष
त्रस्थो वा वैशाखमासि पौर्णमास्यामुदेति अथवास्तं गच्छति तदा गुरोः कार्तिकवर्षसप्रवेशः स्यात्
वैशाखान्ते ज्येष्ठादौ यदा मृगशीर्षनक्षत्रे स्थितः सूर्यः तदा मृगशिरसि आर्द्रायां वा स्थितः उदेति अ
त्तं२ स्तं वा गच्छति तदा मार्गशिरशीर्षवर्षं प्रायेण आषाढे सूर्यः पुनर्वसौ तिष्ठति तदा गुरुः पुनर्वसौ पु

पुष्ये वा स्थित उदेति अस्तं वा गच्छति तदा पौषं वर्षं अश्लेषा नक्षत्रे आषाढं ते श्रावणे वा रविस्तिष्ठ
ति गुरुः रवि तत्रैव अश्लेषा मघा नक्षत्रे स्थित उदेत्यस्तं वा गच्छति तदा माघं वर्षं भाद्रपदे उत्तराफा
१६४ ल्गुनी नक्षत्रेषु यदा रविः गुरुः पि पूर्वोत्तरफाल्गुन्यां हस्ते वोदेति अस्तं [illegible] स्वात्यां स्थितः वा उदे
त्यस्तं वा याति तदा चैत्रं वर्षं यदा कार्त्तिके विशाखा नक्षत्रेऽर्कस्तत्र विशाखायामनुराधायां वा गु
164 रुरुदेत्यस्तमेति वा तदा ज्येष्ठं वर्षं यदा पौषे मासि पूर्वाषाढेऽर्कः तत्र पूर्वाषाढोत्तराषाढे वा गुरुः
स्थित उदेत्यस्तमेति वा तदाषाढं वर्षं माघे यदा श्रवणे धनिष्ठायां वा गुरुरुदेत्यस्तमेति वा तदा श्रा
वणं वर्षं यदा फाल्गुने मासे शतभिषक् नक्षत्रेऽर्कस्तत्र शतभिषजि पूर्वभाद्रपदोत्तराभाद्रपदा
यां वा गुरुः स्थित उदेत्यस्तं वा याति तदा भाद्रपदं वर्षं ॥ ॥ उदयादुदयं भानोः सा
वनं तत्प्रकीर्त्तितं ॥ सावनेन स्मरेत्तानि यज्ञकालविधिस्तु तैः ॥ ७ ॥ सूतकादि परिच्छेदो दिनमासाब्द
पास्तथा ॥ मध्यमग्रहभुक्तिश्च सावनेनैव गृह्यते ॥ ८ ॥ सुरासुराणामन्योन्यमहोरात्रं विपर्यया
त ॥ यत्प्रोक्तं तद्भवेद्दिव्यं भानोर्भगणपूरणात् ॥ ९ ॥ मन्वन्तरव्यवस्था च प्राजापत्यमुदाहृतं ॥ न तत्र १६४
द्युनिशोर्भेदो ब्राह्मः कल्पः प्रकीर्त्यते ॥ १० ॥ एतत्ते सर्वमाख्यातं रहस्यं परमाद्भुतं ॥ ब्राह्ममेतत्परं स्थानं
सर्वपापप्रणाशनं ॥ ११ ॥ दिव्यं चक्षुर्ग्रहर्क्षाणां दर्शनं ज्ञानमुत्तमं ॥ विज्ञायार्कादिलोकेषु स्थानं प्राप्त

१६८

त्रिशाश्वतं ॥२२॥ इत्युक्त्वा मय मामंत्र्य सम्यक् कृते नाभिराजितः ॥ दिव्यमाकाशमाचाकिरिः प्राविशत्स्वं
१६५ समंडलं ॥२३॥ मयोथ लब्धा तत्तानं दिव्यं साक्षाद्विवस्वतः ॥ कृतकृत्यमात्मानं मेने निर्धूतक
ल्मषं ॥२४॥ ज्ञात्वा तमृषयश्चार्थ सूर्यलब्धवरं मयं ॥ परिवव्रुरुपेत्याथो ज्ञानं पप्रछुरादरात
॥२५॥ स तेभ्यः प्रददौ प्रीतो ग्रहाणां चरितं महत ॥ अत्यद्भुततमं लोके रहस्यं ब्रह्मसम्मितं ॥२६॥
165 ॥ ॥ एषां व्याख्या सुगमा ॥ इति श्रीज्योतिर्विद्वद्दत्तात्मज भूधर विरचिते सूर्यसिद्धां
तविवरणे मानाध्यायश्चतुर्दशः ॥ समाप्तेयं टीका ॥ ॥ संवत १८८० पौषमासे कृष्णप
क्षे शुभतिथौ गतोत्र चतुर्थ्यां शुक्रवारे लिखितेयं सूर्यसिद्धांतटीका सोहहरत्नाख्यभार्यं चंदगो
जेरलासु नामनगरवासिना पद्मालयाख्यनगरे शुभं लेखकपाठकानां भूयात श्रीरस्तु ॥
॥ संवत्स्वकवस्वेके [redacted] लसुतेन स्वयुतार्थं सभाचंद्रेण लेखिता ॥ १६५
मासे पौषे मलिम्लुचे ॥ ॥ सूर्यसिद्धांतटीकेयं ज्ञात्वा गोजेरशर्मणा ॥ ९ ॥ पुण्यमस्तु
गतेपाख्यचतुर्थ्यां वै ॥
पक्षे कृष्णे भृगोर्दिने ॥ १ ॥

सूर्यसिद्धान्तः गूढार्थप्रकाशाख्यटीकासहितः
८५८

१६५

नं० ८६६४ - प

सूर्यसिद्धान्तः विवरण सहितः (ज्योतिषम्)

पत्राणि १६५ (सम्पूर्णम्)

कर्त्ता भूधरः संवत् १८..

टीका सूर्यसिद्धान्तादी मधरी